१६

गायत्री

पृष्ठ

१६०१ से १८००

October 1926.

CH

Co

Registered According to Act XXV. of 1867 (All R

at the Vidya Vilas Press, Benares.

1925.

Octob

CHOWKHAMBÂ SANSKRIT SERIES;

A.

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 346

गादाधरी

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता।

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY
OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Chakravartin. With Text.

Edited by Nyâyâchârya Vâmâcharana Bhattâchârya
Professor Govt. Sanskrit College, Benares
and Nyâyopâdhyâya Dhundhiraj Shastri,
Professor, D. A. V. Ved Vidyalay,
BENARES.

FASCICULUS XVIII–१८.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1925.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

थाणामेकीकृत्य महर्षिणा विभागकरणात् । न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोस्तदज्ञापकत्वान्येषामुपसंग्रहः कुतो न कृत इति वाच्यम् स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् ।

(दी०) तेनानुमितिविरोधित्वघटितलक्षणकरणेन, असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरन्यथा पुनरव्याप्तिरेव । साध्याभावज्ञापकत्वेन—साक्षात्साध्यवत्तानुमितिविरोधित्वेन ।

(गा०) तेनेत्यस्य संशायकताघटितलक्षणपरित्यागपूर्वकापरलक्षणद्वयकरणस्यासाधारणसङ्ग्रहप्रयोजकतार्थकत्वं साध्यतदभावोपस्थापकतये यस्य सत्प्रतिपक्षोत्थापकतयेत्यर्थकत्वमपि न साधु । असाधारण्यस्य सत्प्रतिपक्षोत्थापकतामते साध्यव्यापकीभूताभावप्रतियोगित्वस्यैवासाधारण्यतया तस्य व्याप्तिग्रहाविरोधितया विरुद्धादिसंकीर्णासाधारणानुरोधेन व्याप्तिग्रहद्वयविरोधितांपरतया व्याख्येयस्याव्यवहितलक्षणस्य तत्राव्याप्तेरावश्यकत्वादतस्तत्पदं मध्यमलक्षणमात्रपरतया व्याचष्टे तेनेति । असाधारणस्य संशायकतापक्षे प्रथमलक्षणस्यैव साधुता न तु मध्यमस्य संशयप्रयोजकस्य निश्चितसाध्यतदभाववद्व्यावृत्तत्वादेरनुमित्यविरोधित्वादित्युपष्टंभासङ्गतिभयेन साध्यतदभावोपस्थापकतयेत्यस्य संशायकतयेत्यर्थं परित्यज्यार्थान्तरमाह सत्प्रतिपक्षोत्थापकतयेति । इतरलक्षणयोस्तन्मतेऽसाधारणाव्याप्तिसत्त्व एवोपष्टंभसङ्गतेरुपष्टंभकतां स्पष्टीकर्तुं तत्पूरयति अन्यथा पुनरिति । इतरलक्षणयोस्त्वित्यर्थः । अव्याप्तिरेवेति । सत्प्रतिपक्षोत्थापकतया दूषकत्वपक्ष इत्यनुषज्यते । यथाश्रुतं साध्याभावज्ञापकत्वं न बाधसाधारणमतस्तदर्थं व्याचष्टे साध्याभावेति । व्यभिचारादिव्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकताघटितस्य विरोधित्वस्य विरोधितालाभाय साक्षादिति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां
गादाधर्यां सव्यभिचारनिरूपणम् ।

अथानुमानगादाधर्याम्

साधारणप्रकरणम् ।

(चि०) तत्र साधारणत्वं न साध्याभाववद्गामित्वम् । सर्व्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चाव्याप्तेः । अत एव न साध्यवत्तदन्यवृत्तित्वम् , नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम् साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात् । अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगतत्वमपि । अनुपसंहार्य्यो व्यावर्त्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्, त्यज तर्हि तमधिकं क्लृप्तेऽन्तर्भावात् । नापि सपक्षविपक्षगतत्वम् , व्यर्थविशेषणत्वात् । विरुद्धो व्यावर्त्त्य इति चेन्न । विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात् ।

अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वम् , तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये नातिप्रसङ्गः, न च व्यर्थविशेषणता, घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्य्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेन्न । दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः । साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न, व्यर्थविशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच । एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति ॥

(दी०) सर्वमनित्यमित्यादि सम्प्रदायमनुरुध्योक्तम् । अत एव तावदग्रेऽन्तर्भावयिष्यति । नापीति । निश्चिते साध्यवति साध्यवद्भिन्ने च वर्त्तमानत्वमित्यर्थः । अनुपसंहार्य्य इति । साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्त्वादिति भावः । नापीति । इह सपक्षत्वं न निश्चयगर्भमतो नाभेदः । घट इत्यादि । इत्यस्य विरुद्धस्य–अनुपसंहार्य्यस्य–प्रसिद्धस्य च विरुद्धान्तरस्य व्यवच्छेद्यत्वादित्यर्थः ।

अन्वयतो व्यतिरेकतश्च सहचाराग्रहदशायामीदृशं द्वित्वमनुपसंहारीति मतेनेदमित्यपि कश्चित् ॥

(गा०) सर्वमनित्यं प्रमेयत्वादित्यादेः स्वमते साधारणत्वात्तत्रातिव्याप्तिप्रदर्शनासंगतेराह संप्रदायमिति । तन्मते निश्चितसाध्यतदभाववद्वृत्तेरेव साधारणतया उक्तहेत्वोरनुपसंहार्य्यत्वासाधारणत्वदशायामलक्ष्यत्वमेवेति भावः । ननु मणिकारमते वास्तवसाध्याभाववद्वृत्तिरेव साधारण इत्येव कुतोऽवधारितमित्यत आहात एवेति । स्वमते तस्य लक्ष्यत्वादेवेत्यर्थः । अग्रे–सिद्धान्तग्रन्थे । निश्चितसाध्यवत्तदन्यवृत्तित्वमित्यत्र तत्पदस्य प्रकान्तनिश्चितसाध्यवत्परामर्शकत्वे साध्यसंशयविषयीभूतपक्षे सपक्षे च वर्त्तमाने सत्येतावतिप्रसङ्ग इत्यतस्तस्य साध्यवन्मात्रपरतां स्पष्टयितुं व्याचष्टे निश्चित इति । साध्यादिमत्तया निश्चित इत्यर्थः । एतच्च साध्यवद्भिन्नेऽप्यन्वेति, अन्यथा निश्चितसाध्यवतीति समासेन लिखनस्य परित्यागे बीजाभावात् । न चानुपसंहार्य्यसाधारणयोरतिव्याप्तिः साध्यवति तद्विशेषणेनैव वारणात् साध्यवद्भिन्ने तस्य विशेषणत्वमप्रयोजकमिति वाच्यम् । साध्यवदन्यत्वसंशयविषयवृत्तित्वज्ञानस्याप्रतिबन्धकत्वात् स्वरूपसन्निश्चयघटितस्यैव दोषत्वमित्यभिप्रायेण तदुपादानात् साध्यवति तद्विशेषणोपादानं च–शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यादेरनवगतसाध्यसहचरितत्वे सति अवगतसाध्याभावसहचरिततया विरुद्धत्वमेव न तु साधारणत्वमिति–मताभिप्रायेण तद्वारणाय । उभयत्र विकल्पेन तादृशविशेषणं प्रक्षिप्य लक्षणद्वयं करणीयमित्यभिप्रायेण समासोपेक्षणमिति पुनरयुक्तम् । तथासति सपक्षविपक्षग·

त्त्वरूपाग्रिमलक्षणे सपक्षत्वविपक्षत्वोभयशरीरे निश्चयांशपरित्याग एव पौनरुक्त्यपरिहारसम्भवात्, सपक्षत्वमात्रस्य च तद्गर्भतया निराकरणासंगतेः।

मूले इत्येवोद्भाव्यत इत्यत्र इतीत्यनन्तरं विपक्षवृत्तित्वमिति पूरणीयम् अयोगोलकेनानैकान्तिको वह्निरित्यत्र साध्यवदन्याधेयत्वम् अनैकान्तिकपदार्थः। तत्रैव च तृतीयान्तार्थायोगोलकनिरूपित्वादेरन्वयो बोध्यः। ननु तन्मात्रोद्भावनान्न वादिनिवृत्तिरिति न तन्मात्रं दोष इत्याशंकां निराकरोति तत एवेति। एवकारव्यवच्छेद्यं स्फुटयति न त्विति। सपक्षगतत्वमपीति। उद्भाव्यत इत्यनुषज्यते। अनुपसंहार्य्ये सर्वमनित्यं प्रमेयत्वादित्यादौ निश्चितसाध्यवदन्यवृत्तित्वदलासत्वात् सपक्षगतत्वमात्रस्य न तद्व्यावर्त्तकता अतः सपक्षगतत्वनिश्चितत्वरूपसाध्यवदन्यविशेषणयोरन्यतरसार्थक्यशङ्कापरत्वमनुपसंहार्य्य इति मूलस्य स्फुटयितुं निश्चयाघटितसाध्यवदन्यवृत्तित्वस्य तत्साधारण्यमाह दीधितौ साध्यवदन्येति। तत्रापि–अनुपसहार्येपि। न निश्चयगर्भमिति। न निश्चितसाध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमेवेत्यर्थः। नाभेद इति। न निश्चितसाध्यवदित्याद्युक्तलक्षणाभेद इत्यर्थः। घटो ऽनित्यो घटाकाशोभयवृत्तिद्वित्वादित्यस्य केवलान्वयिधर्मावच्छिन्नपक्षकत्वाभावेनानुपसंहारित्वाभावादित्यनुपसंहार्य्यस्येति मूलासङ्गतिमाशंक्यान्तरा पूरयति इत्यस्य विरुद्धस्येति। विरुद्धत्वं चास्यानवगतसाध्यसहचारकत्वे सति अवगतसाध्याभावसहचारी विरुद्ध इति मते अनुपसंहार्यस्य विशिष्यानभिधानात् कस्येत्याकाङ्क्षायामाह प्रसिद्धस्येति। सर्वमनित्यं प्रमेयत्वादित्यादेरित्यर्थः। विरुद्धस्येत्यस्य विरुद्धसामान्यपरत्वे दर्शितद्वित्वरूपविरुद्धहेतोः पृथगुपादानानुपपत्तिरतोऽयं गौरश्वत्वादित्यादिसर्ववादिसिद्धविरुद्धपरतया तद्व्याचष्टे विरुद्धान्तरस्येति। तादृशद्वित्वरूपविरुद्धस्य पक्षातिरिक्तसाध्यवद्वृत्तित्वरूपसमुदायविशेषणेन विरुद्धान्तरस्य च पक्षान्यत्वमनन्तर्भाव्यापि साध्यवद्वृत्तित्वविशेषणेन व्यावृत्तिरिति प्रदर्शनाय भेदेनोपादानमिति भावः।

केवलान्वयिधर्मावच्छिन्नपक्षकत्वं नानुपसंहारित्वं किन्त्वप्रतीतव्याप्तिग्रहानुकूलसहचारत्वमिति मते कथितद्वित्वमनुपसंहार्य्येवेति तन्मतमालम्ब्य यथाश्रुतमूलमुपपादयतो मतमाहान्वयत इति। साध्य·

पक्षवृत्तित्वांशव्यावर्त्यस्य विरुद्धस्येव पक्षान्यवृत्तित्वांशव्यावर्त्यस्य सर्वमनित्यं प्रमेयत्वादित्याद्यनुपसंहार्य्यस्याप्युपादानौचित्यादनुपसंहार्य्यविशेषस्योपदानं निर्बीजमित्यस्वरससूचनाय कश्चिदिति ॥

(चि०) उच्यते विपक्षवृत्तित्वं साधारणत्वम्, तन्मात्रस्य दूषकत्वात् । विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्, अन्यथा तस्य हेत्वाभासान्तरतापत्तेः । उपाधेरसङ्कर एव । सर्वमनित्यं प्रमेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः ॥

इति साधारणचिन्तामणिः ॥

(दी०) विपक्षेति । अत्र विपक्षत्वं साध्याभाववत्त्वम् । अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूल एव स्फुटतरमभिधानात्, न तु निश्चयगर्भं तज्ज्ञानस्याप्रतिबन्धकत्वात् । न च वस्तुतो यत्र तन्निश्चयस्तद्वृत्तित्वज्ञानं प्रतिबन्धकम्, रूपान्तरेण साध्याभाववत्तया निश्चिते रूपान्तरेण हेतुज्ञानेऽप्यप्रतिबन्धात् । न चैकेन रूपेण तत्तथा, गौरवात्, हेतुसाध्याभावयोः सामानाधिकरण्यास्फुरणेनाविरोधात्, साध्याभाववद्वृत्तिर्हेतुरित्यादिशब्दज्ञानानामप्रतिबन्धकत्वापाताच्च ।

यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशयसाधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमन्यथा पक्ष एव साध्यसन्देहेन सन्दिग्धानैकान्तिकत्वापत्तेरिति । यदाहुः–'नहि पक्षे पक्षसमे वा व्यभिचार' इति ।

तन्न । व्याप्तिनिश्चये हेतौ व्यभिचारसंशयायोगात्, तदनिश्चयदशायाम् अनुकूलतर्कास्फूर्त्तौ सन्दिग्धानैकान्तिकत्वस्येष्ट-

त्वात्-हेतुसाध्याभावसामानाधिकरण्यावगाहितयैव ज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वात्, अत एव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वादित्यादयोऽनुकूलतर्कविरहिणो बाधप्रतिरोधयोरनवतारेऽपि पक्षे एव सन्दिग्धानैकान्तिकतया अप्रयोजका गीयन्ते। एवं वह्निर्दाहानुकूलेत्यादयः शक्तिसाधका अपि। अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्तानिर्णयाद्व्याप्तिग्रहस्य दुर्वारत्वात्, पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसङ्गाच्च।

(गा०) सिद्धान्तलक्षणेपि विपक्षपदस्य निश्चितसाध्याभाववदर्थकताभ्रमं निराकरोति अत्रेति। निश्चयांशानिवेशे मूलस्यापि संमतिमादर्शयति अनुपदमेवेति। स्फुटतरमभिधानात्-वास्तवसाध्याभाववद्वृत्तित्वस्य साधारण्यरूपतास्फुटीकरणात्। न तु निश्चयगर्भं विपक्षत्वं संभवदुक्तिकमपीति शेषः। तज्ज्ञानस्य-निश्चयांशज्ञानस्य, अप्रतिबन्धकत्वात्-व्याप्तिज्ञानाप्रतिबन्धकत्वात्। व्याप्तेर्निश्चितसाध्याभाववद्वृत्तित्वाघटितत्वादिति भावः।

ननु निश्चयांशज्ञानस्याप्रतिबन्धकत्वेपि स्वरूपसत्साध्याभावनिश्चयविषयधर्मिवृत्तित्वज्ञानत्वेन प्रतिबन्धकतया तादृशधर्मिवृत्तित्वं साधारण्यरूपहेत्वाभासो भवेत्। न च निश्चयघटितस्य विशिष्टस्य प्रतिबन्धकज्ञानाविषयत्वेन सामान्यलक्षणानाक्रान्ततया न हेत्वाभासतेति वाच्यम्। मणिकारोक्तदोषसामान्यलक्षणस्य यथाश्रुतार्थपरतया अनेनैव परित्यागात्, तत्परित्यागे कथंचिदेतत्साधारण्यस्यापि सम्भवात्।

(वस्तुतस्तु साध्याभावनिश्चयविषयीभूतायोगोलकादिधर्मिवृत्तित्वस्यायोगोलकादिवृत्तितात्वेनैव रूपेण दोषता तद्रूपविशिष्टविषयकज्ञानस्यायोगोलकादिधर्मिकसाध्याभावनिश्चयविशिष्टत्वेन प्रतिबंधकत्वात, तथाच साध्याभावनिश्चयविषयवृत्तित्वत्वेन ज्ञानस्याप्रतिबन्धकत्वेपि न क्षतिः, तेन रूपेण दोषत्वानुपगमात्। न चायोगोलकादिवृत्तितादृशज्ञानस्योक्तनिश्चयविशिष्टत्वेन प्रतिबन्धकत्वेऽपि तद्विषयकत्वस्य तादृशप्रतिबन्धकताशून्यतादृशानिश्चयविशिष्टज्ञान साधारणतया नानतिरिक्तवृत्तित्वरूपावच्छेदकत्वमिति

न तत् हेत्वाभाससामान्यलक्षणाक्रान्तत्वमिति वाच्यम् । सा-
मानाधिकरण्यसम्बन्धेन यस्य यस्य यादृशप्रतिबन्धकता-
यामवच्छेदकत्वं तत्तदवच्छेदकविशिष्टस्य यादृशविषयकनिश्चयत्व-
स्य तत्प्रतिबन्धकतानतिरिक्तवृत्तित्वविवक्षया सामान्यलक्षणस्यो-
क्तसाधारण्यसम्भवात् । बाधादिप्रतिबन्धकतायामप्रामाण्यग्रहाभा-
व एव सामानाधिकरण्यसम्बन्धेनावच्छेदकः प्रसिद्ध इति ।) न चै-
वं तुल्ययुक्त्या हेतुमत्ताज्ञानविषयधर्मिवृत्तिसाध्याभावादिकमपि
तथा स्यादिति वाच्यम् । इष्टत्वात् ।

अथैवं महानसादौ वह्न्यभावभ्रमदशायां ह्रदादौ धूमादिभ्रमदशा-
यां च तादृशभ्रमविषये धूमवह्न्यभावादेर्वृत्तेर्वह्न्यादिसाध्यकधूमादेः
साधारण्यं स्यादिति चेदेतदपीष्टमेव । न चैवं साधारण्यस्य नि-
त्यदोषताप्रवादाविरोधः, उक्तरूपेण साध्याभाववद्वृत्तित्वरूपविशि-
ष्टविषयकज्ञानस्यापि प्रतिबन्धकतया तादृशविशिष्टविषयस्य चाप्र-
तिबन्धकज्ञानाविषयत्वेन नित्यदोषतया तदविरोधात् । सद्धेतुनिष्ठ-
साध्याभावभ्रमविषयवृत्तित्वादिरूपस्य च तस्यानित्यदोषताया एवो-
पगमात् । न चैवं सद्धेतौ पक्षतावच्छेदकादिभ्रमविषयवृत्तिसाध्या-
भावादिकमपि बाधः स्यादविशेषादिति वाच्यम् । प्रतिबन्धकप्रमा-
विषयस्यैव दोषत्वोपगमात् तादृशस्य साध्याभावादिविषयकप्रतिबं-
धकीभूतज्ञानस्य पक्षतावच्छेदकाद्यंशे भ्रमत्वनियमात्, प्रकृते च ज्ञा-
नद्वयस्यापि मिलितस्य प्रतिबन्धकतया एकज्ञानस्य भ्रमत्वेपि प्रमा-
त्मकापरज्ञानविषयस्यापि दोषतासम्भवात् । अत एव सद्धेतौ पक्ष-
वृत्तिसाध्याभावव्याप्यस्याप्रसिद्धावपि पक्षवृत्तित्वेन भ्रमविषयनिष्ठ-
साध्याभावव्याप्यत्वाद्धेः सत्प्रतिपक्षतया तस्यानित्यदोषत्वम्, मिलित-
योः समानधर्मिकसाध्याभाववत्ताग्रहहेतुमत्ताग्रहयोर्व्याप्तिबुद्धाविव
मिलितयोरेकधर्मिकसाध्याभावव्याप्तिपक्षधर्मताबुद्ध्योरनुमितौ विरो-
धित्वात् तदुभयैकतरप्रमारूपैकज्ञानविषयस्य विशिष्टस्य दोषत्वे बा-
धकाभावात् । न चैवं विरोधिव्याप्त्यादेरज्ञायमानतादशायामपि स-
द्धेतौ दुष्टतापत्तिरिति वाच्यम् । ज्ञानद्वयस्य यत्र प्रतिबन्धकता तत्र
प्रतिबन्धकीभूतज्ञानावच्छिन्नस्यैव विषयस्य दोषत्वादिति । न च
ज्ञानान्तरविशिष्टस्य यादृशविशिष्टज्ञानस्य प्रतिबन्धकत्वं तादृशवि-
शिष्टविषयकत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वान्न दोषसामान्यल-

क्षणाक्रान्तत्वमिति वाच्यम् । सामान्यलक्षणे स्वरूपसम्बन्धरूपाव-
च्छेदकताया एव निवेशनीयत्वात् । एकदेशातिव्याप्तेर्यादृशविशिष्ट-
विषयितासामान्यं प्रतिबन्धकतावच्छेदकमिति विवक्षयैव वारणात्।
न च नित्यदोषस्य बाधादेः सर्वदा दोषतया तदनिर्वाहभयेन प्रति-
बन्धकज्ञानाधिकरणकालावच्छिन्नत्वस्य सामान्यलक्षणे दुर्निवेशत-
याऽनित्यानामपि दोषाणां सर्वदा दोषतापत्तिर्दुर्वारैवेति वाच्यम् ।
यादृशज्ञानान्तराविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्ध-
ता तादृशज्ञानसहिततादृशविशिष्टज्ञानानधिकरणक्षणवृत्तित्वविशि-
ष्टतादृशविशिष्टपर्य्याप्तविषयताविरहाविशिष्टत्वे सति यादृशविशि-
ष्टनिरूपितविषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तादृश-
विशिष्टत्वस्य सामान्यलक्षणतया नित्यदोषे च विशेष्यीभूतनिरुक्त-
विषयताविरहेण तादृशज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशवि-
षयताविरहस्य सर्वदैव सत्त्वेन अनित्यदोषे च प्रतिबन्धकज्ञानदशा-
यामेव तादृशक्षणरूपविशेषणविरहेण तादृशविरहस्य सत्त्वेन सामं-
जस्यात् । विशिष्टाभावप्रविष्टक्षणे निरुक्तज्ञानयोरेकतरानधिकरण-
त्वमात्रस्य निवेशे पर्वतो वह्निमान् धूमादित्यादौ महानसादौ वह्न्य-
भावादिभ्रमशून्यतादशायामपि धूमादौ महानसादिवृत्तित्वज्ञानमादाय
व्यभिचारित्वापत्तिः, प्रतिहेतौ विरोधिव्याप्तिपक्षधर्मताज्ञानयोरे-
कतरमात्रसत्त्वेपि सत्प्रतिपक्षतापत्तिश्चेति विशिष्टाभावप्रतियोगिको-
टौ एकज्ञानसहितापरज्ञानाधिकरणक्षणनिवेशः । एवं च सद्धेतोर-
धिकरणे साध्याभावस्य भ्रमसत्त्वेपि हेतौ तदधिकरणवृत्तित्वाज्ञा-
नदशायां न तस्य सव्यभिचारत्वमपि तूभयज्ञानदशायामेवेति मि-
श्रानुयायिनामाशंकां निराकर्तुं साधारण्यस्थले ज्ञानद्वयप्रतिबन्धकतां
खंडयति न चेति । न वेत्यर्थः । रूपान्तरेणेति । द्रव्यं धूमाभाववत्
अयोगोलकं वह्निमदित्यादिज्ञानेपि वह्निर्धूमव्याप्य इति ज्ञानोत्पत्तेरित्यर्थः।
तद्रूपावच्छिन्नसाध्याभावनिश्चयसहिततद्रूपावच्छिन्नविशेष्यकहेतुम-
त्ताज्ञानप्रतिबन्धकमित्युक्तौ नायं दोष इति शंकते न चैकेनेति ।
गौरवादिति विशिष्टज्ञानत्वेन प्रतिबन्धकत्वापेक्षयेत्यादिः । ननु ज्ञा-
नद्वयकालेपि फलानुत्पत्त्या तन्निर्वाहाय दर्शितरूपेण प्रतिबन्धकताया
आवश्यकत्वे गौरवमकिंचित्करमेवानन्यगतिकत्वादित्यत आह हे-
त्विति । ज्ञानद्वयस्थले ग्राह्यसाध्याभाववद्वृत्तित्वाभावाविरोधिता-

वच्छेदकसाध्याभावसामानाधिकरण्यत्वावच्छिन्नस्य हेतावभानेन व्याप्तिज्ञानोत्पादे बाधकाभावादित्यर्थः । तथाच तदानीं व्याप्तिज्ञानानुत्पादस्यैवासिद्धतया गुरुरूपेण प्रतिबन्धकत्वमप्रामाणिकमेवेति भावः । दर्शितरूपेण प्रतिबन्धकत्वे सर्ववादिसिद्धप्रतिबन्धकताकस्य ग्राह्यविरोधितावच्छेदकप्रकारकज्ञानस्यासंग्रह इत्याह साध्याभावेति । अप्रतिबन्धकत्वापातादिति । साध्याभावग्रहस्य तदानीन्तनस्य निर्द्धर्मितावच्छेदकतया तादृशज्ञानस्योक्तप्रतिबन्धकतावच्छेदकानाक्रान्तत्वादिति भावः । प्रत्यक्षे सन्निकर्षादिबलात् साध्याभावधर्मितावच्छेदकतया अयोगोलकत्वादेरपि भानसम्भवात् शाब्दानुधावनम् । न च साध्याभावप्रकारतानिरूपितविशेष्यतानिरूपिता या स्वसमानकालीनज्ञानीयप्रकारता तदाश्रयधर्मावच्छिन्नवृत्तित्वावगाहिज्ञानत्वेन प्रतिबन्धकत्वोपगमादुक्तज्ञानसंग्रहः, साध्याभावे धर्मितावच्छेदकस्यैव साध्याभावस्यापि निरुक्तप्रकारताश्रयत्वादिति वाच्यम् । द्रव्यत्वादिसामानधिकरण्येन साध्याभावग्रहकालीनस्य द्रव्यवृत्तिर्हेतुरित्यादिज्ञानस्य प्रतिबन्धकत्वापातात् । धर्मितावच्छेदकावच्छेदेन साध्याभावावगाहिज्ञानस्य निवेशे न निस्तारः निर्द्धर्मितावच्छेदकसाध्याभावज्ञानकालीनज्ञानस्य दुःसंग्रहत्वात् ।

विपक्षत्वं निश्चितसाध्याभाववत्त्वमेव निश्चयांशज्ञानस्याविरोधित्वेपि न क्षतिः । तद्घटितसाध्याभाववद्वृत्तित्वस्यैव दोषत्वोपगमात् । साध्याभावे निश्चितत्वाभिधानस्य व्यभिचारज्ञानप्रतिबन्धकतायां तदंश एव निश्चयत्वप्रवेश इत्येतत्प्रदर्शनमात्रार्थत्वादेवं च साधारण्यस्य नानित्यदोषताप्रसक्तिरपीति मिश्राणां द्वितीयं मतं दूषयितुमुपन्यस्यति यत्त्विति । साध्याभावांशे निश्चयरूपमिति ।

अथात्र किं निश्चयत्वम्? न सामान्यतः साध्याभावसंशयान्यसाध्याभावज्ञानत्वम् , महानसं धूमवन्नवा धूमाभाववदयोगोलकवृत्तिर्वह्निरित्यंतादृशज्ञानासंग्रहात् । नापि—हेत्वधिकरणप्रकारीभूतयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्याभावसंशयान्यतज्ज्ञानत्वम् । यत्किञ्चित्त्वनिवेशात् वन्हिमान् पर्वतो धूमवान्न वा धूमाभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानसंग्रहः, तस्य तादृशायोगोलकत्वरूपयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसंशयान्यत्वादिति—निर्दोषम् । साध्याभावांशे निर्द्धर्मितावच्छेदकस्य साध्याभाववद्वृत्तिर्हेतुरितिज्ञानस्यासंग्रहात्—तत्र हे-

त्वधिकरणांशे साध्याभावमात्रस्य प्रकारत्वात् तदवच्छिन्नविशेष्यताकसाध्याभावसंशयस्याप्रसिद्धेः, यत्किंचित्त्वनिवेशेनाननुगमाच्चेति ।

अत्राहुः—आधेयताविशेषणतापन्नस्य अधिकरणस्य या संशयत्वनिरूपकविशेष्यतान्यविशेष्यता तन्निरूपितसाध्याभावप्रकारताशालित्वं तन्निश्चयत्वम, संशयत्वनिरूपिका च विपरीतकोटिधर्मितावच्छेदकतापन्नधर्मावच्छिन्ना विशेष्यता, तदन्यत्वं च साध्याभाववद्वृत्तिधूम इत्यादिज्ञानीयधर्मितावच्छेदकानवच्छिन्नविशेष्यतादावक्षतमेव, संशये च प्रत्येककोटिनिश्चयीयविशेष्यताभ्यामतिरिक्तैव विशेष्यता, अतो निश्चयीयधर्मितावच्छेदकावच्छिन्नविशेष्यतायां तदन्यत्वमेव । अधिकमन्यत्रानुसन्धेयम् ।

शेषांशे-आधेयत्वाद्यंशे, संशयसाधारणं-निश्चयत्वविशेषणानवच्छिन्नम्, अन्यथा-साध्याभावांशे निश्चयत्वनिवेशे, सन्दिग्धानैकान्तिकत्वापत्तेः-पक्षांशे साध्याभावसंशयात्मकपक्षवृत्तित्वावगाहिव्यभिचारज्ञानादनुमितिमात्रोच्छेदापत्तेः।साध्याभावसंशयविषयहेतुमत्ताज्ञानस्याविरोधित्वे प्राचीनसंवादमाह न हि पक्ष इत्यादिना। पक्षःसन्दिग्धसाध्यकप्रकृतधर्म्मिणि, पक्षसमे-सन्दिग्धसाध्यकधर्म्यन्तरे, व्यभिचारो-व्यभिचारग्रहः । प्रतिबन्धक इति शेषः। व्याप्तिनिश्चये हेतुमति पक्षादौ साध्याभावसंशयानवतारदशायां निश्चिताया व्याप्तेः स्मरणे व्यभिचारसंशयायोगात् इति । पक्षः साध्यवान्न वा पक्षवृत्तिर्हेतुरिति विशृंखलविषयकज्ञानं न विरोधि विरोधितावच्छेदकरूपाप्रकारकत्वात् , किन्तु साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रकारकज्ञानमेव, तच्च व्याप्तिनिश्चयप्रतिबध्यमिति तस्योत्पत्त्यसंभवादित्यर्थः ।

यत्र व्याप्तिग्राहकसहचारदर्शनादिदशायामेव क्वचन हेतुमति साध्याभावसंशय आसीत्तत्र तन्मते पूर्वं व्याप्तेरनिश्चयेन पक्षे हेतुदर्शनदशायां व्याप्तिस्मरणासंभवात्पक्षान्तर्भावेण व्यभिचारसंशयसत्त्वात् प्रत्यक्षतन्निश्चयस्यासंभवादनुमितिर्न स्यादित्यत्रेष्टापत्तिमाह तदनिश्चयदशायां त्विति । पूर्वं व्याप्तेरनिश्चयेपि पक्षे साध्यसन्देहदशायामनुकूलतर्कावतारे तु व्याप्तिनिश्चयः संभवति अनुकूलतर्कस्य विशेषदर्शनवत् संशयप्रतिबन्धकतायामुत्तेजकत्वादत आह

नुकूलतर्कास्फूर्ताविति । अस्फूर्तिरनवतारः । अवगाहितयैवेत्येवका-
रेण निश्चयत्वस्य प्रतिबन्धकतावच्छेदकघटकत्वव्यवच्छेदः । तथा-
च साध्याभावांशे संशयात्मकमपि व्यभिचारज्ञानं प्रतिबन्धकमिति
भावः । संशयायोगादिष्टत्वादित्यन्तद्वयस्यात्रैव हेतुत्वं बोध्यम् । अत
एव-साध्याभावांशे संशयसाधारणव्यभिचारज्ञानस्य प्रतिबन्धक-
त्वादेव । पक्ष इत्यादि । शब्दो नित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्म-
वानित्यादय इत्यर्थः । बाधप्रतिरोधयोरनवतारेऽपि-विप्रतिपत्तिदशायां
शब्दादौ अनित्यत्वतद्व्याप्तिविशिष्टयोरनिश्चयेऽपि, अप्रयोजका-नित्य-
त्वाद्यसाधका,भीयन्ते तान्त्रिकैरिति शेषः। दाहानुकूलेत्यादयः-दाहानु-
कूलाद्विष्टातीन्द्रियधर्मसमवायी दाहजनकत्वाददृष्टविशेषवदित्यादय
इत्यर्थः।भर्जनकपालस्थ वह्निनिष्ठानुद्भूतरूपमादाय सिद्धसाधनवार-
णाय दाहानुकूलेति। अदृष्टवदात्मसंयोगमादाय सिद्धसाधनवारणाया-
द्विष्टेति ।उष्णस्पर्शमादाय सिद्धसाधनवारणायातीन्द्रियेति। अन्यथा-
तादृशव्यभिचारज्ञानस्याप्रतिबन्धकत्वे, पक्षातिरिक्ते-साध्यसंशया-
विषये, सर्वत्र-हेतुमति, साध्यवत्तानिर्णयात्-क्वापि हेतुमति साध्या-
भावानिश्चयेन व्याप्तिग्रहस्य दुर्वारत्वात् । एतेन द्वितीयानुमाने वह्नि-
रूपपक्षातिरिक्ते करतलानलसंयोगादौ दण्डादौ च दाहानुकूला-
तीन्द्रियधर्मानिश्चयेपि न दोषः । पक्षविपक्षान्यतरत्वादिना-पर्वतहृ-
दान्यतरत्वतदुभयविशेष्यकप्रमाविषयत्वादिना, सर्वत्र-पर्वतो वह्नि-
मान् धूमादित्यादिसद्धेतौ, सत्प्रतिपक्षप्रसंगात्-अनुमितिप्रतिरोध-
प्रसङ्गात् । तादृशस्यान्यतरत्वादेरधिकरणे क्वचिदपि वन्ह्यादेरनि-
श्चयेन प्रतिबन्धकतावच्छेदकवह्न्यभाववद्व्याप्तिस्तत्र सुग्रहत्वादि-
ति भावः । एतच्च सर्वं प्रत्यक्षानिश्चये ग्राह्यसंशयस्य प्रतिबन्धकत्व-
मतेनाभिहितम्, अन्यथा पुनर्ग्राह्यान्तरविशिष्टबुद्धौ ग्राह्याभावज्ञानस्ये-
वाव्यभिचारबुद्धावपि व्यभिचारग्रहस्यापि निश्चयत्वेनैव प्रतिबन्ध-
कता निश्चयत्वावच्छिन्नं प्रति ज्ञानत्वेन प्रतिबन्धकत्वे संशये निश्च-
यत्वावच्छिन्नस्यापरप्रतिबन्धकताया आवश्यकत्वात् संशयानन्तरं
संशयोदयाज्ज्ञानत्वावच्छिन्नं प्रति ज्ञानत्वेन प्रतिबन्धकत्वासम्भ
वात् । निश्चयत्वं च वृत्त्यंश इव साध्याभावांशेऽपि निवेश्यम्,अधिक-
रणवृत्तित्वांशे निश्चयात्मकस्य अधिकरणांशे साध्याभावरूपविशेषण-
संशयस्यापि विशिष्टसंशयसमानशीलतया विशिष्टाभावसंशयाविरो-

धित्वात् । एवमप्यनुकूलतर्कविरहिणामुक्तानुमानानामप्रयोजकत्वमुपपद्यत एव व्यभिचारसंशयसामग्रीसत्त्वेन व्याप्तिनिश्चयोत्पत्त्यसम्भवात् । निश्चयत्वघटकविपरीतकोट्यप्रकारकत्वे विपरीतकोटिभानप्रयोजकाभावस्य प्रयोजकत्वात् अनुकूलतर्कस्य च विपरीतज्ञानविरोधिनस्तत्प्रयोजकसामग्रीविघटनेनैव व्याप्तिनिश्चयोपयोगितेत्यवधेयम् ॥

(दी०) अथ साध्यतद्वदत्यन्तान्योन्याभावगर्भव्यभिचारयोरेकोपादानेऽन्यतराव्याप्तिः । साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयत्वेनाभावद्वयानुगमेऽपि हेतुमति तादृशाभाववत्त्वस्य तादृशाभाववति हेतुमत्त्वस्य तादृशाभावे हेतुसामानाधिकरण्यस्य साध्यतद्वदादौ हेतुसमानाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेन्न ।

अत्र वदन्ति—प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरोधिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधितावच्छेदकत्वेन विभजनान्नासंग्रहः । अविरोधिन इत्यनेन साध्याप्रसिद्ध्यादीनां निरासः, यदि पुनरत्यन्तान्योन्याऽभावयोरेकतरगर्भव्यभिचारज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वम् इत्यादिकं विभाव्यते, तदा साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्तयोऽनुगमनीयाः । प्रातिस्विकरूपेणोपादाय वा तावद्व्याप्त्यन्यतमग्राहित्वं ग्रहस्य वक्तव्यम् । साध्यव्यभिचरितसामानाधिकरण्यस्य व्याप्ये प्रसिद्धस्य हेतौ विरहोऽप्येतद्विशेष एव । विशिष्टसाधनवत्त्वग्रहाविरोधिनो ज्ञानस्य विषयतया व्यापकत्वग्रहविरोधितावच्छेदकरूपत्वं वा विभाजकम् । शेषं पूर्ववत् ।

(दी०) साध्यतद्वतोरत्यन्तान्योन्याभावौ साध्याभावव्याप्यादिव्यावृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमय्य तत्र

हेतुसामानाधिकरण्याभावग्रहविरोधित्वं साध्यवत्ताज्ञानविरोधिनि तादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वा तथा वक्तव्यम् । साध्याभावव्याप्यादौ तु हेतुसामानाधिकरण्यादिरूपविरोधित्वान्नाभासः । विरोधित्वं पूर्वोक्तदिशावसेयम् । उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति । व्याप्तिग्रहकारणसहचारग्रहसहचार्य्यभावप्रतियोगिग्रहविषयत्वेनानुगम इत्यपि कश्चित् ॥

इति साधारणदीधितिः ।

(गा०) एकोपादाने–एकमात्रवृत्तिसाध्यात्यन्ताभाववद्वृत्तित्वत्वादेः साधारण्यलक्षणत्वे, अन्यतराव्याप्तिः–साध्यवदन्यवृत्तित्वादाव्याप्तिः । एतच्चान्योन्याभावगर्भव्याप्तिद्वयस्यैवानुमितिप्रयोजकतामते अन्यथा । एकाभावघटितव्याप्तेरेव तथात्वे अपराभावघटितव्यभिचारस्य व्यभिचारोन्नायकतयैव विरोधितया हेत्वाभासताविरहात् । साध्यवत्ताज्ञानेति । धर्मितावच्छेदकावच्छिन्ने यद्रूपावच्छिन्नप्रकारकनिश्चयत्वं साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वेन साध्यतद्वदत्यन्तान्योन्याभावावनुगमय्य तादृशाविशिष्टवद्वृत्तित्वं साधारण्यमित्युक्तावपीत्यर्थः । तादृशाभाववत्त्वस्य–साध्यतद्वदत्यन्तान्योन्याभाववत्त्वस्य । एवत्सर्वमसमानप्रकारकज्ञानस्यापि प्रतिबन्धकतामते, अन्यथा साध्याभाववद्वृत्तिर्हेतुरित्यादिज्ञाने हेतुमति साध्याभाव इत्यादिज्ञानस्यासमानप्रकारकत्वेनाविरोधितया तद्विषयस्यानुमितौ तज्जनकज्ञाने च साक्षादविरोधितया हेत्वाभासत्वाभावेन साधारण्यरूपतानुपपत्तेः । साध्यतद्वदादौ-साध्यतावच्छेदकविशिष्टतदवच्छिन्नादौ । आदिपदात् साध्यतावच्छेदकतदवच्छिन्नपरिग्रहः । प्रतियोगित्वादेरित्यादिना तदवच्छेदकत्वपरिग्रहः ।

प्रकृतेति । विशिष्टसाध्यविशिष्टसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताशून्यनिश्चयनिष्ठविषयितायां निरूपितत्वसम्बन्धेन विशेषणीभूतान्वयव्या-

प्तिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वेनेत्यर्थः। तादृशप्रतिबन्धकतावच्छेदकीभूततथाविधनिश्चयत्वविशिष्टस्वनिरूपितविषयिताकत्वमिति यावत्। अन्वयव्याप्तिनिवेशात् व्यतिरेकव्याप्तिग्रहाविरोधिन्यनुपसंहारित्वे नातिव्याप्तिः। अन्वयव्याप्तिश्च स्वव्यापकसामानाधिकरण्यम्। व्यभिचारिणि तदप्रसिद्धावपि तद्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञाननिवेशात् नानुपपत्तिः। असमानप्रकारकहेत्वादिधर्मिकसाध्याभावसामानाधिकरण्यादिज्ञानमपि तादृशव्याप्तिधीविरोध्येवेति न तदसङ्ग्रहः। तस्य तदविरोधित्वे व्यापकसामानाधिकरण्यसाध्याभावासामानाधिकरण्याद्यवगाहिसमूहालम्बनज्ञानविरोधित्वमेव निवेशनीयम् तावद्व्याप्तिग्रहत्वस्य व्यभिचारधीप्रतिबध्यतायां स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेपि न क्षतिः अनतिरिक्तवृतित्वरूपावच्छेदकताया एव विवक्षणीयत्वात्। साध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिबन्धकताशरीरेपि तादृशमेवावच्छेदकत्वं निवेशनीयम् अतः साध्याप्रसिद्ध्यादेर्ग्रहस्य विशिष्टसाध्यग्रहत्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वेपि न तस्याविरोध्यन्तव्यावर्त्यतानुपपत्तिः। शेषं पूर्ववत्। साध्याप्रसिद्ध्यादीनामित्यादिना साध्यनिष्ठावृत्तित्वस्य व्याप्यत्वासिद्धिविशेषस्य साधनाप्रसिद्धेः साधननिष्ठावृत्तित्वस्य स्वरूपासिद्धिप्रभेदस्य साध्यसाधनयोः परस्परासामानाधिकरण्यस्य विरोधात्मकस्यासाधारण्यरूपस्य वा परिग्रहः। विशिष्टसाध्याद्युपादानस्य यथायथं साध्याप्रसिद्ध्यादिवारणप्रयोजनकत्वं बोध्यम्। धूमवान् धूमाभाववदवृत्तिवह्निरित्यादौ धूमाभाववदवृत्तित्वादिकमसिद्धिरेव न तु साधारण्यमतो न तदसङ्ग्रहः क्षतिमावहति। साध्याभाववदवृत्तित्वाद्यवगाहिसमूहालम्बनव्याप्तिग्रहानिवेशपक्षे साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमनुपसंहारित्वं साध्यादावत्यन्ताभावप्रतियोगित्वादिग्रहाविरोधित्वविशेषणं प्रक्षिप्य वारणीयम्। नान्यतरगर्भव्याप्तिग्रहाविरोधित्वमिति। ग्राह्यभावानवगाहित्वे मणिमन्त्रादिन्यायेन विरोधित्वे मानाभावादिति भावः। सामानाधिकरण्यघटितत्वेन—अनुमितिजनकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसामानाधिकरण्यप्रकारतात्वरूपसाधारणधर्मेण। अन्वयव्याप्तयो—ऽन्वयव्याप्तिप्रकारताः। अन्योन्यात्यन्ताभावघटितव्यापकतावच्छेदकावच्छिन्नसाध्यसामाना-

धिकरण्यतत्तदभावघटितव्यभिचाराभावविशिष्टसाध्यसामानाधिकरण्यप्रकारता इति यावत् । अनुगमनीयाः-प्रतिबध्यग्रहविशेषणतया निवेशनीयाः। अतो नैकाभावघटितव्याप्त्युपादानेऽन्यघटितव्यभिचारासङ्ग्रहस्यावकाश इति शेषः । यथाश्रुतग्रन्थलभ्यो विषयानुगमो नोपादेयः गौरवाद्यभिचारिणि हेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टव्याप्त्यप्रसिद्धेश्च ।

ननूक्तरूपेण नानाविधव्याप्तिविषयतानामनुगमेऽसम्भवः । एकाभावघटितव्यभिचारज्ञानप्रतिबध्यतायाः अन्याभावघटितव्याप्तिज्ञाने असत्त्वेन कस्या अपि व्यभिचारज्ञानप्रतिबध्यताया निरुक्तप्रकारताशालिग्रहत्वव्यापकत्वासम्भवात् । सामानाधिकरण्यानवगाहिव्यापकत्वादिज्ञानस्यापि व्यभिचारज्ञानप्रतिबध्यतया सामानाधिकरण्यविषयतायाः स्वरूपसम्बन्धरूपतदवच्छेदकतानाश्रयत्वेन तादृशप्रकारताशालिग्रहत्वे अनतिरिक्तवृत्तितारूपायाः प्रतिबध्यतावच्छेदकताया एव निवेशनीयत्वात् । यदि च स्वरूपसम्बन्धरूपप्रतिबध्यतावच्छेदकताघटितसाध्यसामानाधिकरण्यविषयताघटितधर्मावच्छिन्नानुमितिकारणतावच्छेदकत्वोपलक्षितविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वविषयिताकत्वं विवक्ष्यते, तदा पक्षधर्मत्वविषयत्वावच्छिन्नधीविरोधिन्यां स्वरूपासिद्धावतिव्याप्तिः । हेतुपक्षोभयवैशिष्ट्यविषयताबहिर्भूतत्वस्य जनकतावच्छेदकविषयतायां निवेशे प्रयासाधिक्यमित्येतत्कल्पं परित्यज्य समूहालंबनव्याप्तिधीविरोधित्वेन सकलव्यभिचारान् संगृह्णाति प्रातिस्विकरूपेणेति । तत्तद्व्याप्तित्वेनेत्यर्थः । तथाच समूहालंबनतावद्व्याप्तिबुद्धौ सकलव्यभिचारधियो विरोधित्वात् सर्वत्रलक्षणसमन्वय इति भावः । (ननु साध्याप्रसिद्धिसाधनाप्रसिद्धिवारणानुरोधेन विशिष्टसाध्यसाधनग्रहाविरोधित्वमेवास्तु साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपर्यन्तं व्यर्थम् । विरोधानतिप्रसङ्गस्य सामानाधिकरण्याविषयकतावद्व्यभिचारावगाहिज्ञानोपादानेनैव संभवादित्यत आह साध्येति । तथा चाव्यभिचरितसामानाधिकरण्याभावस्य साधारण्यान्तर्गतस्य सङ्ग्रहाय सामानाधिकरण्यविषयकज्ञानमेवोपादेयम् । एवं च विरोधातिव्याप्तिवारणायैव तत्पर्यन्तं सार्थकमिति भावः । व्याप्ये प्रसिद्धस्येत्यनेन वह्निव्यापकधूम-

सामानाधिकरण्यादिरूपव्याप्तिप्रसिद्ध्या वह्न्यादिनिष्ठतदभावे प्रसिद्धतया नातिव्याप्तिः प्रसक्तिरिति सूचितम्। एतद्विशेषः—साधारण्यविशेषः। व्याप्यत्वासिद्धिस्तु साध्याप्रसिद्ध्यादिरेवेति भावः।

अथ व्याप्तिश्चेत् साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा तदा साध्याभाववद्वृत्तित्वेऽव्याप्तिस्तज्ज्ञानस्य हेतुतावच्छेदकावच्छिन्नांशेऽव्यभिचाराप्रकारकतादृशव्याप्तिज्ञानाविरोधित्वात्। साध्याभाववदवृत्तित्वं साध्यसामानाधिकरण्यमुभयं चेद्व्याप्तिस्तदा विशिष्टाभावस्य कथं साधारण्यमुररीकृतम्। यदि च विनिगमनाविरहात्साध्याव्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्यमिव साध्यसामानाधिकरण्यविशिष्टसाध्याव्यभिचरितत्वमपि व्याप्तिरित्युभयसङ्ग्रह इत्युच्यते, तथाप्यनुमितिं प्रति विशिष्टप्रकारकज्ञानस्य गौरवेण हेतुत्वासम्भवादेकत्र द्वयमिति रीत्योभयप्रकारकज्ञानस्य हेतुत्वं वाच्यम्, तथाच विशिष्टाभावज्ञानस्य जनकज्ञानाविरोधितया तद्विषयविशिष्टाभावस्य कथं हेत्वाभाससामान्यलक्षणाक्रान्तत्वमिति चेन्न।

(यतो)विशिष्टाभावपदमुभयाभावपरम् हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नाव्यभिचारः सामानाधिकरण्यमुभयमेव व्याप्तिः। उभयाभावज्ञानस्य चोभयत्वप्रकारतामनिवेश्य उभयप्रकारतानिरूपितैकविशेष्यताशालिज्ञानं प्रत्येव प्रतिबन्धकत्वं लाघवात्(इति)कल्प्यते। तादृशं च ज्ञानमुभयत्वप्रकारकमिव तदप्रकारकमपीति अनुमितिहेतुभूतयुगपदुभयविशेषितहेतुविषयकज्ञानं प्रति विरोधितया तदुभयाभावस्य हेत्वाभासत्वं साधारण्यरूपता चेति न काप्यनुपपत्तिः। विशिष्टव्याप्तेरुपादाने सामानाधिकरण्यांशानिवेशे प्रयोजनविरहः। व्यापकतांशमात्रोपादानेनैव सकलसाधारण्यसङ्ग्रहसम्भवात्, तथा चाव्यभिचरितसामानाधिकरण्याभावे नातिव्याप्तिः। साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपर्यन्तानिवेशेऽपि च न विरोधातिव्याप्तिरित्याशयेनाह विशिष्टेति। साध्यतावच्छेदकादिविशिष्टेत्यर्थः। आदिपदग्राह्यं साधनतावच्छेदकवैशिष्ट्यं साधनविशेषणं बोध्यम्। वस्तुतः साधनपदमेव साधनतावच्छेदकविशिष्टपरं साध्यपदपूर्वविशिष्टपदार्थस्य साध्यसाधनपदयोर्द्वन्द्वाश्रयण एव साधनान्वयसम्भवात्। तथाच सति द्वन्द्वात्परश्रूयमाणमत्वर्थस्य साध्येनापि सममन्व-

यस्यावश्यकत्वापातात् । न च साध्यवत्त्वमपि ग्रहविशेषणतया विवक्षितम्, साध्यवत्त्वस्य व्यापकत्वाघटकतया साध्यस्यावृत्तित्वेऽतिप्रसङ्गानवकाशेन निष्प्रयोजनकत्वात् । न चावृत्तिगगनादिवारकवृत्तिमत्त्वमपि व्यापकताघटकमिति मते तत्सार्थक्यमिति वाच्यम् । अनुमितौ वृत्तिमत्त्वघटितव्यापकतावगाहित्वेन हेतुत्वेपि प्रकृतलक्षणे तदंशघटितव्यापकतां निवेश्य साध्यवत्त्वग्रहविरोधित्वनिवेशस्य 'प्रक्षालनाद्धि' इति न्यायेनायुक्तत्वात् । साध्याप्रसिद्धिसाधनाप्रसिद्ध्योर्वारणाय साध्यतावच्छेदकादिवैशिष्ट्यनिवेशनम् । व्यापकताघटकसाधनवत्त्वग्रहविरोधिनः साधननिष्ठावृत्तित्वस्य वारणाय साधनवत्त्वपर्य्यन्तानुधावनम् । साध्याभाववद्वृत्तित्वज्ञानस्य व्यापकताज्ञानाविरोधित्वे साध्याभाववदवृत्तित्वादिविषयकसमूहालंबनरूपव्यापकताग्रहो विवक्षणीयः । अथवा व्यापकताघटितव्याप्तिधीरेवानुमितिहेतुः न तु साध्याभाववदवृत्तित्वादिधीस्तथा च साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादिकमेव व्यभिचारः, न तु हेतौ साध्याभाववद्वृत्तित्वादिकं साक्षादनुमितिजनकज्ञानाविरोधित्वादिति मतेनायं कल्पः ।

ननु अत्यन्तान्योन्याभावगर्भव्यापकतयोरेकोपादानेऽन्यतरगर्भव्यभिचारासङ्ग्रहः एकाभावगर्भव्यापकताबुद्धौ अन्यतरगर्भव्यभिचारज्ञानस्य ग्राह्याभावानवगाहितयाऽविरोधित्वादित्यत आह शेषं पूर्ववदिति । अनुमित्यौपयिकसाध्यविशेष्यतानिरूपितप्रकारतात्वेन द्विविधव्यापकत्वप्रकारते अनुगमनीये, प्रातिस्विकरूपेण वा तत्तद्व्यापकताप्रकारकत्वं ज्ञाने निवेशनीयमित्यर्थः । साध्याभाववदवृत्तित्वसाध्यवदन्यावृत्तित्वरूपव्याप्तिद्वयमेवानुमित्यौपयिकं न तु व्यापकताघटितमिति मते हेतौ साध्याभाववद्वृत्तित्वादिकमेव दोषः । न तु साध्यतावच्छेदके हेतवव्यापकतावच्छेदकत्वं परमुखनिरीक्षकत्वात्, तन्मते च उक्तलक्षणे लक्ष्यापरिग्रहोऽलक्ष्यपरिग्रहश्चेति तत्परित्यज्य साध्यात्यन्ताभाववद्वृत्तित्वसाध्यवद्भिन्नवृत्तित्वसंग्राहकं लक्षणमाह साध्यतद्वतोरिति । साध्याभावव्याप्ये हेतुसामानाधिकरण्यादिवारणाय साध्यभावव्याप्यादिव्यावृत्तेनेति । आदिपदात् साध्याभावावच्छेदकपरिग्रहः । तत्र–तादृशाविरोधिताश्रये, यो हेतुसामानाधिकरण्याभावग्रहः तद्विरोधित्वम् तदभावव्याप्यादिव्यावृत्तं त-

तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यतावच्छेदिका सती तद्वत्ताज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यतावच्छेदिका या प्रकारता तदाश्रयत्वम्। तदभावव्याज्ञानप्रतिबन्धकतावच्छेदका या प्रकारता तदाश्रयत्वम्।

उज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यतावच्छेदिका सती तद्वत्ता-

ज्ञानप्रतिबन्धकतावच्छेदका या प्रकारता तदाश्रयत्वम्। तदभावव्या-

प्यवत्ताज्ञानस्य तद्वत्तानिश्चयाप्रतिबध्यतया तद्विषयव्युदासः। वह्नि-

व्याप्यसाध्यकस्थले वह्न्यभावे हेतुसामानाधिकरण्यवारणाय प्रतिब-

न्धकताविवेशः।

अथ घटाभावादेरपि वन्ह्यभावत्वादिना ज्ञानस्य वह्निमत्ताज्ञानवि-रोधित्वात् घटाभावादिसामानाधिकरण्येऽपि वह्न्यादिसाध्यके व्यभिचारः स्यात्, साध्यवत्ताज्ञानविरोधितावच्छेदकीभूतविषयतानिरूपितहेतुसामानाधिकरण्याभावविषयताशालिग्रहाविरोधितानिवेशे चासम्भवः—धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारताया एव साध्यवत्ताज्ञानप्रतिबन्धताचच्छेदकतया साध्याभावो न हेतुसामानाधिकरण इति ज्ञानीयसाध्याभावविषयताया अतथात्वादिति चेन्न।

फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानप्रतिबन्धकता तद्रूपावच्छिन्नांशे हेत्वसामानाधिकरण्यग्रहविरोधितानिवेशेनातिप्रसङ्गाभावात् साध्याभावत्वादेरेव तादृशरूपत्वात्। काञ्चनमयधूमवान् वन्हेरित्यादौ धूमो न काञ्चनमय इति ज्ञानस्यापि साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानविरोधित्वात् काञ्चनमयत्वाभावसामानाधिकरण्येऽतिप्रसङ्गः। साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानत्वेन यद्रूपावच्छिन्नप्रकारकनिश्चयप्रतिबध्यतत्युक्तौ तत्र विशेष्य धूमाभावसामानाधिकरण्यासङ्ग्रहः—धूमत्वावच्छिन्नाभावनिश्चयप्रतिबध्यतावच्छेदककोटौ कांचनमयत्वावषयताया अनिवेशात्। यत्किञ्चिद्धर्मावच्छिन्नविशेष्यताकविशिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यतानिवेशे च धूमो न काञ्चनमय इति ज्ञानप्रतिबध्यतायाः काञ्चनमयत्वविशिष्टधूमादिमत्ताज्ञानत्वव्यापकतया उक्तातिप्रसङ्गस्य दुर्वारत्वेत्यत: फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिवेशः। यद्यपि धूमत्वादेरपि काञ्चनमयत्वादिविशिष्टधूमादिमत्ताज्ञानधर्मितावच्छेदकत्वमक्षतमेव—काञ्चनमयधूमवान् धूम इत्येतादृशज्ञानस्यापि कदाचिदुत्पादात्, तथापि विशिष्टसाध्यवत्तादिज्ञानधर्मितावच्छेदको यो यो धर्मस्तत्तद्धर्मावच्छि-

न्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताः तद्धर्मावच्छिन्नविशेष्यकविशिष्टसाध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदिकाः तद्रूपावच्छिन्नत्वस्य विवक्षितत्वान्नातिप्रसङ्गः। हेत्वसामानाधिकरण्यविषयतानिरूपितसाध्यवत्ताधीविरोधितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नविषयतायाः स्वरूपसम्बन्धरूपं प्रतिबध्यतावच्छेदकत्वमेव निवेश्यम् न त्वनतिरिक्तवृत्तित्वम्, तेनान्योन्याभावघटितव्यभिचारधियोऽत्यन्ताभावघटितव्यभिचारधियश्च प्रत्येकप्रतिबध्यतायास्तादृशविषयितात्वावच्छिन्नव्यापकताविरहेऽपि न क्षतिः। अत एव साधनाप्रसिध्यादावपि नातिप्रसङ्गः–साध्याभावादिविषयतायास्तत्प्रतिबध्यतावच्छेदककोटावनिवेशात्। हेत्वसामानाधिकरण्यविषयतायां च धर्मितावच्छेदकताभिन्नत्वमुपलक्षणविधया निवेश्यम्; तेन धूमासमानाधिकरणवह्न्यभावो न घटसमानाधिकरण इति ज्ञानविरोधिनि धूमासमानाधिकरणवह्न्यभावादौ घटादिसामानाधिकरण्ये नातिप्रसङ्गः।

साध्याभावव्याप्यसाध्याभावावच्छेदकादिसामानाधिकरण्यवारणाय दर्शितप्रकारापेक्षया लघुप्रकारान्तरमाह साध्यवत्तेति। तादृशाभावेति। हेतुसामानाधिकरण्याभावेत्यर्थः। हेत्वाभासतेति। दोषतेत्यर्थः। विशेष्यदलप्रयोजनं स्फुटयति साध्याभावेति। अविरोधित्वात्–अनुमितिजनकज्ञानाविरोधित्वात्। अत्र च प्रकृतानुमितिजनकज्ञानविरोधित्वमेवाभासत्वम्, न तु बाधादिसाधारणगुरुशरीरानुमितिसाधारणोक्तानुगमकप्रकारघटितं तत्प्रयोजनाभावात्। अनुमितिजनकज्ञानस्यापि अनुमितिजनकतावच्छेदककोटिप्रविष्टविषयतावच्छिन्नत्वेन निवेशः, न तु विशिष्टपक्षे विशिष्टसाध्यव्याप्यविशिष्टहेतुवैशिष्ट्यावगाहिज्ञानत्वेन, तथा सत्यत्यन्तान्योन्याभावघटितनानाव्याप्तीनामननुगमेन तादृशनानाविधव्यभिचारसङ्ग्रहासम्भवात्तावद्व्याप्त्यवगाहिसमूहालम्बनानुमितिनिवेशेन तत्सङ्ग्रहसम्भवेपि पक्षधर्मत्वाद्यवगाहितायाः प्रयोजनविरहेण निवेशप्रसङ्गेन तादृशाभावग्रहविरोधित्वविशेषणवैयर्थ्याच्च॥

नन्वेतत्कल्पे धूमाभावव्याप्यासमानाधिकरणवह्निमान् वह्नेरित्यादौ वह्निनिष्ठधूमाभावव्याप्यसामानाधिकरण्यरूपाश्रयासिद्ध्यादावतिव्याप्तिरित्यत आह विरोधित्वमिति। पूर्वोक्तदिशेति। विशि-

ष्टपक्षग्रहाद्यविरोधिज्ञानस्य विषयतयेत्यर्थः ।

यत्तु धूमवान् धूमाभावसमानाधिकरणवन्हेरित्यादौ हेतुतावच्छेदकधूमाद्यभावसामानाधिकरण्यादिविशिष्टवन्ह्यसामानाधिकरण्यस्य धूमाद्यभावेऽनाहार्यज्ञानाप्रसिद्ध्या तत्स्थलीयसाधारण्येऽव्याप्तिरित्याशंकायां विरोधित्वमित्यादिकमवतार्य निर्वन्हिर्वह्निमानित्यादिस्थलीयदोषे सामान्यलक्षणाव्याप्तिवारकपूर्वोक्तप्रकारानुसरणपरतया तद्व्याख्यानम् ।

तन्नशोभनम्–पूर्वमेवंविधैव रीतिः उत्तरत्र सर्वत्र सव्यभिचारादिलक्षणेऽनुसर्त्तव्या इत्यभिधानेनैव पौनरुक्त्यापातात्।नन्वव्यभिचारितत्वविशिष्टसामानाधिकरण्याभावस्याव्यभिचारज्ञानाविरोधित्वादव्याप्तिरित्याशङ्कां तस्यालक्ष्यतामङ्गीकृत्य परिहरति उपदर्शितेति।व्याप्तिग्रहे संशयसाधारणव्यभिचारधियो विरोधित्वात् ज्ञानत्वेन प्रतिबन्धकत्वमेव लक्षणे प्रवेश्यम्, अतो न साधनाप्रसिद्ध्यादावतिव्याप्तिस्तेषां निश्चयस्यैव विशिष्टसाधनादिग्रहे विरोधित्वादित्याशयेन विशिष्टसाधनवत्त्वादिग्रहाविरोधित्वमनिवेश्य लक्षणं कुर्वतां मतमाह व्याप्तिग्रहेति । अत्र व्याप्तिग्रहकारणत्वमेवाभावे निवेश्यम्, न तु तादृशसहचारदर्शनसहकारित्वमव्यावर्त्तकत्वात्।तदभिधानं च सहचारदर्शनस्य यथा व्यापकताप्रत्यक्षे स्वातन्त्र्येण कारणता तादृशी या संशयसाधारणज्ञानाभावकारणता सैवात्र निवेश्या न तु ग्राह्याभावनिश्चयाभावविधया कारणतेति प्रदर्शनाय । व्याप्तिश्च विशिष्यैकैवोपादेया। मणिमन्त्रादिन्यायेन प्रतिबन्धकतामते एकैकविधव्याप्तिज्ञानं प्रत्यपि नानाविधव्यभिचारधियो विरोधित्वाद्धित्यवधेयम् । मणिमन्त्रादिन्यायेन विरोधितायामस्वरसात् केचिदित्युक्तम् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां गादाधर्यां
साधारणप्रकरणम् ।

अथानुमानगादाधर्याम्

असाधारणप्रकरणम् ।

(चि०) सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । ननु सपक्षत्वं न साध्यवन्मात्रत्वम्, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवत्त्वम्, शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः । न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेन्न । सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात्, शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः । न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात् । यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः, शब्दो नित्यः शब्दत्वादिति विरुद्धः, शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक् । तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम्, अन्यथा पक्षत्वभङ्गप्रसङ्गात् ।

(दी०) प्राचां मतेनोत्तरयति न सर्वेत्यादि । सर्वेति विपक्षेऽप्यन्वेति, तेन साध्याभावन्यूनवृत्तेर्व्युदासः । विपक्षत्वस्य निश्चयगर्भत्वात् भूरनित्या गन्धवत्त्वात् नित्यः शब्दः शब्दत्वादित्यादौ नाव्याप्तिः । पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वभ्रमे पुनरसाधारण्यभ्रम एवेति मन्तव्यम् । तथापीति । पक्षत्वं—सन्दिग्धसाध्यकत्वम् ।

(गा०) ननु चिन्तामणिकारमते सत्प्रतिपक्षस्योत्थापकतया असाधारण्यस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न सर्वेत्यादिग्रन्थासङ्गतिरित्यत आह प्राचामिति । साध्याभावन्यूनवृत्तेरिति । पर्वतो वह्निमान् जलत्वादित्यादेरित्यर्थः । तत्रापि घटादिरूपयत्किचिद्विपक्षव्यावृत्तत्वसत्वादिति भावः । ननु भूरनित्या गन्धवत्त्वादित्यादौ पार्थिवपरमाणुरूपविपक्षवृत्तित्वादव्याप्तिरिति विपक्षपदस्य वास्तवसाध्याभाववदर्थकत्वाभिमानमूलामाशङ्कां निराकरोति विपक्षत्वस्येति । ननु पृथिवी रूपवती रसादित्यादिकं जलादेः नीरसत्वभ्रमदशायामसाधारणमेव सपक्षजलादिव्यावृत्तत्वस्य तदानीं हेतौ ग्रहादिति तत्राव्याप्तिर्वास्तवसपक्षजलादिव्यावृत्तत्वासत्वादित्याशंकामलक्ष्यतया परिहरति पृथिवीति ।

मूले तथापीति।तथापि-शब्दे अनित्यत्वनित्यत्वयोःसाध्यतायां शब्दत्वस्य सद्धेतुत्वविरुद्धत्वेपि।साध्यतदभावेति। हेतुमति पक्षे साध्यानिश्चयेन व्याप्तिग्रहाभावात्सद्धेतावपि तत्र साध्याभावानिर्णयेन साध्याभावव्याप्यत्वरूपविरोधस्याग्रहेण विरुद्धहेतावप्यसाधारण्यदोषत्वं युक्तमेवेत्यर्थः । अन्यथा-तदानीमपि साध्यतदभावान्यतरानिश्चये ।

ननु सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतायाः साध्यनिश्चयदशायामपि सिषाधयिषासत्त्वे बाधनिश्चयदशायामपि चाक्षतत्वान्न तद्भङ्गप्रसङ्ग इत्यत आह दीधितौ पक्षत्वमिति ।

(चि०) अथ सर्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात् प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात् । न च संशायकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यम् । व्याप्तिग्राहकं सहचारज्ञानं (१)तदभावद्वारेण सपक्षव्यावृत्तिमात्रस्य दोषत्वात् ।

(दी०) मतं दूषयति अथेत्यादि । व्याप्तीति । तथाच स्वतो दूषणाक्षमत्वान्नाभासत्वम् उपाधिवदिति भावः । एकध-

(१) तदभावद्वारैवेति गदाधरभट्टाचार्याभिमतः पाठः किन्तूपलब्धचिन्तामणिपुस्तकेषु सर्वत्रायमेवोपलभ्यत इति न धृतः ॥

सिंव्यावृत्तत्वञ्च न सामानाधिकरण्यग्रहविरोधि धर्म्यन्तरे तत्सम्भवात्, अन्यथा सतोरपि साध्यसाधनयोर्व्यतिरेकित्वं दोषाय स्यात् ।

अथायं शङ्कितुरभिप्रायः-पक्षे साध्याभावस्य संशयो निश्चयश्चानुमितिविरोधी विरोधिविषयकत्वात्, तत्सामग्री च विरोधिसामग्रीत्वेन, तत्रादिमस्य सामग्रीपक्षे सव्यभिचारस्य हेतोर्ग्रहः द्वितीयस्य तु प्रतिहेतोः परामर्शः अतस्तयोराभासत्वम् । अत एव सव्यभिचारलक्षणे पक्षवृत्तित्वं विशेषणम् साध्याभाववद्वृत्तित्वमात्रं पुनरसिद्धिरेवेति विरोधान्यस्य परामर्शविरोधिनो रूपस्य तत्त्वादिति ।

मैवम् । बाधसंशयस्य प्रतिबन्धकत्वानङ्गीकारात् साधारणधर्मवत्ताज्ञानस्य संशयसामग्रीत्वाभावात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च । अन्यथा पक्षस्य साध्यतदभाववद्वृत्तिप्रमेयत्वादिमत्त्वं सर्वत्र हेत्वाभासीभवेत्, तथा कामिनीजिज्ञासाप्रयोजकं तज्ज्ञानेष्टसाधनत्वादिकमपि ॥

(गा०) मणिकारमते विपक्षव्यावृत्तेरसाधारण्याघटकतया तन्मते अथेत्यादिना तस्यादूषणोपयोगितानिराकरणमसंगतम् इति तद्घटितासाधारण्यवादिप्राचीनमतदूषणपरतया तत्सङ्गमयात मतमिति । प्राचामित्यादि ।

मूले दोष इति । दोषविधयोद्भाव्य इत्यर्थः । तस्या-विपक्षव्यावृत्तेः, अनुगुणत्वात्-प्रकृतसाध्यसिद्ध्यप्रतिकूलोद्भावनकत्वात्, प्रत्युत विपक्षव्यावृत्तत्वेनोपन्यस्तं लिङ्गं व्यतिरेकिमुद्रया प्रकृतसाध्यसाधकमेव स्यात्, तथाच परार्थस्थलेऽपि विपक्षव्यावृत्तत्वसहितं सपक्षव्यावृत्तत्वमनुद्भाव्यत्वेन नासाधारण्यदोष इति भावः ।

केवलसपक्षव्यावृतत्वं कोटिद्वयानुपस्थापकत्वेन न साध्यसंशायकं किन्तु मिलितमेवेति दोषतया मिलितमेवोद्भाव्यमित्याशंकते नचेति । संशायकमसाधारण्यं यद्यपि विपक्षव्यावृत्तत्वघटितम्

तथापि तादृशस्य दोषत्वं नोपपद्यते विरोधिज्ञानविषयस्यैव दोषत्वात् विपक्षव्यावृत्तत्वांशज्ञानस्य चाविरोधित्वादित्याशयेनाह व्याप्तीत्यादि। तदभावद्वारेण-तदभावप्रयोजकज्ञानविषयतयैव-एवकारेणानुमितितज्जनकज्ञाने साक्षाद्विरोधिविषयत्वव्यवच्छेदः। तद्व्यवच्छेदफलं दीधितिकृदेव स्फुटयति तथाचेति। स्वतो दूषणाक्षमत्वात्-अनुमितौ तत्कारणज्ञाने च साक्षादविरोधित्वात्, नाभासत्वं सपक्षव्यावृत्तत्वस्यापि न हेत्वाभासत्वम्। एतेन विपक्षव्यावृत्तत्वस्य दूषणानुपयोगित्वे तदंशपरित्यागेनैव हेत्वाभासता स्वीकार्येति निराकृतम्। एवं च स्वार्थानुमानेऽपि सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमित्यग्रिममूलस्यापि स्वार्थानुमानेपि विपक्षव्यावृत्तेर्दूषणानौपयिकत्वं सपक्षव्यावृत्तत्वस्य सहचारधीविरोधितया तथात्वेऽपि न हेत्वाभासत्वमित्युक्तमित्यर्थो बोध्यः।

ननु सहचारग्रहविरोधित्वे व्याप्तेः सहचारघटिततया तद्ग्रहेपि साक्षाद्विरोधित्वमेव तस्येति न कथं हेत्वाभासत्वमित्याशङ्कां परिहरति एकधर्मिव्यावृत्तत्वं चेति। निश्चितसाध्यवद्व्यक्तिवृत्तित्वाभावश्चेत्यर्थः। सामानाधिकरण्येति। साध्यवद्वृत्तित्वसामान्येत्यर्थः। धर्म्यन्तरे-साध्यवद्व्यक्त्यन्तरमन्तर्भाव्य, तत्सम्भवात्—साध्यसामानाधिकरण्यग्रहोदयात्। इदमुपलक्षणम्। साध्यवत्त्वरूपसामान्यधर्मपुरस्कारेण तद्धर्मिणमन्तर्भाव्यापि तत्सम्भवो द्रष्टव्यः। तथाच तत्तद्धर्मिव्यावृत्तत्वरूपविशेषाभावग्रहस्य प्रत्येकं साध्यसामानाधिकरण्यसामान्यग्रहाविरोधित्वे तादृशविशेषाभावकूटात्मकासाधारण्यग्रहस्यापि तदविरोधित्वान्न तस्य सामानाधिकरण्यसामान्यघटितव्याप्तिज्ञाने साक्षाद्विरोधित्वमिति भावः। अन्यथा—यत्किञ्चिदधिकरणान्तर्भावेन सामानाधिकरण्यग्रहविरोधिनोपि दोषत्वे, सतोः-समीचीनयोः साध्यसाधनयोः वह्निधूमाद्योः, व्यतिरेकित्वं-ह्रदाद्यवृत्तित्वम्। दोषाय स्यादिति। तस्यापि ह्रदाद्यन्तर्भावेन सहचारग्रहविरोधित्वादिति भावः।

संशायकतया विपक्षव्यावृत्तत्वघटितासाधारण्यस्य दोषत्वं शङ्कितुः संशायकज्ञानस्यानुमितिं प्रति साक्षात्प्रतिबन्धकत्वमभिप्रेतम्, अन्यथा शङ्काया अतितुच्छतापत्तेः, तादृशगूढाभिप्रायमबुद्ध्वैव च 'व्याप्तिग्राहक'मित्यादिना तादृशस्य दोषत्वं मणिकारो निराकार्षीदतो

न्यूनताभङ्गाय तादृशाभिप्रायमाशंक्य निराकुरुते अथायमित्यादिना । निश्चयश्चेति दृष्टान्तार्थम् । विरोधिसामग्रीत्वेन-विरोधिज्ञानसामग्रीत्वेन, विरोधिनीति लिङ्गविपरीतेनान्वयः । आदिमस्य-संशयस्य, सव्यभिचारस्य-साधारण्येनासाधारण्येन वा विशिष्टस्य, द्वितीयस्य-साध्याभावनिश्चयस्य, प्रतिहेतोः-साध्याभावव्याप्यस्य, परामर्शः-पक्षे परामर्शः, तयोः-तादृशग्रहविषयव्यभिचारसत्प्रतिपक्षयोः, अत एव-व्यभिचारस्य संशायकतया दोषत्वादेव, पक्षवृत्तित्वं विशेषणं यथाश्रुतमेव सम्यगिति शेषः । पक्षावृत्तेः पक्षे साध्यसंशयाप्रयोजकतया पक्षवृत्तित्वे सतीत्यादिलक्षणस्याप्युक्तरीत्या व्यभिचारस्य दूषकतापक्षे एवोपगमात्तदलक्ष्यत्वेन तत्राव्याप्त्यप्रसञ्जकत्वात् इति भावः । एवं च यद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन साध्यवत्तानिश्चयत्वावच्छिन्नं प्रति प्रतिबन्धकता पक्षवृत्तित्वे सति तद्रूपवत्त्वं तादृशलक्षणार्थः । साध्याभावव्याप्यवत्ताज्ञानस्य न निश्चयत्वं प्रतिबध्यतावच्छेदकमिति न सत्प्रतिपक्षातिव्याप्तिः । वन्ह्यभावत्वाद्यवच्छिन्नवत्ताज्ञानस्यापि निश्चयत्वेन प्रतिबन्धकता न निश्चयत्वावच्छिन्नं प्रति अतो न ह्रदो वह्निमान् वन्ह्यभावादित्यादावतिप्रसङ्ग इत्यवधेयम् । नन्वेवं पक्षवृत्तित्वेन साध्यवद्वृत्तित्वेन चाघटितस्य साध्याभाववद्वृत्तित्वस्य व्याप्तिज्ञानविरोधितया हेत्वाभासस्याधिक्यापत्तिर्व्यभिचारानन्तर्भावादित्यत आह साध्याभावेति ।

असिद्धिरेवेति । व्याप्यत्वासिद्धिरेवेत्यर्थः । तत्त्वादिसिद्धित्वात् । यद्यपि परामर्शविरोधित्वं साधारण्यस्यापि साध्याभाववद्वृत्तित्वांशघटितत्वात् अक्षतमेव, तथापि मेयत्वादिविशिष्टासिद्धावतिप्रसङ्गभंगाय तादृशविरोध्यन्तराघटितत्वनिवेशस्यावश्यकत्वान्नातिप्रसङ्गः ।

प्रतिबन्धकत्वानङ्गीकारादिति । निश्चयत्वस्यार्थसमाजग्रस्ततया संशयानन्तरमसति विशेषदर्शने निश्चयत्वावच्छिन्नापत्तेरयोगादिति भावः । तथा च संशयसामग्र्या अपि प्रतिबन्धकत्वमसिद्धमिति भावः । संशयसामग्र्याः प्रतिबन्धकत्वमभ्युपेत्य दूषयति साधारणधर्मवत्ताज्ञानस्येति । तन्मात्रस्येत्यर्थः । ननु तन्मात्रे सामग्रीत्वपर्याप्तिविरहेऽपि प्रतिबन्धकसामग्रीघटकत्वेन तस्य प्रतिबन्धकत्वमव्याहतमेवेत्यत आह सामग्रीत्वेनेति । सामग्र्यन्तर्गततयेत्यर्थः । हेत्वाभासत्वायोगादिति । तद्विषयस्येत्यादिः । यादृशविशिष्टविषयकनिश्चय-

त्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वमेव हेत्वाभासत्वम् प्रतिबन्धकसामग्रीघटकज्ञानविषयसाधारण्यादिश्च न तथा विशेषदर्शनादिकालीने अप्रतिबन्धकीभूतज्ञानेपि तद्विषयकनिश्चयत्वसत्त्वादिति भावः । अन्यथा-यथाकथंचिल्लक्षणं परिष्कृत्य प्रतिबन्धकसामग्रीघटकज्ञानविषयस्य हेत्वाभासत्वोपपादने, मेयत्वादिहेतौ साध्यतदभावसहचरितमेयत्ववान् पक्ष इत्यादिज्ञानविषयस्य दोषताया इष्टत्वात् । सर्वत्रेति । तथाच धूमादिहेतौ तस्यादोषत्वेन नेष्टापत्तिसम्भव इति भावः । आभासीभवेदिति । धूमादिहेतुकानुमितावपि तज्ज्ञानस्य संशयसामग्रीत्वेन प्रतिबन्धकत्वादिति भावः । विरोधिज्ञानसामग्रीविधया यज् ज्ञानं प्रतिबन्धकं तत्राभासतामापाद्य विरोधिजिज्ञासासामग्रीविधया प्रतिबन्धकस्य विषये तामापादयति तथेति । प्रयोजकत्वं-जनकज्ञानविषयत्वम् ॥

(चि०)किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यं न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च । न च न्यूनत्वे तदुपजीव्यम्, असाधारण्यव्यतिरेकेणापि तदुद्भावनात् । न च व्यतिरेकिप्रयोगे तदुपन्यासः, व्याप्तिपक्षतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात् स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति ॥

(दी०) एवं विशिष्टस्यानुद्भाव्यत्वं व्युत्पाद्य केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किञ्चेति । वाय्वुपदर्शितदृष्टान्तस्य साधनवैकल्यन्तु नासाधारण्यम्, सपक्षान्तरवृत्तित्वेऽपि तत्सम्भवात् । तदुद्भावनन्तु तस्य निग्रहस्थानत्वात्, विभाजकसूत्रस्थानुक्तसमुच्चायकचकारेण तस्य समुच्चितत्वात् तदुदाहरणस्याभासताप्रदर्शनार्थैव वा, आवश्यकश्च प्राचां दृष्टान्तप्रयोग इति भावः । माभूत् परार्थानुमानेऽसाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेति ।

(ग०) विपक्षव्यावृत्तत्वस्य व्याप्तिपक्षधर्मताग्रहाविरोधित्वेनानुद्भावनीयतायाः प्रागेव व्यवस्थापितत्वात् किञ्चेत्यादिग्रन्थस्य तत्परत्वं न घटते पौनरुक्त्यप्रसङ्गात् । न च पूर्वं अन्वयिनि दृष्टान्तासम्भवेन न्यूनताया आवश्यकतया न तदुद्भावनं निराकृतमिति न पौनरुक्त्यप्रसङ्ग इति वाच्यम् । एवमपि व्यतिरेकिणि व्याप्तिपक्षधर्मत्वाप्रतिक्षेपकतया तदुद्भावननिराकरणपौनरुक्त्यस्य दुर्वारत्वादित्यतः केवलसपक्षव्यावृत्त्युद्भावननिराकरणपरतया किञ्चेत्यादिमूलमवतारयति एवमिति । एवं–उक्तप्रकारेण, विशिष्टस्य–विपक्षव्यावृत्तत्वविशिष्टस्य । ननु साधनविकलस्यापि घटादेः विशेषादर्शनदशायामिव विशेषदर्शनदशायामप्याहार्य्यसाधनवत्त्वभ्रमादिना दृष्टान्तविधया उपन्यासः सम्भवत्येवेति तत्र न्यूनताविरहेणासाधारण्योद्भावनसार्थक्यम् , न च तत्र दृष्टान्तस्य साधनवैकल्योद्भावनेनैव वादिनिवृत्तिसम्भवादसाधारण्यस्य दोषत्वमनावश्यकमिति वाच्यम् , दृष्टान्तस्य निश्चितसाध्यवतः साधनवैकल्यस्यैवासाधारण्यत्वादित्याशङ्कां निरस्यति वाद्युपदर्शितेति । यावन्निश्चितसाध्यवति साधनवैकल्यमसाधारण्यमेवेति वादुयुपदर्शितत्वाभिधान एकदेशे साधनवैकल्यस्य यावति साधनवैकल्यानतिरिक्ततया तस्यासाधारण्यत्वनिषेधासङ्गतेस्तदुद्भावनपर्य्यन्तमसाधारण्योद्भावनत्वप्रतिषेधः । सपक्षान्तरवृत्तित्वे पीति । हेतोरिति शेषः । तत्सम्भवात्-वादुयुपदर्शितस्य दृष्टान्तस्य साधनवैकल्यसम्भवात् । नन्वेवं दृष्टान्तस्य साधनवैकल्यं हेत्वाभासबहिर्भूततया क्वापि नोद्भाव्येतेत्यत आह तदुद्भावनं त्विति । ननु 'प्रतिज्ञाहानिः प्रतिज्ञान्तर'मित्यादिनिग्रहस्थानविभाजकसूत्रेऽस्यागणनान्न निग्रहस्थानतेत्यत आह विभाजकेति । आभासताप्रदर्शनायैव तदुद्भावनमित्यनुषङ्गेनान्वयः । आभासता–बाधितसाधनवत्त्वार्थकता, सा चापार्थकत्वरूपनिग्रहस्थानमिति भावः । ननु यथा घट इत्यादि दृष्टान्तप्रयोगस्य समयबन्धाधीनत्वेनानियतत्वात् यत्र तच्छून्यमेवोदाहरणं प्रयुक्तं तत्रैवासाधारण्यमुद्भावनीयमित्यत आह आवश्यकश्चेति । तथाच तदप्रयोगे न्यूनत्वमेवेति भावः ॥

इति गादाधर्यामसाधारणपूर्वपक्षग्रन्थः ॥

(चि०) उच्यते। शब्दत्वं साध्यवतस्तदभावतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभावञ्च साधयेत्—अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः। सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेदः। असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वम्। त्रमुद्भाव्यं साध्याभावोत्थापकत्वात्, न विपक्षव्यावृत्तत्वमपि प्रतिकूलत्वात् व्यर्थत्वाच्च।

यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया वा तदुद्भावनमपि। लक्षणन्तु सर्वसपक्षव्यावृत्तत्वम् न तु विपक्षव्यावृत्तत्वमपि व्यर्थविशेषणत्वात्। विरुद्धमप्यनेनोपाधिनाऽसाधारणमेव। अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः॥

इत्यसाधारणचिन्तामणिः॥

(दी०) स्वमते सिद्धान्तमुपक्रमते उच्यत इति। अर्थादिति। व्यतिरेकिमुद्रया अर्थादुभयं साधयेत्, अर्थवशसम्पन्नमेवोभयसाधकत्वम् उभयसिद्ध्यनुकूलव्याप्त्यादिग्रहादित्यर्थः। व्यतिरेकितया वेति पाठे अर्थात् अर्थापत्तिविधयेति परमतेन। एवञ्च पक्षधर्म्मतया ज्ञायमानो हेतुः साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानाच्च

साध्याभावस्य साधनायोन्मुखो मिथो विरोधेन नैकमपि साधयति । न च शब्दे नित्यत्वानित्यत्वसन्देहे तदुभयव्यापकत्वं शब्दत्वाभावस्य ग्रहीतुमशक्यम्—व्यापकत्वाभिमतशब्दत्वाभावाभाववच्छब्दवृत्तित्वस्य नित्यत्वानित्यत्वयोः सन्दिह्यमानत्वादिति वाच्यम्। तथात्वेऽपि तादृशसंशयाभावदशायां तथात्वनिश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसन्धातुं शक्यत्वात् । स्वाश्रयमप्रतीत्यैव प्रतीतस्य सौरभादेरभावस्य पानीयपाषाणादौ पृथिवीत्वतदभावसहचारेण तदुभयव्यापकताग्रहे तादृशाभावप्रतियोगिसौरभस्य चन्दनादौ परामर्शे पृथिवीत्वादौ साध्ये तदसाधारण्यस्यातिसुलभत्वाच्च ।

नन्वयं सत्प्रतिपक्ष एव व्याप्तेरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वादित्यत आह सत्प्रतिपक्ष इति । न चैवंविधभेदेन पृथगभिधानेऽतिप्रसङ्गः, स्वतन्त्रेच्छाया इत्यादेर्ग्रन्थकृतैवाभिधानात् तदभावसाधके तत्साधकत्वभ्रमरूपाशक्तिविशेषसूचनार्थत्वाच्च ।

सत्प्रतिपक्षसव्यभिचारोभयलक्षणाक्रान्ततया उभयान्तर्भावस्याविरुद्धत्वादित्यपि कश्चित् ।

सर्वसपक्षेति । सपक्षः—साध्यवान्, पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमित्यर्थः, इदञ्च साक्षादनुमितिविरोधि, विरोधश्च साध्यासामानाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहविरोधीति न साङ्कर्यशङ्कापि । साध्यसामानाधिकरण्यन्तु नासाधारणम्। दशाविशेषे तद्भ्रमस्तु पुरुषदोषो व्याप्य इव साधारण्यभ्रमः।

(गा०) मूले ज्ञातमित्यस्य पक्ष इत्यादि । व्यतिरेकितयेत्यनन्तरं वाकारासत्त्वे अर्थादित्यस्यार्थपत्तिविधयेत्यर्थो न संगच्छते अर्थापत्तिव्यतिरेक्यनुमानोभयविधया साधकत्वस्यैकमतेऽसम्भवादित्यतो अन्यथा तद्व्याचष्टे अर्थादितीति । व्यतिरेकित्वे अर्थाधीनत्वान्वयभ्रमं

२१७

निराकर्त्तुं व्यत्यस्य योजयति व्यतिरेकिमुद्रया अर्थादिति । साधयेदिति सम्भावनायां लिङ् । सिध्युपधानसंभावना च योग्यताधीना इत्यर्थतः सा लभ्यत इत्याशयेन व्याचष्टे अर्थवशेति । उभयसाधकत्वम्-उभयसिद्धियोग्यत्वम् परस्परसिद्धिसामग्रीरूपपरस्परसिद्धिप्रतिबन्धकाभावातिरिक्तउभयसिद्धिसामग्रीसमवधानमिति यावत् । मूले ज्ञातमित्यन्तं हेतुगर्भविशेषणमिति स्फुटयति उभयेति । मूले अन्यथेति । साध्यतदभावव्यापकीभूताभावप्रतियोगित्वेन ज्ञातस्य विरोधिसामग्र्यतिरिक्तप्रतिबन्धकासमवहितस्य हेतोर्विरोधिसमग्र्यभावातिरिक्तसाध्यतदभावसिद्धिसामग्र्यसमवहितत्वे । पक्षवृत्तित्वानुपपत्तिरिति । पक्षवृत्तितया ज्ञातत्वानुपपत्तिरित्यर्थः । 'इति साध्यतदभावोत्थापकतया असाधारणो दोष' इति मूलार्थं दीधितिकृत् व्याचष्टे एवं चेत्यादिना । तत्र साध्यतदभावसाधनोन्मुखत्वमुक्ततत्तत्सिद्धिसामग्रीसमवहितत्वम् एतदेव च साध्यतदभावोत्थापकत्वार्थः । साध्यतदभावव्यापकीभूताभाप्रतियोगित्वज्ञानयोर्मिलितयोस्तदुभयसिद्धिसामग्रीत्वशङ्कानिराकरणाय साध्यतदभावव्यापकीभूताभावप्रतियोगित्वज्ञानात्तदुभयसाधनायोन्मुख इति संक्षेपाक्तिरुपेक्षिता । विरोधेन-परस्परविरोधेन । नैकमपि साधयतीति । असाधारण इति शेषः । एवं चासाधकत्वमेव हेतोर्दोषत्वमित्यवधेयम् । संदेहे-सन्देहदशायाम् । व्यापकत्वेति । उभयव्यापकतया ग्राह्यस्य शब्दत्वाभावस्य योऽभावः शब्दत्वं तद्वद्वृत्तित्वरूपस्य व्यभिचारस्येत्यर्थः । सन्दिह्यमानत्वादिति । उक्तसंशयेन विषयीकरणादित्यर्थः । आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वादिति भावः । एतच्च व्याप्यधर्मिकव्यापकाभाववद्वृत्तित्वज्ञानमेव व्यापकताग्रहप्रतिबन्धकमित्यभिमानेन । वस्तुतस्तु तादृशज्ञानवद्व्यापकाभाववद्धर्मिकव्याप्यवत्ताज्ञानमपि प्रतिबन्धकम्-असमानप्रकारकत्वस्याविशेषादिति कथितसंशये शब्दवृत्तितया नित्यत्वानित्यत्वसंशयाभावदशायां घटगगनादौ शब्दत्वाभावे प्रत्येकमुभयसहचारज्ञानात्तथात्वनिश्चये शब्दत्वाभावे उभयव्यापकतानिश्चये सति तज्जन्यसंस्कारात् शब्दे साध्यसन्देहदशायामपि तादृशव्यापकताद्वयस्मरणेऽव्यापकत्वभानासम्भवेन व्यापकीभूताभावप्रतियोगिशब्दत्वस्य शब्दे प्रतिसन्धातुं निश्चेतुं शक्यत्वादित्यर्थः । गगनघटा-

दौ शब्दत्वाभावे नित्यत्वतदभावोभयसाहचर्य्यग्रहः शब्दत्वोपस्थितावेव सम्भवति शब्दत्वजातिप्रतीतौ व्यक्तिभानं नियतमिति शब्दे नित्यत्वतदभावसंशयजनकं धर्मिज्ञानमेकतरकोट्युपस्थितिश्च वर्तते अपि तु कारणान्तराभावादेव तत्र संशयविरहः, अतो यत्साध्यहेतुके हेत्वभावे साध्यतदभावयोः साहचर्यं गृह्यमाणे हेतुमतो धर्मिण उपस्थित्यनैयत्यं तत्र धर्मिज्ञानाभावादेव न हेतुमति साध्यतदभावसंशय इति तादृशस्थले हेत्वभावे साध्यतदभावव्यापकताग्रहसौकर्य्यमाहाश्रयमिति । सहचारेण–सहचारग्रहेण । तादृशाभावेति । पृथिवीत्वतदभावव्यापकताविशिष्टाभावेत्यर्थः । पृथिवीत्वादौ साध्य इति । चन्दनं पृथिवी सौरभादित्यादावित्यर्थः । असाधारण्यस्य–असाधारण्यग्रहस्य ।

अयं–साध्यतदभावव्यापकीभूताभावप्रतियोगितया गृह्यमाणो हेतुः । सत्प्रतिपक्ष एवेति । विरोधिव्याप्तिपक्षधर्मताज्ञानप्रतिबन्ध्यकार्य्यकत्वात् इति भावः । तथा च नासाधारण्यस्य स्वतन्त्रहेत्वाभासतेति भावः । ननु विरोधिव्याप्तेरन्वयव्याप्तित्वं सत्प्रतिपक्षताप्रयोजकमिति नात्र सत्प्रतिपक्षतेत्यत आह व्याप्तेरिति । अन्वयनिरूपितत्वस्य–साध्यसाधनोभयनिरूपतत्वस्य, अव्यापकत्वेन–व्यतिरेकिना हेत्वन्तरेण यत्र सत्प्रतिपक्षता तत्स्थलसाधारण्याभावेन एवंविधेति । यत्र हेत्वन्तरेण प्रतिरोधस्तत्र सत्प्रतिपक्षता यत्र च स्वेनैव स्वकार्यप्रतिरोधस्तत्र तदन्यहेत्वाभासतेत्यभिधान इत्यर्थः । अतिप्रसङ्गः–यत्रान्वयिना हेत्वन्तरेण प्रतिरोधः स सत्प्रतिपक्षः यत्र च व्यतिरेकिणा हेत्वन्तरेण प्रतिरोधः स हेत्वाभासान्तरमित्यादिप्रसङ्गः । तदभावसाधक इत्यादेः प्रकृते पृथगभिधानस्य इत्यादिः । अशक्तिविशेषोऽतिशयिता शक्तिः ।

उभयलक्षणाक्रान्ततयोभयान्तर्भावस्येति । यथा सत्प्रतिपक्षलक्षणाक्रान्ततया सत्प्रतिपक्षता तथा सव्यभिचारलक्षणाक्रान्ततया तथात्वस्यापीत्यर्थः । अविरुद्धत्वादिति । तथाच तस्य सव्यभिचारसामान्यलक्षणाक्रान्ततया सव्यभिचारमध्येऽवश्यं विभजनीयतया साधारणानुपसंहारिभिन्नस्य शब्दो नित्यः शब्दत्वादित्यादेरसाधारणत्वेन विभजनं युक्तमेवेति भावः । कश्चिदित्यस्वरसः । स चासाधारण्यसत्प्रतिपक्षपार्थक्यप्रयोजकदर्शितबीजमनादृत्य सत्प्रतिपक्षान्तर्भा-

वस्वीकारे व्याप्तिज्ञानविरोधित्वघटिततद्व्यावृत्तसाधारण्यसङ्ग्राहकसव्यभिचारसामान्यलक्षणस्यैव सम्भवेन प्रयासेन समूहालम्बनानुमितिविरोधिताघटिततत्साधारणसव्यभिचारसामान्यलक्षणकरणस्य निर्युक्तिकतया तस्य सव्यभिचारान्तर्भावासम्भवात् ।

सपक्षपदस्य निश्चयगर्भार्थकत्वे सत्प्रतिपक्षोत्थापकता न सम्भवति व्याप्तिज्ञानागर्भत्वादित्यतस्तद्व्याचष्टे सपक्ष इति । पक्षवृत्तित्वाविशेषितस्य हेतौ केवलसाध्यव्यापकीभूताभावप्रतियोगित्वस्य यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायेत इत्यादिरीत्या सव्यभिचारसामान्यलक्षणाक्रान्तत्वेऽपि अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकत्वाभावेन न हेत्वाभाससामान्यलक्षणाक्रान्तत्वम् । अनुमितिविरोधिताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्तिविषयिताकत्वरूपं प्रतिबन्धकतानतिरिक्तवृत्तित्वं सामान्यलक्षणे निवेश्य हेत्वाभाससामान्यलक्षणाक्रान्तत्वसम्पादनसम्भवेऽपि तादृशप्रयासे गौरवमतोऽसाधारण्यशरीरे पक्षवृत्तित्वमन्तर्भावयति पक्षवृत्तित्वे सतीति । यद्यपि सव्यभिचारसामान्यलक्षणस्य यद्यद्धर्मिवृत्तित्वमित्यादिना बाधादिसाधारण्यवारणप्रकारो न सम्भवति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मविशेषनियन्त्रितत्वात्, तादृशरीत्यादरे निरुक्तासाधारण्यस्यैवासङ्ग्रहापत्तेः, तथापि प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिप्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाननिरूपिता या निरुक्तासाधारण्यविषयकत्वानवच्छिन्नप्रतिबन्धकता तच्छून्यत्वे सति समूहालम्बनानुमितिविरोधित्वस्य बाधप्रतिरोधव्यावृतस्य निरुक्तासाधारण्यसाधारणस्य सव्यभिचारसामान्यलक्षणत्वसम्भवात् ।

ननु साध्यवद्व्यावृत्तत्वं यदि तद्भेदवृत्तित्वं तदा शब्दो नित्यः श्रोत्रग्राह्यत्वे सति गुणत्वादित्यादौ विशिष्टस्य गुणत्वादेः केवलानतिरिक्ततया नित्यत्ववदवृत्तित्वं नोपपद्यते इत्यव्याप्तिः, एवं साध्यवदवृत्तित्वं सामानाधिकरण्यग्रहविरोधितया व्याप्तिग्रहविरोध्येव इति न सत्प्रतिपक्षोत्थापकमतो व्याचष्टे साध्यव्यापकेति । विरोधरूपोपाधेः साध्याभावव्याप्यतारूपत्वे सोऽपि साध्यव्यापकीभूताभावप्रतियोगित्वमिति सङ्कर इत्याशङ्कां निराकरोति साध्यासामानाधिकरण्यादीति । हेतुनिष्ठसाध्यासामानाधिकरण्यादीत्यर्थः । आदिना साध्यनि-

ष्टहेत्वसामानाधिकरण्यपरिग्रहः । नन्वेवं विरोधस्य विरोध्यविषयत्वेनानुमित्यविरोधितया न दोषतां स्यादित्यत आहान्वयव्याप्तीति । साध्यहेतुसामानाधिकरण्यघटितव्याप्तीत्यर्थः । पक्षवृत्तित्वप्रवेशानिवेशाभ्यामपि भेदसम्भवात् शङ्कापीत्युक्तम् । शब्दोऽनित्यः शब्दत्वादित्यादौ वास्तवसाध्यवद्व्यावृत्तत्वाभावेनाव्याप्तिशङ्कामलक्ष्यतया परिहरति साध्यसामानाधिकरण्यं त्विति ।

ननु दर्शितस्थलेऽपि दशाविशेषेऽसाधारण्यज्ञानेनानुमित्यनुत्पादाद्धेतोर्दुष्टताया आवश्यकत्वे कथमलक्ष्यत्वमित्यत आह दशाविशेष इति । तद्भ्रमः—असाधारण्यभ्रमः, पुरुषदोष एव न तु तत्र हेतोर्दुष्टतेत्यर्थः । प्रतिबन्दिसूचनाय दृष्टान्तमाह व्याप्य इवेति ॥

(दी०) नवीनाः पुनरेवं वर्णयन्ति । सामग्रीद्वयविरोधेन हेत्वभावस्य साध्यतदभावव्यापकताग्रहविरोधोऽसाधारणस्य दूषकताबीजम् तथाहि—वृत्तिमता हेतुना क्वचिदपि वर्त्तितव्यम् तत्र चावश्यं साध्यतदभावयोरन्यतरेण भवितव्यम् । न च तत्र हेत्वभावः सम्भवति, अतोऽवश्यमन्यतराव्यापकत्वं तस्य, एवंविधविरोधध्रौव्ये साध्येन तदभावेन च हेत्वभावस्य सहचारज्ञानं नैकतरनिरूपितमपि व्यापकतां ग्राहयति मिथो विरोधात्, विरोधिपरामर्शद्वयमिव साध्यतदभावौ, एवञ्च वृत्तिमत्त्वविशेषितं हेतोर्यावद्विपक्षसपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्वविशेषितं वा हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति । योजयन्ति च ग्रन्थमित्थम् शब्दत्वं यदि साध्यतदभाववद्व्यावृत्तत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयोग्यं स्यात् तद्वत् स्यादिति यावत्, तदा व्यतिरेकितया तादृशव्यतिरेकप्रतियोगित्वेनार्थात् पक्षे तदुभयं साधयेत् तदुभयसहचरितं भवेत्, व्यापकाभाववति व्याप्याभावस्यावश्यम्भावात् अतथाभावे पक्षधर्म्मताया व्याप्तेर्वानुपपत्तिः । न च तथाभावः सम्भवति, न वा पक्षवृत्तित्वं बाधितम् अतः साध्यतदभावोत्थापकतया तदुभयसिद्ध्य-

नुकूलविरोधि व्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतया असाधारणो दोषो व्याप्तिद्वयग्रहप्रतिबन्धकः । ननु यदि विरोधिव्याप्तिद्वयं न गृह्यते तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतुसमुत्सत्वात् तस्येत्यत आह सत्प्रतिपक्ष इति । तत्र-हेत्वोर्भिन्नतयाधिकरणभेदेन तथा ग्रहः सम्भवति अत्र पुनरेकस्मिन् हेतौ तदुभयग्रहो विरुद्ध इत्यर्थः ।

(गा०) मिश्रव्याख्यानमुपन्यस्यति नवीना इति । सामग्रीद्वयविरोधेनेति । हेत्वभावे साध्यतदभावव्यापकताग्राहकसामग्र्योः परस्परजन्यफलप्रतिबन्धकत्वेनेत्यर्थः। ग्रहविरोधो-ग्रहानुत्पादः, असाधारणस्य-हेतोःदूषकतायां बीजं-अनुमित्यनुत्पादकतायां बीजम्। व्यापकतयोर्विरोधे एव परस्परग्राहकसामग्र्योः परस्परग्रहप्रतिबन्धकत्वं सम्भवतीति विरोधमेवोपपादयति तथाहीति । क्वचिदधिकरणे वर्तितव्यमिति। वृत्तेरधिकरणनिरूपितत्वनियमादिति भावः। तत्र च-तदधिकरणे च, साध्यतदभावयोरन्यतरेण भवितव्यं-स्थातव्यम्, प्रतियोग्यभावयोरेकासत्त्वे अपरसत्त्वनियमादिति भावः। तत्र-अधिकरणे, न हेत्वभावः सम्भवति प्रतियोगिवृत्त्या विरोधादिति भावः । अतो-हेत्वभावस्य तत्रासत्त्वात्,अन्यतराव्यापकत्वं-साध्याव्यापकत्वसाध्याभावाव्यापकत्वयोरन्यतरत्वम्,तस्य-हेत्वभावस्य,तयोर्मध्ये हेत्वधिकरणे यस्य स्थितिस्तद्व्यापकतायास्तदभावेऽसम्भवादिति भावः । एवंविधविरोधध्रौव्ये-एवंरीत्या नित्यत्वतदभावव्यापकतयोः शब्दत्वाभावादावेकसत्त्वेऽपरासत्त्वनियमे। सहचारज्ञानमिति। व्यापकताग्रहकारणीभूतं गगनघटादौ सामानाधिकरण्यज्ञानम् । विरोधिग्रहसामग्र्याः प्रतिबन्धकत्वम् दृष्टान्तेन दृढयति विरोधीति । साध्यतदभावौ न ग्राहयतीति अनुषंगेनान्वयः । अवृत्तिवारणाय वृत्तिमत्त्वविशेषितमिति। सपक्षविपक्षव्यावृत्तत्वं यावत्सपक्षविपक्षनिष्ठाभावप्रतियोगित्वम्, ननु हेत्वभावत्वरूपेण सहचारज्ञानमेव तेन रूपेण व्यापकताग्राहकतया व्यापकतान्तरग्रहविरोधीति, तद्विषयस्यैव दोषत्वमुचितमित्याशयेनाह वृत्तिमदिति । उभयव्यापकीभूताभावप्रतियोगित्वज्ञानविषयत्वं भ्रमप्रमादोयाभयासहचरितसाधारणमिति नाभ-

असाहचर्य्यरूपतया व्याख्यायोभयसाधकत्वापादकमतो व्याचष्टे ज्ञातं ज्ञानयोग्यमिति । उभयसाधकत्वे उभयसाहचर्य्यरूपे व्यतिरेक्यनुमानत्वमप्रयोजकमिति व्यतिरेकितयेत्यन्यथा व्याचष्टे व्यतिरेकितयेति । तादृशेति । साध्यतदभावव्यापकीभूतेत्यर्थः । यद्यपि तादृशव्यतिरेकिप्रतियोगित्ववत् स्यात्तदा उभयसहचरितं स्यादित्यत एव तादृशप्रतियोगिताया उभयसाहचर्यप्रयोजकत्वं लभ्यते, तथापि आपत्तिमूलभूतव्याप्तिदार्ढ्यप्रदर्शनाय व्यतिरेकितयेति पुनर्मूलेऽभिहितमित्यवधेयम् ।

भ्रमेणोभयसाधकत्वस्येष्टत्वादुभयं साधयेदित्यस्यार्थमाह उभयसहचरितं भवेदिति । यद्यपि वृत्तिमत्त्वविशेषितैककोटिव्यापकाभावप्रतियोगित्वस्य वस्तुगत्याऽपरकोटिव्यापकाभावप्रतियोगित्वविरुद्धत्वेपि विरोधाप्रतिसन्धानदशायां नैकग्राहकसामग्र्या अपरग्रहविरोधितेति दर्शिततर्कावतारेणैव विरोधिप्रतिसन्धानमसाधारणदशायामङ्गीकार्य्यम्,तद्दूषयिष्यति दर्शितरीत्या तदवधारणे चेत्यादिना,तथा च शब्दे नित्यत्वानित्यत्वयोः सन्देहे शब्दत्वतदुभयसाहचर्य्यमपि सान्दिग्धमेवेतीष्टापत्तिदशायां नोक्ततर्कावतारसम्भवः । तदुभयैकाधिकरणवृत्तित्वस्य चाप्रसिद्ध्या नापत्तिसम्भवः–अप्रसिद्धस्य व्याप्त्यवधारणासम्भवात् । एवमुभयव्यापकीभूताभावप्रतियोगित्वमवृत्तौ प्रसिद्धं तत्र नोभयसाहचर्य्यमिति विरोधे एवापाद्यापादकयोः कथमापत्तिः । वृत्तिमत्त्वे सत्युभयव्यापकीभूताभावप्रतियोगित्वं चाप्रसिद्धम् । वृत्तिमत्त्वे सति तत्तत्कोटिव्यापकीभूताभावप्रतियोगित्वेन प्रत्येकं तत्तत्कोट्यभावसाहचर्य्यापत्तौ चेष्टापत्तिशंकाया अनिवृत्तिरिति महदसमञ्जसम् । तथापि जलत्वादौ वृत्तिमत्त्वे सति घटत्वपटत्वाद्युभयव्यापकाभावप्रतियोगित्वतदुभयाभावद्वयसहचारमवधार्य सामान्यतः आपाद्यापादकयोर्यत् वृत्तिमत्त्वे सति यदुभयव्यापकाभावप्रतियोगि तत्प्रत्येकं तदुभयाभावद्वयैकाधिकरणवृत्तीति व्याप्तिरवधार्य्यते ततश्च शब्दत्वादौ वृत्तिमत्त्वानित्यत्वतदभावव्यापकाभावप्रतियोगित्वानामाहार्य्यज्ञानान्नित्यत्वतदभावद्वयैकाधिकरणवृत्ति स्यादिदमित्यप्रसिद्धविशेषापत्तिः सुलभैव । सामान्यव्याप्त्यधीनाविशेषानुमिताविव तदधीनविशेषापत्तावपि विशेषप्रसिद्धेरनङ्गत्वात् । न च उक्तापाद्याप्रसिद्धौ प्रतियोग्यप्रसिद्ध्या आपाद्यव्यतिरेकानिश्चयास-

म्भवेन नापत्त्यवतारसम्भव इति वाच्यम्। विशिष्टविषयकापत्तौ विशेष्ये विशेषणाभावनिश्चयस्यापि विशिष्टशङ्कानिवर्त्तकत्वेन हेतुत्वादधिकरणे नित्यत्वानित्यत्वाभावोभयवत्तानिश्चयादेव तादृशापत्तिसम्भवात्। मूले व्यतिरेकितयेति यद्व्याप्तेर्दार्ढ्यं दर्शितं तदेव स्फुटीरोति व्यापकाभाववतीति। प्रतियोगिनोऽभावाभावत्वात् प्रकृतत्वं बोध्यम्। अन्यथेत्यस्य विवरणं अतथाभाव इति। शब्दत्वस्य एकाधिकरण उभयाभावे तस्यावृत्तित्वे वेत्यर्थः। उभयथैव उक्तापाद्यासत्त्वविघटनादवृत्तित्वपक्ष एव शब्दरूपपक्षधर्मताया अनुपपत्तिर्न तु शब्दत्वाधिकरणे तदुभयाभावसत्त्वपक्षे, तथासति तदुभयाभावस्य विपर्य्ययेण तदुभयरूपतया शब्दत्वाभावे तदुभयव्यापकताया एवानुपपत्तिरिति मूलन्यूनताभङ्गाय पूरयति व्याप्तेर्वेति। इष्टापत्तिशंकाविरहेण स्फुटयति न च तथाभाव इति। तथा चेष्टापत्तिशङ्काविरहेण शब्दत्वे नित्यत्वानित्यत्वोभयाभाववदधिकरणत्वेन मिलितापादकानांवृत्तिमत्त्वानित्यत्वतदभावव्यापकीभूताभावप्रतियोगित्वानामाभावे साधनीये नित्यत्वतदभावव्यापकाभावप्रतियोगित्वयोर्द्वयोरभावः पक्षधर्मताबलात् शब्दत्वे सिद्ध्यति। अयमेव च विरोधग्रह इति भावः।

ननु वृत्तिमत्त्वाभावमादायैव न कथम्पर्यसानमित्यत आह न वा पक्षवृत्तित्वं बाधितमिति। तथा च वृत्तिमत्त्वनिश्चयान्न तथा पर्यवसानमिति भावः। एतन्मते साध्यतदभावोत्थापकतयेत्यस्य साध्यतदभावसिद्धिसामग्रीसमवहिततयेत्यर्थो न सम्भवति व्याप्तिग्रहाभावेन तादृशसामग्र्यसम्भवादतोऽन्यथा व्याचष्टे साध्यतदभावेति। दोष इत्यस्य व्याख्या व्याप्तिग्रहप्रतिबन्धक इति। व्याप्तिग्रहविरोधिधर्मवानित्यर्थः।

एतन्मतेऽसाधारणे सत्प्रतिपक्षाविशेषशङ्कानवतारात् आशङ्कान्तरेण सत्प्रतिपक्ष इत्यादि मूलमवतारयति नन्विति। विरोधिव्याप्तिद्वयं—साध्यतदभावनिरूपितव्याप्तिद्वयम्, न गृह्यते—ग्राहकसामग्रीद्वयविरोधेन एकदा न गृह्यते। सत्प्रतिपक्षोच्छेद इति। परस्परसामग्रीविरोधेन विरोधिकोट्योरनुमितिप्रतिबन्धोच्छेद इत्यर्थः। गृहीतेति। हेतुधर्मिकतदभावव्याप्तिग्रहाधीनत्वादित्यर्थः॥

(दी०)अत्र चेदं चिन्त्यम्। एवं सति सपक्षादेर्यावत्त्वविशेषणं व्यर्थम्, दूषकतायामनुपयोगात् व्यभिचाराग्रहमात्रोपक्षीणत्वात्। वृत्तिमत्त्वादिविशेषितस्यापि चासाधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि, विरोधिविषयकत्वाभावात् उपदर्शितविरोधस्य तच्छरीरेऽनन्तर्भावाच्च। व्यापकतयोरपि च न स्वतो विरोधः। उपदर्शितरीत्या तदवधारणे चावश्यं व्यभिचारज्ञानमेव प्रतिबन्धकम्, अत एव सत्यपि असाधारण्यज्ञाने एकत्रानुकूलतर्कावतारे भवति व्याप्तिधीरिति। एतेन तादृशसहचारज्ञानं तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबन्धकं तर्कावतारे पुनस्तुल्यबलतैव नास्तीति परास्तम्। तर्कस्य व्यभिचारशङ्कानिवर्त्तकत्वेनैवोपयोगित्वात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च। सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबन्धकत्वं न तु विरोधिसामग्रीत्वेन, बाधावतारे त्वापाततः सत्प्रतिपक्षितत्वेऽपि बाधेन प्रतिहेतोरव्याप्यत्वादिज्ञान एव साध्यानुमित्युदयादिति कृतं पल्लवितेन॥

इत्यसाधारणदीधितिः॥

(गा०) दूषकतायामनुयोगादिति। यत्किञ्चिदधिकरणे साध्यहेतुसामानाधिकरण्यज्ञानस्यापि व्यापकताग्राहकत्वेन तादृशरीत्या दोषत्वेऽधिकरणे यावत्त्वस्याप्रयोजकत्वादित्यर्थः। ननु यत्किञ्चित्सपक्षादौ हेतोर्ग्रहे तादृशव्यभिचारग्रहेण प्रतिबन्धाद्धेत्वभावे साध्यादिव्यापकताग्रहो न सम्भवतीति यावत्सपक्षादौ हेत्वभावग्रहो व्यभिचारग्रहविरोधितया हेत्वभावे साध्यादिव्यापकताग्राहक इति कथं यावत्त्वानुपयोग इत्यत आह व्यभिचाराग्रहेति। सपक्षादौ हेत्वभावग्रहस्य व्यभिचाराग्रहमात्रसंपादकतया व्यापकताग्रहेऽन्यथासिद्धत्वादित्यर्थः। तथा च यावत्त्वघटितासाधारण्यज्ञानत्वेन प्रतिबन्धकज्ञानाजनकतया न तेन रूपेण प्रतिबन्धकत्वमपीति न तादृशासाधारण्यस्य दोषतासंभवः सहचारज्ञानविधया व्यापकताग्राहकज्ञानविषयस्य यत्किञ्चित्सपक्षविपक्षयोर्हेत्वभावस्य दोषत्वे वह्निमान् धूमादित्यादौ अयःपिण्डजलह्रदादिनिष्ठधूमाभावादेरसाधारण्यता-

प्रसङ्ग इति भावः। ननु वृत्तिमत्त्वे सति यावत्सपक्षविपक्षनिष्ठात्यन्ताभावप्रतियोगित्वस्य हेतौ ज्ञानं वृत्तिमत्प्रतियोगिकत्वे सति यावत्सपक्षविपक्षवृत्तित्वस्य हेत्वभावे ज्ञानं वा ताद्रूप्येण व्यापकताग्रहाजनकमपि व्यापकताग्रहप्रतिबन्धकमास्थीयते साधारण्यज्ञानदशायां व्यापकताग्रहानुत्पादस्यानुभवसिद्धत्वादित्यत आह वृत्तिमत्त्वादीति। विरोधिविषयकत्वाभावादिति। तादृशासाधारण्यज्ञानकाले व्याप्तिग्रहानुत्पाद एव नानुभविकः विरोधिविषयकज्ञानकाल एव ज्ञानानुत्पादस्यानुभविकत्वादिति भावः। उपदर्शितविरोधस्य—एककोटिव्यापकत्वे तदभावरूपापरकोटिव्यापकतानुपपत्तिरूपस्य(साध्याभावव्यापकप्रतियोगिकविरोधस्य)तच्छरीरे—ऽसाधारणघटकहेत्वभावनिष्ठयावत्सपक्षवृत्तित्वादौ, अनन्तर्भावात्—असत्त्वात्, तथा च व्याप्त्यसाधारणयोर्मिथोविरोधिरूपत्वाभावात् इति पर्य्यवसितार्थः। ननु असाधारण्यन समं व्याप्तेरविरोधेपि वृत्तिमदभावनिष्ठयोर्भावाभावव्यापकतयोर्मिथो विरोधात्तयोरेकदा निश्चयोऽनुभवविरुद्धः, एवं चासाधारण्यग्रहदशायां यदि व्यापकताग्रहः स्यात्तदाऽविशेषेण व्यापकताद्वयग्रह एव स्यादित्यगत्याऽसाधारण्यग्रहस्य व्यापकताग्रहविरोधित्वमास्थेयमित्यत आह व्यापकतयोरपीति। न स्वतो विरोध इति। न विरोधाग्रहदशायां भावाभावयोरिव युगपन्निश्चयाविषयत्वमित्यर्थः। ननूक्तरीत्या विरोधावधारणदशायां युगपत्तन्निश्चयवारणायैव तादृशप्रतिबन्धकताकल्पनमावश्यकमित्यत आह दर्शितरीत्येति। अवश्यम्—अवश्यकल्प्यप्रतिबन्धकताकम्, व्यभिचारज्ञानं हेत्वभावाभावरूपहेतुमति नित्यत्वतदभावसंशयात्मकसाधारण्यज्ञानम्, प्रतिबन्धकं—हेत्वभावे नित्यत्वतदभावव्यापकताज्ञानानुत्पादनिर्वाहकं, तस्यापि तत्र नियमेन कल्पनसंभवात्तथा च तदनुरोधेनाप्यसाधारण्यज्ञानस्य न प्रतिबन्धकता कल्प्यते इति भावः। अत एव—तादृशस्थले साधारण्यधीमात्रेण व्याप्तिग्रहप्रतिबन्धादेव। भवति व्याप्तिधीरिति। साधारण्यज्ञाने तर्कस्योत्तेजकत्वादिति भावः। असाधारण्यज्ञानस्य प्रतिबन्धत्वं तत्र तर्कस्याकिंचित्करतया व्याप्तिग्रहासंभवादुपष्टंभसंगतिः। एतेन—क्लृप्तप्रतिबन्धकतयैव निर्वाहेन, तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन—विरोधिव्याप्तिग्रहासाधारणतत्तत्कारणसमुदायत्वेन न त्वसाधारण्यज्ञानत्वमात्रेण, तर्कावतारे तु—एकादि-

श्येव तर्कावतारे तु, तुल्यबलतैव—सकलकारणसंभेलनमेव । नास्तीति । विरोधिव्याप्तिग्राहकस्य तर्कस्य अनुकूलतर्काभावसहितस्य प्रतिबन्धकतया तदभावस्यापि सामग्रीघटकत्वादिति भावः । अतो न तत्र व्याप्तिग्रहानुपपत्तिरिति शेषः । उपयोगित्वात्—उक्तस्थले व्याप्तिग्रहेऽपेक्षणीयतोपपत्तेः, तथाच कल्पनीयातिरिक्तप्रतिबन्धकतायां तदभावनिवेशनस्य निर्युक्तिकत्वादिति भावः ।

केचित्तु तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेनेति । स्वसमानकालीनप्रकृतव्याप्तिग्राहकसामग्री यावत्कारणघटिता तावत्कारणघटिता या विरोधिव्याप्तिग्राहकसामग्री तत्त्वेनेत्यर्थः । तुल्यबलतैव विरोधिव्याप्तिग्राहकसामग्र्या नास्ति तद्व्याप्तिग्राहकतर्कासत्त्वेन न्यूनत्वादिति भावः । तर्कस्येति । तथाच तर्कस्य व्याप्तिग्रहकारणत्वाभावात्तत्सत्त्वासत्त्वे न न्यूनाधिकबलभावमावहत इति भाव इति व्याचक्रुः ।

हेत्वाभासत्वायोगाच्चेति । प्रागुपदर्शितातिप्रसङ्गादिति भावः । नन्वेवं सत्प्रतिपक्षस्य हेत्वाभासत्वानुपपत्तिरित्यत आह सत्प्रतिपक्षे चेति । विरोधीति । ग्राह्याभावादित्यर्थः । नन्वेवमुभयव्याप्यवत्तानिश्चयदशायामेकसाध्यस्य बाधावतारेऽपि साध्यान्तरस्याननुमानप्रसङ्ग इत्यत आह बाधावतारे त्विति । अव्याप्यत्वादीत्यादिना अपक्षधर्मत्वपरिग्रहः । एतज्ज्ञानं च व्याप्तिविशिष्टवत्ताज्ञानविशेषणतापन्नविशेष्यताविशेषणधर्मिविशेषणतया बोध्यम्, तथाच प्रतिहेतुपरामर्शे व्याप्त्याद्यंशेऽप्रामाण्यज्ञानमिति पर्यवसितार्थः । (पक्षे तत्साध्याभावनिश्चये पक्षविशेषणतापन्नहेत्वंशे तत्साध्यव्याप्तिप्रकारकपरामर्शीयहेतुविषयतायाः साध्याभाववत्पक्षविषयतानिरूपितत्वग्रहेण ततस्तत्साध्यव्याप्त्यभाववन्निष्ठत्वतत्पक्षावृत्तिनिष्ठत्वाद्यन्यतरवत्त्वं तद्विषयतायामनुमातुं शक्यत इति बाधनिश्चयस्य परामर्शेऽप्रामाण्यग्राहकता बोध्या) ।

एतेनाव्याप्यत्वादिज्ञानस्यानुमितिविरोधिव्याप्यवत्ताज्ञानसत्त्वेनाकिञ्चित्करता व्याप्यवत्तापरामर्शेन प्रतिबन्धाद्दुर्घटता चेत्यसङ्गतिरिति परास्तम् । अप्रामाण्यज्ञाने व्याप्यत्वादेर्धर्मितावच्छेदकानवच्छिन्न एव हेतौ भानात्तस्य व्याप्त्यादिनिश्चयाप्रतिबन्धकतया विरोधिनिश्चयोत्तेजकीभूततत्समवधाने प्रकृतसाध्यानुमितिसंभवात् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां गादाधर्याम् असाधारणप्रकरम् ।

अथानुमानगादाधर्याम्

अनुपसंहारिप्रकरणम् ।

(चि०) अनुपसंहार्य्यो नासत्सपक्षविपक्षः, सिद्ध्यसिद्धिविरोधात् । नापि केवलान्वयिधर्म्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्वृत्तित्वेन साधारणत्वात् । अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात् । सर्व्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा, साध्यप्रसिद्धौ तु साधारणमेव । न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वं व्यर्थविशेषणत्वात् । न च विरुद्धं विशेषणस्य व्यावर्त्यामित्युक्तम् । नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्म्मावच्छिन्नपक्षकत्वम्, सर्वमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात् ।

(दी०) केवलान्वयीत्यादि । सद्धेतुत्वं साधारणत्वञ्च केवलान्वयिनः साधनस्य, व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वञ्च यथासम्भवं बोध्यम् । नापीति । केवलान्वयिसाध्यकवारणाय सत्यन्तम् । व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि । पक्षत्वं साधकबाधकमानशून्यत्वम् । केवलान्वयिसाध्यकेऽपि बाधकमानाप्रसिद्धिरुक्तैवेति न सत्यन्तवैयर्थ्यम् । नि-

श्रितसाध्याभाववत्तन्मात्रवृत्तित्वे त्वसाधारणं विरुद्ध इति साधारण्याग्रहदशायामसाङ्कर्यमिति वा हृदयम् । अव्यापकत्वादिति । सद्धेतुत्वञ्च व्याप्तिनिश्चयदशायामेवेति भावः ॥

(गा०)सर्वमभिधेयं घटत्वादित्यादेः केवलान्वयिसाध्यकस्यापि न निर्दोषत्वरूपं सद्धेतुत्वम् सर्वमनित्यं घटत्वादित्यादेर्व्यतिरेकिसाध्यकस्यापि न साधारणत्वमतो हेतुविशेषपरतया सद्धेतुत्वात् साधारणत्वादिति मूलं सङ्गमयति सद्धेतुत्वमिति । न्यूनताभङ्गाय व्यतिरेकिसाधनस्य लक्ष्यतां स्वयं निराकरोति व्यतिरेकिणस्त्विति । भागासिद्धत्वं सर्वपक्षकस्य सर्वस्यैव । व्यतिरेकिणः साधारणत्वविरुद्धत्वे यथासम्भवं सर्वमनित्यं द्रव्यत्वात् गगनत्वादित्यादेर्बोध्ये । केवलान्वयिसाध्यकवारणायेति । तस्य सद्धेतुत्वेनालक्ष्यतायाः प्रागभिहितत्वादिति भावः । व्यतिरेकिसाध्यकेति । पर्वतो वह्निमान् धूमादित्यादीत्यर्थः । सद्धेतुत्वं प्रकृतदोषरहितत्वम्, तेन पर्वतो धूमवान् वह्नेरित्यादेर्वारणीयत्वेपि न न्यूनता ।

पक्षत्वं यदि सन्दिग्धसाध्यकत्वं तदा केवलान्वयिनि साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयमादाय पक्षतासंपादनसम्भवेपि सत्यन्तवैयर्थ्यं दुर्वारमेव–केवलान्वयिसाध्यकेपि संशयदशायामनुपसंहारित्वस्य इष्टत्वेन तद्व्यावर्तकविशेषणदानानौचित्यात्, अत एव सिद्धान्तलक्षणे सन्देहात्मकपक्षताघटिते तादृशविशेषणं परित्यक्तमेवेति पक्षत्वमन्यथा व्याचष्टे पक्षत्वमिति । साधकबाधकमानशून्यत्वं–साध्यनिश्चयबाधनिश्चयाभाववत्त्वमित्यर्थः । केवलव्यतिरेकिवारणाय बाधाभावनिवेशः । ईदृशी च पक्षता सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा क्वचिदपि न संशयो नापि निश्चयस्तदाऽक्षतैवेति तदानीं तत्रानुपसंहारित्वस्य सिद्धान्तिनोप्यनिष्टस्य वारणाय सत्यन्तदलस्यैव सार्थक्यमिति भावः । (केवलान्वयिसाध्यकं साध्यसन्देहदशायामप्यलक्ष्यत्वमिदानीमभिप्रेतमिति भावः) । नन्वेवमपि सत्यन्तदलवैयर्थ्यं दुर्वारमेव केवलान्वयिसाध्यके साध्याभावाप्रसिद्ध्या बाधनिश्चयघटितपक्षत्वाप्रसिद्ध्या विशेष्यदलस्यैवासत्त्वादित्यत आह केवलान्वयिसाध्यकेपीति । बाधकमानप्रसिद्धिरुक्तैवेति । पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाध इत्यत्रेति शेषः । बाधकमान-

पदस्य साध्यवत्त्वज्ञानत्वावच्छिन्नविरोधिनिश्चयपरत्वादिति भावः।

ननु अत्रापि लक्षणे पूर्वलक्षणोक्तलक्ष्याप्रसिद्धिर्जागर्ति सर्वमनित्यं प्रमेयत्वादित्यादेः साधारण्यादिसंकरेण लक्ष्यत्वासंभवादिति कथमेतल्लक्षणावतार इत्यत आह निश्चितेति। निश्चितसाध्याभाववच्च तन्मात्रं चेति द्वन्द्वः, तथाच निश्चितसाध्याभाववद्वृत्तित्वं साधारणत्वं निश्चितसाध्याभाववन्मात्रवृत्तित्वं विरुद्धत्वमिति यथासङ्ख्यनान्वयः। इतीति, हृदयमित्यग्रिमेणान्वयः। एवं च सर्वमनित्यं प्रमेयत्वात् गगनत्वादित्यादिकमेव पक्षतादशायामसंकीर्णोदाहरणमिति भावः। ननु साधारण्यशरीरे पक्षातिरिक्तत्वविशेषणस्य वैयर्थ्येन प्राक् निराकृतत्वात् निश्चयघटितसाधारण्याद्याभप्रायेण लक्षणान्तरं न सङ्गच्छते निश्चयांशवैयर्थ्यस्याप्यतिस्फुटत्वादित्यतो दोषान्तरज्ञानशून्यकाले दोषान्तरवतोपि हेतोरनुपसंहारतयैवानुमित्यनुत्पादकत्वमिति लक्ष्यत्वमित्याशयेनैव तल्लक्षणमित्याह साधारण्यादीति। आदिना विरोधभागासिद्धिपरिग्रहः। सर्वमभिधेयं प्रमेयत्वादित्यादेः सद्धेतुतयाऽलक्ष्यत्वस्य प्रागभिहितत्वात् तत्राव्याप्त्यभिधानं सङ्गमयति सद्धेतुत्वं चेति। व्याप्तिनिश्चयदशायामेवेति। तथाच सर्वत्र साध्यसन्देहदशायां तस्य लक्ष्यत्वमेवेत्यव्याप्तिरेव तत्र सत्यन्तविरहादिति भावः॥

(चि०) अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्य्यः, यदि च पक्षे व्याप्तिग्रहः कथञ्चित्तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानवच्च सद्धेतुरेवेति चेन्न।

तत्रैव सद्धेतावतिव्याप्तेः, सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः असाधारणविरुद्धयोरतिव्याप्तेश्च, दूषकतायां व्यर्थविशेषणत्वाच्च। न च दूषकतानैकान्तिकत्वेन न प्रत्येकमिति वाच्यम्। अर्थगत्या व्यर्थविशेषणत्वात्। नापि विप्रतिपत्तिविषयमात्रवृत्तित्वम्, केवलान्वयिसाध्ये अव्याप्तेः सर्वस्य पक्षत्वे मात्रार्थाभावादिति।

(दी०) अथेत्यादि। पक्षातिरिक्ते न प्रतीतो निश्चितो व्याप्तिग्रहानुकूलोऽन्वयेन व्यतिरेकेण वा सहचारो यस्य स तथा। सद्धेतुरेवेति । तथाच लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपदर्शकं न तु विशेषकमिति । विशेषकत्वाभिप्रायेण दूषणद्वयमाह तत्रैवेत्यादि। असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलं निःस्नेहं शीतस्पर्शवत्त्वादित्यादौ च रूपं जलं वा द्रव्यभिन्नं गुणवत्त्वात् गुणकर्म्मावृत्तिजातिमत्त्वादित्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः । दूषकतायामिति । सहचाराभावस्यैव ज्ञानं विरोधि न तु तत्प्रत्ययांशस्यापीति । अर्थगत्येति । अनैकान्तिकशब्दार्थविवेचनेन प्रातिस्विकरूपेणैव प्रतिबन्धकत्वव्यवस्थितेरित्यर्थः ।

केचित्तु दूषकतायामसाधकतायाम् , अर्थेति, अनैकान्तिकशब्दार्थे उभयकोट्युपस्थापकत्वादौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वादित्यर्थ इत्याहुः ।

विप्रतिपत्तिः पक्षे साध्याभावप्रतीतिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्व्वा ? आद्ये केवलान्वयीति । साध्याभावाप्रसिद्ध्या अव्याप्तिरित्यर्थः । उभयत्र सर्वस्येति । अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्त्वव्याप्यवृत्तिकत्वं तदितरावृत्तित्वं वा ? आद्ये केवलेति । इदञ्च यथाकथञ्चिद्व्याप्तिग्रहदशायाम्। द्वितीये सर्वस्येति ।

(गा०) पक्षातिरिक्तेत्यादि यथाश्रुतमूलेऽप्रतीतपदस्य पक्षातिरिक्तपदव्यवहिततया पक्षातिरिक्ते सहचाराप्रत्ययो न लभ्यते, एवं व्याप्तिग्रहानुकूलपदसहचारपदयोरव्यवधानविरहेण व्याप्तिग्रहानुकूलसहचारत्वावच्छेदेनाप्रतीतत्वान्वयालाभ इति विपर्ययेण योजयित्वा व्याचष्टे पक्षातिरिक्त इत्यादि । सर्वत्र साध्यसन्देहदशायामपि हेतौ साध्यसहचारस्य संशयरूपप्रतीतिसम्भवात् प्रतीतिपदं निश्चिता-

र्थकतया व्याचष्टे न प्रतीत इति । व्याप्तिग्रहानुकूलत्वेनानुगमनीयं सहचारद्वयं विशिष्य दर्शयति अन्वयेन व्यतिरेकेण वेति । सहचारस्य साध्यसाधनसहचारत्वेन निवेशे व्यतिरेकिणि साध्याभावहेत्वभावसहचारत्वेन निवेशोऽन्वयिन्यतिव्याप्तिः, सहचारत्वेनोभयोरनुगमे उदासीनपदार्थसहचारग्रहदशायां अनुपसंहारिण्यव्याप्तिरिति तद्वारणमुक्तरूपेणानुगमफलं बोध्यम् । यस्येत्यस्य व्याप्तिग्रहेणान्वयः । षष्ठ्यर्थसम्बन्धश्च तद्धेतुकानुमित्यनुकूलत्वम्, तथाच तद्धेतुकानुमित्यौपयिकव्याप्तिग्रहानुकूलसहचारानिश्चयाभावस्तस्यानुपसंहारित्वमिति लक्षणं पर्यवसितम् । यदि च पक्षे व्याप्तिग्रहः कथंचिदिति ग्रन्थोऽसर्वपक्षकपर एव सर्वपक्षकपरत्वे तत्रैव सद्धेतावतिव्याप्तिरित्यग्रिमग्रन्थासंगतेः पक्षे सहचारप्रत्ययेऽपि पक्षातिरिक्तेप्रतीतसहचारकत्वेनातिव्याप्तेः पक्षातिरिक्तप्रसिद्धावेसंगतेः, एवं सर्वस्य पक्षत्वे पक्षे व्याप्तिग्रह इति विशेषाभिधानमप्यसंगतं स्यात्, एवं च तत्र पक्षातिरिक्तत्वपदमाहिम्ना लक्षणगमनात् सद्धेतुरेवेत्यभिधानमसंगतमित्यतः पक्षातिरिक्तत्वांशस्य लक्षणाघटकत्वाभिप्रायेण तत् संगमयति तथाचेति । विशेषकं–सहचारग्रहस्थलव्यावर्त्तकम् । नन्वेवमग्रिमदूषणद्वयदानविरोध इत्यतोऽभिप्रायानवबोधमूलकत्वेन तत् संगमयति विशेषकत्वेति । दूषणद्वयमप्रसिद्धेरित्यन्तम् । शब्दोऽनित्यः शब्दत्वादित्यादौ प्रसिद्धासाधारणे गगनादौ व्यतिरेकसहचारस्यैव प्रतीतत्वादयं गौरश्वत्वादित्यादिविरुद्धे च घटादौ व्यतिरेकसहचारनिश्चयसंभवान्नातिव्याप्तिसंगतिरतोऽसाधारणविरुद्धयोरिति मूलं तद्विशेषपरतया व्याचष्टेऽसाधारण इति । वक्ष्यमाणकेवलान्वयिसाध्यकहेतोर्विपक्षाप्रसिद्ध्या जलं निःस्नेहं शीतस्पर्शवत्त्वादित्यादौ बाधावतारदशायां विपक्षप्रसिद्धावपि तद्व्यावृत्तत्वाभावात् सपक्षविपक्षव्यावृत्तत्वरूपमसाधारण्यं न संभवतीति असाधारण इत्यस्यार्थमाह सपक्षव्यावृत्त इति । शब्दोऽभिधेयः शब्दत्वादित्यादौ पक्षेऽन्वयसहचारस्य सत्त्वे दशाविशेषे निश्चयसंभवादाह पक्षतादशायामिति । अतिव्याप्तिरित्यग्रिमेण संबध्यते । यत्र सहचार एव नास्ति तादृशमुदाहरति जलमिति । निःस्नेहत्वं–स्नेहवदन्यत्वम्, अत्र च सर्वदैवातिव्याप्तेः पक्षतादशायामित्यस्य न सम्बन्ध इत्याविष्कर्त्तुमित्यादाविति मध्येऽप्युक्तम् । अस्य च विरुद्धत्वेऽपि बाधानवतार-

दशायां तद्ग्रहासंभवादसाधारणतयोपपादनमविरुद्धम् । जलं वेति । प्रथमेऽसिद्धिसंकीर्णो द्वितीये च बाधसंकीर्णो विरोध इति भेदः । घटादावुत्पत्तिकाले गुणरूपहेत्वभावसत्त्वेपि प्रतियोगिवैयधिकरण्यावच्छिन्ने तस्मिन् साध्याभावसहचारो न सम्भवति, स एव च व्यतिरेकव्याप्तिग्रहानुकूलः-प्रतियोगिवैयधिकरण्यावच्छिन्नायां एव व्यापकतायां अव्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तिवारणाय तादृशव्याप्तौ निवेशनीयत्वात् प्रथमेऽतिव्याप्तिसंगतिः, प्रतियोगिवैयधिकरण्यानवच्छिन्नेऽपि यदभावे साध्याभावसहचारो न सम्भवति तत्रातिव्याप्तिरतिस्फुटतया तादृशमपि हेतुमाह गुणकर्मावृत्तीति । समवायेनावृत्तित्वस्य हेतुतायाश्च लाभाय जानीति । अतिव्याप्तिरिति । यद्यपि प्रथमोक्तासाधारणभिन्नस्थलत्रये व्याप्तिग्रहानुकूलसहचाराप्रसिद्ध्या नातिव्याप्तिसम्भवः, तथापि प्रकृतसाध्यादिसहचारस्य प्रमेयत्वेन केवलसहचारत्वादिना वा निश्चयदशायामनुपसंहारिण्यव्याप्तिवारणाय व्याप्तिग्रहानुकूलो यः सहचारनिश्चयः पुरुषनिष्ठस्तदभाव एव विवक्षणीयः, तथा चोक्तस्थलेऽपि कदाचित् कस्यचिदन्यदीयसहचारे साध्यादिसहचारत्वभ्रमेण व्याप्तिभ्रमोत्पत्त्या प्रसिद्धतादृशभ्रमरूपसहचारनिश्चयाभावमादायातिव्याप्तिसम्भवाच्चासंगतिः । पक्षातिरिक्तत्वविशेषणस्य दूषकतायामनुपयुक्तत्वेऽपि तस्य विशेषणत्वानभ्युपगमे न दोष इति प्रत्ययांशघटितस्य दोषत्वासंभवपरतया दूषकतायामित्यादिमूलं व्याचष्टे दूषकतेति । न तु तत्प्रत्ययांशस्य प्रत्ययांशघटितस्य सहचारप्रत्ययाभावस्येति यावत् । ज्ञानं विरोधीति अनुषंगेणान्वयः । ग्राह्याभावाद्यविषयत्वादिति भावः । प्रत्ययांशपरित्यागे च विरोध एव पर्यवसानमित्याशयः ।

अनुपसंहारित्वज्ञानस्याविरोधित्वेपि अनैकान्तिकत्वरूपसामान्यधर्मस्य विरोधिधीविषयत्वेन दोषतयाऽनुपसंहारिणो दुष्टत्वमव्याहतमित्याशंकते मूले न चेति । दीधितावनैकान्तिकशब्दार्थेति । अनैकान्तिकत्वं व्याप्तिग्रहविरोधिधर्मवत्त्वं साधारणादेः साधारण्यादिधर्ममादायैव उपपादनीयम् अनुगततादृशधर्मान्तरासम्भवात्, तथा च साधारण्यादिज्ञानत्वेनैव प्रतिबन्धकत्वमावश्यकमित्यनुपसंहारित्वे दूषकताविरोधिप्रत्ययांशनिवेशनिबन्धनदोषो दुर्वार एवेति भावः ।

मिश्रमतमाह केचित्त्विति । असाधकतासाधकतायामनुपसंहारितादोषस्येत्यादिः । एवं च साध्यसहचाराभावस्यैवासाधकताव्याप्यत्वेन व्यभिचारावारकत्वेन प्रत्ययांशवैयर्थ्यं बोध्यम् । (मूले) न च दूषकतेत्यत्र च (ए)तन्मते दूषकताऽसाधकतासाधनमनैकान्तिकत्वेन लिङ्गेन न तु प्रत्येकमनुपसंहारित्वादिना, तथाच तस्य व्यभिचारावारकविशेषणवत्त्वेपि न क्षतिरिति तादृशमूलाशयः । उभयकोटीति । साध्यतदभावेत्यर्थकम् । उपस्थापकत्वादीत्यादिना विरुद्धान्यपक्षवृत्तित्वे सतीत्यादिरूपपरिग्रहः । साध्योपस्थापकत्वादीत्यादिना द्वितीयानैकान्तिकत्वघटकसत्यन्तपरिग्रहः । व्यर्थत्वादिति । विरुद्धादेरपि असाधकत्वेन तद्व्यावर्त्तकतादृशविशेषणस्य व्यभिचारावारकत्वादिति भावः ।

अथ साध्योपस्थापकतावच्छेदकरूपमात्रस्यासाधकताहेतुत्वे यथा तादृश(साध्य)सहचारत्ववति सद्धेतौ व्यभिचारः तथा साध्याभावोपस्थापकतावच्छेदकरूपमात्रस्य हेतुत्वेऽपि तादृशसाध्याभाववद्व्यावृत्तत्ववति सद्धेतौ व्यभिचारो दुर्वार इति कोटिद्वयोपस्थापकतावच्छेदकरूपहेतौ वैयर्थ्याभिधानासङ्गतिः । साध्योपस्थापकतावच्छेदकसाध्यसहचारतदभावोपस्थापकतावच्छेदकतदभाववद्व्यावृत्तत्वयोः सद्धेतुसाधारणत्वेपि यद्रूपविशिष्टविषयकज्ञानजन्योपस्थितिः यद्रूपविशिष्टविषयकज्ञानजन्यसाध्याभावोपस्थितिसहकारेण सन्देहजनिका तदुभयरूपवत्त्वस्यैव उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वमित्यनेन विवक्षितत्वात्, तादृशसद्धेतुव्यावृत्तत्वेनासाधकतासाधकत्वसंभवादिति चेन्न ।

निष्कृष्टमते धर्मितावच्छेदकधर्मिणि यद्रूपवत्ताज्ञानं साध्यसन्देहजनकं तद्रूपवत्त्वस्यैव तदुभयकोट्युपस्थापकतावच्छेदककरूपवत्त्वमित्यत्र विवक्षितत्वात् । तत्र धर्मितावच्छेदकविशिष्टसाध्यतदभावोभयप्रकारकज्ञानस्यैव साध्यसन्देहपदार्थतया तत्र प्रकारत्वांशवैयर्थ्यपरतया प्रकृतग्रन्थसंगतेः । तादृशलक्षणे साध्याभावाप्रकारकानुमितिं प्रति धर्मितावच्छेदकविशिष्टधर्मिणि साध्याभावव्याप्तिविशिष्टवत्ताज्ञानस्य हेतुतया विरुद्धातिव्याप्तिवारणायैव साध्यप्रकारकत्वानिवेशादसाधकतानुमाने च सद्धेतौ व्यभिचारप्रसंगात् तद्वैयर्थ्यस्य दुर्वारत्वात् । साध्यप्रकारकत्वमात्रनिवेशे साध्यानुमितिज-

नकसाध्यव्याप्यवत्ताज्ञानविषयतावच्छेदकव्याप्तिमादाय व्यभिचारात्तद्धारकसाध्याभावप्रकारत्वांशवैयर्थ्यप्रसक्तेर्न तद्वैयर्थ्यमुक्तम् । एवं चोभयकोट्युपस्थापकत्वादावित्यादेः साध्यतदभावप्रकारकज्ञानजनकत्वादाद्युपस्थितिशेषणतया प्रविष्टं यत्साध्यप्रकारकत्वं तदादिविशेषणवैयर्थ्यादित्यर्थो द्रष्टव्यः। सहचारप्रत्ययाभावः सहचाराभावादन्य एवेति धर्मिभेदाद्वैयर्थ्यमत्रास्वरसबीजं बोध्यम् ।

सर्वस्य पक्षत्वे मात्रार्थाभावादिति केवलान्वयिसाध्यकाव्याप्तौ न हेतुः साध्ये केवलान्वयित्वाभिधानानुपयोगापत्तेरिति साध्याभावाप्रसिद्धेरेव तद्धेतुत्वं मूलकृतोऽभिमतम् । सर्वस्येत्यादिकं च सर्वपक्षकसामान्य एवाभिप्रेताव्याप्तेर्दोषान्तरस्य हेतुपरम् । एवं च साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तेर्विप्रतिपत्तिपदार्थत्वे प्रथमदोषासङ्गतिरिति तं सङ्गमयितुं विप्रतिपत्तिपदार्थं वितर्कयति विप्रतिपत्तिरिति। पक्षपदं विषयताविशेषलाभाय ।

मूले पक्षत्व इति । विप्रतिपत्तिविषयत्व इत्यर्थः । केवलान्वयिसाध्यकेऽतिव्याप्तेरिति पाठे मात्रार्थाप्रसिद्धेरतिव्याप्त्यसङ्गतेः तत्सङ्गमनाय वितर्कयति तन्मात्रवृत्तित्वमिति । तत्वव्याप्यवृत्तिकत्वं विप्रतिपत्तिविषयत्वव्याप्याधिकरणताकत्वम्, विप्रतिपत्तिश्च साध्ये पक्षनिष्ठाभावप्रतियोगित्वविप्रतिपत्तिरेव । तदितरेति । विप्रतिपत्तिविषयेतरेत्यर्थः । केवलान्वयिसाध्यकस्य विप्रतिपत्तिविषयत्वव्याप्यवृत्तेस्सर्वमभिधेयं प्रमेयत्वादित्यादिहेतोर्लक्ष्यतया नातिव्याप्तिः संगच्छत इत्यत आहेदं चेति । कथंचिदिति । सर्वत्र साध्यसन्देहसत्त्वेपि शब्दादिना व्याप्तिग्रहदशायामित्यर्थः। व्याप्त्यनिश्चयदशायामेव च तस्य लक्ष्यत्वादिति भावः। असाधारणव्यतिरेकिणोरप्यतिव्याप्तिर्बोध्या ॥

इत्यनुपसंहारिपूर्वपक्षः ॥

(चिं०) उच्यते व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी । स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ सा-

ध्यसाधनसाहचर्याज्ञानात्तस्य विरुद्धत्वाज्ञानदशाया-मनुपसंहारित्वेनेष्टत्वात् ।

केवलान्वयिधर्म्मावच्छिन्नपक्षको वा । सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदकः निश्चितसाध्यवद्वृत्तित्वात् । विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्य्येव । व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणम्, तदवगमेऽपि साधारणसङ्कर एव । एवं व्याप्यत्वासिद्धेर्ज्ञाने । तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः । घटाकाशोभयवृत्तिद्वित्वाश्रयत्वञ्च विरुद्धमेव । एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तम्, उपजीव्यत्वादिति ।

इत्यनुपसंहारिचिन्तामणिः ॥

(दी०) व्याप्तीत्यादि । यत्र यस्येत्यर्थः । तथाच हेत्वभिमतशब्दोपसन्दानात् तद्धेतुकपक्षकतसाध्यसिद्ध्यौपयिकव्याप्तिग्रहानुकूलोपसंहाराभावस्तस्यानुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकिणि नातिव्याप्तिः ।

नन्वुपसंहारः सहचारः तन्निश्चयो वा ? आद्ये तादृशस्याभावो निखिलप्रसिद्धानुपसंहार्य्यव्यापकः अतिव्यापकश्च रूपं द्रव्यभिन्नं गुणवत्त्वाद्गुणकर्म्मावृत्तिजातिमत्त्वादित्यादेः, द्वितीये पुनरज्ञानरूपासिद्धिपर्यवसायी कारणाभावतया स्वरूपसन्नेव दोषो न हेत्वाभास इत्यत आह केवलान्वयीति । पक्षः साध्यनिश्चयविरोधिनः साध्यवान्न वेत्यादेः सन्देहस्य विषयः। अवच्छे-

दकत्वञ्च स्वान्यूनवृत्तितत्कत्वं तच्च स्वरूपसतोऽप्यविरुद्धम् । तेन प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसन्देहदशायां नाव्याप्तिः । एवञ्च सर्वत्रैव हेत्वादिमाति साध्यतदभावसन्देहाद्व्याप्त्यग्रहेणाभासत्वम् ।

परार्थस्थले बहिर्भावं व्युत्पादयति एवमित्यादिना । असिद्धिरनिश्चयः । ज्ञाने ज्ञापने । स्वार्थस्थलेऽन्तर्भावम् एतेनेत्यादिनाशङ्क्य निरस्यति उपजीव्यत्वादिति ।

(गा०) यत्रेत्यस्य सहचारग्रहाभावरूपैकधर्म्युपसंहाराभावेनान्वये व्यतिरेकिण्यतिव्याप्तिः—व्यतिरेकसहचारप्रकारकग्रहस्य हेत्वभावे सत्त्वेपि विषयतया तदभावस्य हेतावक्षतत्वात्, तस्य व्याप्तावन्वयेऽपि व्यतिरेकसहचारग्रहस्यान्वयव्याप्त्यग्राहकत्वे सैवातिव्याप्तिः—व्यतिरेकव्याप्तेः प्रकृतहेतुनिष्ठत्वाभावात्, सप्तम्यर्थविषयताया व्याप्तिग्रहेऽन्वयेपि स एव दोषः—प्रकृतहेतोर्व्यतिरेकसहचारग्रहाधीनव्यतिरेकव्याप्तिग्रहाविषयत्वात्, अतः षष्ठ्यर्थपरतया सप्तमीं व्याचष्टे यत्रेति । एवं च व्यतिरेकव्याप्तेः प्रकृतहेतुनिष्ठत्वविरहेऽपि तद्ग्रहस्य प्रकृतहेतुविषयकत्वविरहेपि वा तत्सम्बन्धितया तद्ग्रहानुकूलसहचारग्रहदशायां नातिव्याप्तिरिति भावः । ननु यथाकथंचित् सम्बन्धस्य उदासीनव्याप्त्यादावपि सत्त्वेन व्याप्तेराधाराधेयभावरूपो विषयत्वरूपो वा सम्बन्ध एव विवक्षणीयः, तथाच तद्दोषतादवस्थ्यमित्यत आह तथाचेति । हेत्वभिमतेति । स्वहेतुकप्रकृतसाध्यसिद्ध्यौपयिकसम्बन्धतात्पर्यग्राहकहेत्वभिमतपदसमभिव्याहारादित्यर्थः । एतेन तत्पदवैयर्थ्यशंकापि निराकृता । उपसंहाराभावस्तु तत्पुरुषनिष्ठस्तं प्रति तस्य हेतोरनुपसंहारित्वमित्यर्थलाभादित्यर्थः ।

सर्व्वं द्रव्यभिन्नं गुणवत्त्वादित्यादौ अन्वयसहचारस्य व्यतिरेकसहचारस्य च विरहाल्लक्षणसमन्वयसम्भवेन प्रसिद्धानुपसंहारिणि सर्वमभिधेयं नित्यं वा प्रमेयत्वात् द्रव्यत्वाद्वेत्यादावव्याप्तेरभिधानं नासम्भवस्य।यद्यप्युक्तस्थलेपि प्रकृतव्याप्तिग्रहानुकूलसहचाराप्रसिद्ध्या न यथाश्रुतलक्षणसम्भवस्तथापि प्रकृतसाध्यसिद्ध्यौपयिको यो व्या-

प्तिग्रहस्तदननुकूलसहचारसामान्यकत्वविवक्षणे पदार्थान्तरसहचारस्य प्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिधर्मानुकूलत्वाभावमादाय लक्षणसमन्वयसम्भवः। न च गुणादिनिष्ठद्रव्यत्वादिसहचारस्य द्रव्यभेदादिसहचारत्वभ्रमाविषयतया प्रकृतव्याप्तिग्रहानुकूलत्वसत्त्वान्न सहचारसामान्ये तदननुकूलत्वमिति कथं लक्षणसङ्गमनमिति वाच्यम्। सहचारपदेन किञ्चित्प्रतियोगिकत्वकिञ्चिदनुयोगिकत्वविशिष्टसहचारत्वविशिष्टपर्य्याप्तविषयताया विवक्षणीयत्वात्। भ्रमविषयविशिष्टसहचाराप्रसिद्ध्या तद्विषयताया वास्तवसहचारत्वविशिष्टापर्य्याप्तत्वात् भ्रमात्मकज्ञानविषयतासामान्ये च प्रकृतव्याप्तिग्रहानुकूलत्वविरहस्याक्षतत्वात्। रूपमिति। प्रतियोगिवैयधिकरण्यानवच्छिन्ने गुणाभावे द्रव्यान्यत्वाभावसहचारसम्भवात् गुणकर्म्मावृत्तिजातिमत्त्वहेत्वनुसरणम्। अज्ञानरूपासिद्धिपर्य्यवसायी-अज्ञानरूपासिद्ध्यात्मकः, कारणाभावतया-व्याप्तिग्रहकारणाभावतया, स्वस्वरूपसन्नेव-ज्ञानानपेक्ष एव, दोषः–परम्परयानुमित्यनुत्पादप्रयोजकः। न हेत्वाभास इति। यद्यपि वक्ष्यमाणसाध्यसन्देहविषयत्वरूपमनुपसंहारित्वमपि स्वरूपसदेव विरोधीति न तस्य हेत्वाभासतासम्भव इति लक्षणद्वयेऽपि तुल्यानुयोगः, तथापि प्रथमस्य कारणाभावतया स्वरूपसद्दूषणत्वं स्फुटतरं न द्वितीयस्य तस्यातथात्वादित्यापातत ईदृशानुयोगेन द्वितीयावतारसंगतिरित्यवधेयम्।

पक्षपदस्य साध्यवान्न वेति संशयविषयपरत्वे केवलान्वयिसाध्यकेऽव्याप्तिस्तत्र कोट्यप्रसिध्या तादृशसंशयासम्भवात्, स्वनिष्ठाभावप्रतियोगित्वसंशयविषयसाध्यकत्वार्थकत्वे पक्षविशेष्यकसंशयदशायामनित्यत्वादिसाध्यकेऽव्याप्तिरतः संशयद्वयमनुगमयति पक्ष इति। पक्षताग्रन्थे व्याख्यातमेतत्। यद्यपि घटः प्रमेयवान् इत्यादौ प्रमेयं घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयविषयतायाः केवलान्वयिधर्म्मव्यापकत्वात् यथाश्रुतेऽतिव्याप्तिः, विषयताविशेषनिवेशे उभयविधसंशये धर्मिविषयताया एकविधत्वाभावादननुगमः, प्रकृतानुमित्युद्देश्यनिष्ठसाध्यवत्तानिश्चयविरोधिसंशयविषयतानिवशे विश्वस्मिन् साध्यसन्देहदशायां व्यतिरेकिधर्मावच्छिन्ने पक्षे साध्यसाधकस्याप्यनुपसंहारिताया दूषकताबीजसत्त्वेनोपगन्तव्यतया तत्राव्याप्तिः। तथापि स्वप्रतिबन्धकतावच्छेदकीभूतसाध्यव-

त्तानिश्चयविशेष्यतासमानाधिकरणसंशयविषयताविवक्षणान्न दोषः । प्रमेयं घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयस्य घटादिमात्रविषयताया एव तादृशसंशयप्रतिबन्धकतावच्छेदकप्रमेयादिप्रकारतानिरूपितविशेष्यतासमानाधिकरणत्वात् तादृश्याश्च केवलान्वयिधर्माव्यापकत्वात् । ननु यत्र केवलान्वयिसर्वत्वादिकं धर्मितावच्छेदकीकृत्य न साध्यसंशयोऽपि तु द्रव्यत्वगुणत्वादिविशेषधर्मं धर्मितावच्छेदकीकृत्यैव विश्वविषयकसंशयः तत्र संशयविषयतायां स्वरूपसम्बन्धरूपकेवलान्वयिधर्मावच्छिन्नत्वाभावादव्याप्तिस्तत्रापि सहचारग्रहारूपदूषकताबीजसत्त्वेनालक्ष्यतास्वीकारासम्भवात् इत्यत आह अवच्छेदकत्वं चेति । स्वान्यूनवृत्तितत्कत्वमिति । तथा च केवलान्वयिधर्मव्यापकं संशयविषयत्वं पर्यवसितम् । केवलान्वयिधर्मव्यापकत्वं चात्यन्ताभावाप्रतियोगित्वमेव न तु केवलान्वयिधर्मवन्निष्ठात्यन्ताभावाप्रतियोगित्वं निष्ठान्तनिवेशे प्रयोजनाभावात् । स्वरूपसतोपि-संशयधर्मिण्यप्रकारीभवतोपि । नाव्याप्तिरिति । तादृशसमूहालम्बनसंशयविषयतायास्तत्संशयविषयतात्वेन केवलान्वयिधर्मव्यापकत्वादिति भावः । यत्र विश्वेषां नैकसंशयविषयता अपि तु क्रमिकसंशयद्वयविषयतैव तादृशस्य संग्राह्यत्वे तत्कालीनसंशयविषयतात्वेन व्यापकत्वं विवक्षणीयम् ।

हेत्वादीत्यादिना हेत्वभावपरिग्रहः । व्याप्त्यग्रहेणेति । व्याप्त्यनिश्चयेनेत्यर्थः । सहचारनिश्चयासंभवादिति भावः । न च धर्मिणि किञ्चिद्रूपेण साध्यादिसंशयेपि साध्याद्यंशे निर्धर्मितावच्छेदकसाध्यादिसहचारस्य हेतौ निश्चये बाधकाभाव इति वाच्यम् । तद्वत्तया गृह्यमाणे सर्वत्र तत्संशयदशायां तत्र सहचारसंशयसामग्र्या अप्यौत्सर्गिकत्वात्, क्वचित् स्वाधिकरणे तन्निश्चयदशायामेव तादृशनिश्चयेन स्वाधिकरणवृत्तितत्कत्वनिश्चयेन वा तत्सामानाधिकरण्याभावनिवर्त्तनात्, स्वस्मिन् तत्सामानाधिकरण्यसंशयसामग्रीविघटनासंभवात् । आभासत्वं हेतोर्दुष्टत्वम् ।

मूले सद्धेताविति । क्वचिदधिकरणे साध्यनिश्चयदशावच्छिन्न इत्यर्थः । साध्यानिश्चयदशायां-सर्वत्र साध्यसन्देहदशायां, पक्षत्वे-केवलान्वयिधर्मस्य पक्षतावच्छेदकत्वे, तत्-अभिधेयत्वसाध्यकप्रमेयत्वम् व्यतिरेकिसाध्यके अनित्यत्वादिसाध्यकप्रमेयत्वादौ । अज्ञानद-

शायामिति। साध्याभावांशे निश्चयरूपज्ञानविरहदशायामित्यर्थः। इदं इदमेवानुपसंहारित्वमित्यर्थः । दूषणम्-अनुमित्यनुत्पादप्रयोजकं, न तु साधारण्यं तादृशनिश्चयात्मकज्ञानाविषयस्य तस्यातथात्वादिति भावः। तदवगमे-साधारण्यस्य यथोक्तनिश्चयरूपावगमदशायाम्। साधारणसंकर एवेति। कालान्तरीणानुपसंहारितासमानाधिकरणसाधारण्यप्रयुक्त एवानुमित्यनुत्पाद इत्यर्थः। तथा चोभयोरेव पृथक्प्रयोजकतया नान्यतरदोषत्वमिति भावः । अनुपसंहारितादशायां व्याप्त्यनिश्चयरूपव्याप्यत्वासिद्ध्यैवानुमित्यनुत्पादनिर्वाहादनुपसंहारिता न दूषणमित्येतेनेत्यादिनाशंक्य उपजीव्यतया तस्या दूषणत्वमग्रे व्यवस्थाप्यम् एवं व्याप्यत्वासिद्धित्वस्येत्यादिनाप्युपजीव्यतया दूषणत्वं व्यवस्थाप्यत इति पौनरुक्त्याशंकां स्वार्थपरार्थानुमानपरतया निराकरोति दीधितौ परार्थेति । बहिर्भावोऽसिद्धिबहिर्भावः, स्वार्थस्थले व्याप्त्यनिश्चयस्य ज्ञानोद्भावनयोरनुपयोगादिति भावः। अनुपसंहारित्वस्य दशाविशेषे व्याप्येपि हेतौ सत्त्वेन व्याप्त्यभावरूपव्याप्यत्वासिद्ध्यनियतत्वान्न तज्ज्ञापकत्वसम्भव इत्यसिद्धिपदमज्ञानरूपासिद्धिपरतया व्याचष्टेऽसिद्धिरिति। उद्भावनेऽर्थज्ञानद्वारैव उपजीव्यतया तदभिधानेनैवोद्भावकज्ञानेप्युपजीव्यत्वं लभ्यत इत्युद्भावनाधीनपरकीयज्ञानपरतया ज्ञानपदं व्याचष्ट ज्ञान इति । न चोद्भावनाधीनं परकीयज्ञानं शाब्दमेव तत्रानुपसंहारित्वस्य लिङ्गस्य नोपजीव्यतासंभव इति वाच्यम् । वादिवाक्याच्छाब्दव्याप्त्यनिश्चयनिश्चयेपि तत्प्रयोजकविरहशंकया तत्राप्रामाण्यशंकाया अनिवृत्तेः तत्प्रयोजकानुपसंहारित्वज्ञानस्यापेक्षितत्वात् ॥

(दी०) अत्रेदं चिन्त्यम् । हेतुमति साध्याभावसन्देहो नाभासः सत्तयैव विरोधित्वात् । तद्विषयस्तु हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियोगित्वं नास्त्येव केवलान्वयिसाध्यके, व्यतिरेकिसाध्यके तु साधारण्यरूपतया सन्दिग्धानैकान्तिकत्वं पर्यवसितम् । विश्वविषयकसाध्यतदभावसन्देहे च कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्या साध्यतदभाववत्त्वनिश्चयप्रतिबन्धाद्वा व्याप्त्यग्रहेऽज्ञानरू-

पासिद्धिरेव, उपजीव्योऽपि च साध्याभावसन्देहादिर्नाभासः सत्त्वयैव विरोधादिति ।

(गा०) सन्देहोऽनुपसंहारित्वं तद्विषयो वा तदधीनो व्याप्त्यनिश्चयो वा ? तत्राद्यं दूषयति हेतुमतीति । नाभास इति । तथाच न तद्विशेषोऽनुपसंहारितारूपोपीति भावः । सत्त्वयैव न तु ज्ञायमानतया । द्वितीयं दूषयति तद्विषयस्त्विति । हेतोः साध्याभावसामानाधिकरण्यं हेतुमान् साध्यवान्न वेति संशयस्य साध्यस्य हेतुमन्निष्ठाभावप्रतियोगित्वं संशयान्तरस्य विषयः । केवलान्वयिसाध्यके–सर्वमभिधेयं मेयत्वादित्यादिप्रसिद्धानुपसंहारिणि । इदमुपलक्षणम् । सर्वमनित्यं घटत्वादित्यादिव्यतिरेकिसाध्यव्याप्यानुपसंहारिण्यपि तदसत्त्वं बोध्यम् । व्यतिरेकिसाध्यके–सर्वमनित्यं प्रमेयत्वादित्यादौ । सन्दिग्धानैकान्तिकत्वमिति । एतेन निश्चितसाध्याभाववद्वृत्तित्वं साधारण्यं साध्याभावांशे निश्चयात्मकस्यैव साधारण्यज्ञानस्य प्रतिबन्धकत्वादन्यथा पक्षे साध्यसन्देहेनानुमानमात्रोच्छेदापत्तेः सन्दिग्धसाध्याभावसामानाधिकरण्यं पुनरनुपसंहारित्वमतो भेद इत्याशंका निराकृता । नियतविषयसंशयस्थले हेतौ सन्दिग्धसाध्याभावसामानाधिकरण्यादेरनुकूलतर्कानवतारे दोषतोपगमात्तस्य साधारण्यतायाः एव स्वीकार्य्यत्वात् तादृशस्थले तस्याविरोधित्वे सर्वत्र साध्यसंशयस्थलेप्यविरोधितापत्तेस्तज्ज्ञानस्य प्रतिबन्धकतान्तरे मानाभावात् । तृतीयं दूषयति विश्वेति । सहचारग्रहविरहात् व्याप्त्यग्रह इत्यग्रिमेणान्वयः । ग्रहानिश्चयः, दोषतया स्वीकृत इति शेषः । सहचारनिश्चयत्वेन पृथग्व्यापकताग्रहकारणतायाः स्वानभिमततया व्याप्त्यग्रहप्रयोजकान्तरमाह संशयेति । साध्यतदभावसंशयेत्यर्थः । साध्यतदभाववत्त्वनिश्चयप्रतिबन्धादिति । अन्वयव्यतिरेकव्याप्तिशरीरान्तर्गततया तदंशे निश्चयत्वघटकविपरीतभानासंवलितसाध्यतदभाववत्त्वभानविघटनादित्यर्थः । विपरीतकोट्यभाने तद्भासकसामग्र्यभावस्य प्रयोजकत्वादिति भावः । अज्ञानरूपासिद्धिरेव दोषतया पर्य्यवसिता । तथाच पूर्वोक्तैकधर्म्युपसंहाराभावस्येव नास्यापि हेत्वाभासत्वमिति भावः ।

ननु व्याप्त्यग्रहस्याज्ञानरूपासिद्धित्वेन हेत्वाभासताविरहेपि

तदुपजीव्यतया साध्यसन्देहः सहचारानिश्चयो वा व्यभिचारवदाभासः स्यादेव असिद्ध्युपजीव्यत्वेऽज्ञायमानविरोधितया आभासत्वाविरोधित्वादिति मूलानुसारिशंकां निराकरोति उपजीव्योपि चेति। सत्तयैव विरोधित्वादिति। तथा चाज्ञायमानविरोधिनो ज्ञानरूपासिद्ध्युपजीव्यत्वं न हेत्वाभासताप्रयोजकं दृष्टान्तस्य साधारण्यस्य ज्ञायमानतयैव विरोधित्वादिति भावः।

(दी०) यत्तु व्याप्तीति, व्याप्तिग्रहानुकूलसहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमर्थः। विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विरुणद्धि, असाधारणे व्यतिरेकिणि च न व्यतिरेकसहचारग्रहविरोधः, तादृशरूपमन्तरेण लक्षणस्यासम्भवितया तदेव रूपं लक्षणमाह केवलेति। तादृशावच्छिन्नः पक्षः सन्दिग्धसाध्यको यस्याश्रयः स तथा। तथाच केवलान्वयिधर्म्मावच्छिन्नसाध्यसन्देहविषयवृत्तित्वमनुपसंहारित्वम्। व्यतिरेक्यादौ केवलान्वयी न साध्यसन्देहविषयतावच्छेदकः। साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वं वा तत्त्वम्। धर्म्मिविशेषनियन्त्रितस्तु सन्देहो नान्यधर्म्मिकनिश्चयविरोधी। साध्यासन्देहविषयताव्याप्यसाध्यसिद्ध्यनुकूलव्याप्तिग्रहौपयिकसत्ताकत्वं वा, तादृशी च सत्ता अन्वये हेतोर्व्यतिरेके च तदभावस्येति न कश्चिद्विशेषः। स्वरूपसत्तादृशसंशयविषये च हेतुमत्ताज्ञानं हेतौ साध्यसामानाधिकरण्यं संशयसामग्रीत्वेन तन्निश्चयप्रतिबन्धकम्, सर्वत्र संशयसामग्र्या निश्चयप्रतिबन्धकत्वकल्पनात्। हेतुमति सर्वत्र साध्याभावसन्देहे हेतौ साध्यसामानाधिकरण्याभावसंशयस्यौचित्याद्वर्जितत्वात् साध्याभावेन साध्यसामानाधिकरण्याभावोपस्थापनादिति।

(गा०) अत्रैव पूर्वपक्षेऽत्र ब्रूम इत्यादिमिश्रोक्तसमाधानं दूषयितुमुपन्यस्यति यत्त्विति। व्याप्तीति। प्रथमलक्षणसाधारणम्। व्याप्तिग्र-

हेति। व्याप्तिग्रहानुकूलो यो यः सहचारस्तत्तत्सहचारनिश्चयत्वाव- च्छिन्नविरोधिरूपवत्त्वमित्यर्थः। सहचारनिश्चयवृत्तित्वमुपेक्ष्य निश्च- यत्वावच्छिन्नत्वस्य प्रतिबध्यताविशेषणत्वात् आकाशाभाववाना- काशादित्यादौ हेत्वादेरवृत्तित्वस्य उभयसहचारग्रहविरोधित्वेपि नातिव्याप्तिः। अवच्छिन्नत्वं स्वरूपसम्बन्धविशेषः विरोधस्य हेतौ साध्यसामानाधिकरण्यात्मकस्य उभयथा वारणं दर्शयति विरोध- स्त्विति। संशयेत्यनेन प्रतिबध्यतायां निश्चयत्वानवच्छिन्नत्वं दर्शि- तम्। अन्वयमात्रेत्यनेन व्यतिरेकसहचारग्रहविरोधित्वदलव्यवच्छे- दः। यद्यप्यनुपसंहारिण्यपि हेतुनिष्ठकेवलान्वयिधर्मव्यापक(साध्य)- संशयविषयवृत्तित्वं न हेत्वभावे साध्याभावसहचारनिश्चयविरोधिहे- त्वभावधर्मिकसाध्याभावसंशयविषयवृत्तित्वग्रहस्यैव तद्धर्मिकतत्स- चारसंशयसामग्रीत्वेन तद्धर्मिकतन्निश्चयप्रतिबन्धकत्वात्तथापि त- त्तत्सहचारनिश्चयत्वावच्छिन्नविरोधित्वं नैकधर्मविशेषणम्। तथाच सर्वमनित्यं घटत्वादित्यादौ अन्वयसहचारनिश्चयविरोधि यद्धेतुनिष्ठ- तादृशसंशयविषयवृत्तित्वं यच्च हेत्वभावनिष्ठं तादृशसाध्याभावसंश- यविषयवृत्तित्वं तदुभयरूपवत्त्वमादाय लक्षणसमन्वयः। येन केनापि सम्बन्धेन विरोधिरूपवत्त्वनिवेशात् हेत्वभावनिष्ठसंशयविषयवृत्ति- त्वस्यापि एकज्ञानविषयत्वादिना हेतुनिष्ठत्वात् सर्वमभिधेयमनित्यं वा प्रमेयत्वादित्यादौ व्याप्तिग्रहानुकूलव्यतिरेकसहचाराप्रसिद्ध्या यो यः सहचार इत्यनेनाप्यन्वयसहचारमात्रस्योपादानात् तद्विरो- ध्येकरूपमादाय लक्षणसमन्वयः। पर्वतो वह्निमान् धूमादित्यादौ साधनवत्ताग्रहविषयकतिपयधर्मिविशेष्यकसाध्यादिसंशयविषये सा- धनादेर्वृत्तिर्न साध्यादिसहचारनिश्चयविरोधिनी यद्यद्धर्मिणि विशिष्य सम्बन्धो ज्ञायते तावद्धर्मिषु विशेषणसंशयस्यैव विशेष्य- विशिष्टवृत्तित्वसंशयहेतुतया विशिष्टनिश्चयविरोधित्वात् नानाद- ण्डवत्त्वेन ज्ञाते पुरुषे एकद्व्यादिदण्डे रक्तत्वादिसन्देहेपि रक्तदण्डवा- न्न वा पुरुष इत्यादिसंशयानुदयात्। न हि पर्वतवह्निसन्देहे महान- सादिवृत्तितया गृहीतधूमे वह्निमद्वृत्तित्वसंशयः। तन्निर्वाहश्च विशे- षणसंशयाभावाविशिष्टसम्बन्धज्ञानाभावस्य विशेष्यसम्बन्धज्ञान- स्य च परस्परसहकारेणैव हेतुत्वकल्पनयेति। अन्वयसहचार- निश्चयत्वावच्छिन्नविरोधितामात्रनिवेशेऽतिप्रसङ्गं सूचयति असा-

धारण इति । शब्दोऽनित्यः शब्दत्वादित्यादौ पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ चेत्यर्थः । ग्रहविरोधो-ग्रहानुत्पादः, तथाच तत्र साध्यसंशयविषयशब्दपृथिव्यादिवृत्तित्वे अन्वयसहचारनिश्चयविरोधित्वेऽपि व्यतिरेकसहचारनिश्चयविरोधित्वाभावान्नातिप्रसङ्ग इति भावः । व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधितामात्रनिवेशे शब्दोऽनित्यः शब्दत्वाभावादित्यादौ व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधिनि हेत्वभावनिष्ठसाध्याभावसंशयविषयशब्दादिवृत्तित्वेऽतिप्रसङ्गो बोध्यः ।तादृशरूपमिति।विरोधितावच्छेदकरूपमित्यर्थः ।लक्षणस्य-विरोधिरूपवत्त्वरूपानुपसंहारिलक्षणग्रहस्य ।यस्य पक्ष इत्यत्र विग्रहे साध्यसंशयविषयरूपपक्षपदार्थघटकसाध्ये यत्सम्बन्धिकतया षष्ठ्यर्थसम्बन्धान्वये केवलान्वयिधर्मावच्छिन्नविषयताकसंशयविषयकसाध्यकत्वं लभ्यते, तस्य च ज्ञानं न व्याप्तिज्ञानविरोधि किन्तु वक्ष्यमाणक्रमेण साध्यसंशयविषयवृत्तित्वज्ञानमेवातस्तल्लाभाय संशयविषयधर्म्यन्विताश्रयतासम्बन्धार्थकत्वं षष्ठ्याः प्रदर्शयितुमाह यस्याश्रय इति । केवलान्वयीति । अवच्छिन्नान्तं विषयतान्वयि ।तन्निवेशप्रयोजनमाह व्यतिरेक्यादाविति । आदिना असाधारणपरिग्रहः । पर्वतो वह्निमान्धूमादित्यादेः संशयविषयमात्रवृत्तित्वं निवेश्य वारणसम्भवाद्व्यतिरेक्याद्यनुधावनम् । साध्यवत्तानिश्चयविरोधित्वेन संशयानुगमस्यावश्यकतया प्रतिबन्धकतायां तादृशनिश्चयत्वव्यापकत्वमेव निवेशयितुमुचितम् विषयतायां केवलान्वयिधर्मव्यापकत्वस्य निवेशापेक्षया लाघवादित्याशयेनाह साध्यवत्तेति। सामान्यपदेन व्यतिरेक्यादिवारणं स्फुटयति धर्मिविशेषेति । धर्मिविशेषनियन्त्रितः-कतिपयमात्रधर्मिकः। नान्यधर्मिकेति। समानधर्मिकाविपरीतज्ञानस्यैव विरोधित्वादिति भावः ।

ननु यत्र यत्र हेतुस्तद्व्यतिरेकश्च ज्ञातस्तावद्धर्मिकासर्वाविषयसंशयदशायामपि हेतोरप्यनुपसंहारिता सहचारनिश्चयानुत्पादस्य दूषकताबीजस्य सत्त्वादिति तत्रोक्तलक्षणाव्याप्तिरतस्तत्साधारण्याय प्रकारान्तरमनुसरति साध्यसन्देहेति । उक्तस्थले चाज्ञायमानहेतुतद्व्यतिरेकेसत्तावत्यधिकरणे सन्देहविषयत्वासत्त्वेऽपि न क्षतिः ज्ञायमानसत्ताया एव व्याप्तिग्रहानुकूलत्वात् । अथवा यत्र साध्यवति न हेतुर्यत्र वा साध्याभाववति न हेतुस्तत्र न साध्यसंशयः किन्तु यत्र यत्र धर्मिणि साध्य-

हेत्वोः साध्याभावहेत्वभावयोश्च सहचारस्तादृशो सर्वत्रैव साध्यसंशयस्तत्रापि हेतोरनुपसंहारित्वं व्याप्तिग्राहकसहचारनिश्चयाऽसंभवरूपदूषकताबीजस्याक्षतत्वादिति तत्साधारण्याय प्रकारान्तरमाह साध्यसन्देहेति। साध्यवन्निष्ठहेत्वभावसत्तायाः साध्याभाववन्निष्ठहेतुसत्तायाश्च व्याप्तिग्राहकसहचाराघटकत्वेन व्याप्तिग्रहाननुकूलतया तदनुकूलसत्तायाः साध्यसंशयविषयताव्याप्यतयोक्तस्थले लक्षणसमन्वय इति भावः। साध्यसन्देहस्य चोक्तानुगतरूपेणैव निवेशो बोध्यः। असाधारणव्यतिरेकिहेतुसत्तायाः साध्यसंशयविषयत्वव्याप्यतयातिप्रसङ्गवारणाय साध्यसिद्ध्यनुकूलत्वेनान्वयव्यतिरेकव्याप्ती अनुगमय्य तदग्रहानुकूलत्वेन हेतुतद्व्यतिरेकसत्त्वयोरनुगमः। एतदेव दर्शयति तादृशी चेति। तादृशी–तादृशग्रहौपयिकी। अन्वये अन्वयसहचारनिविष्टा व्यतिरेके व्यतिरेकसहचारनिविष्टा। इदानीमनुपसंहारित्वस्य ज्ञायमानतया हेत्वाभासतानिर्वाहाय विरोधित्वं व्यवस्थापयति स्वरूपसदिति। साध्येत्यादेर्हेतोरित्यादिः। तन्निश्चयेति। साध्यसामानाधिकरण्यनिश्चयेत्यर्थः।

ननु हेतुमति साध्यसंशयस्य हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वमेवासिद्धमित्याशंकायामाह हेतुमतीति। औचित्यावर्जितत्वादिति। हेतुमति साध्यसत्त्वं हेतौ सामानाधिकरण्यनियतं सर्वत्र तद्वति तदभावसत्त्वं तत्र तत्सामानाधिकरण्याभावनियतमिति तदुभयभाने तदुभयभानौचित्येनाप्रत्याख्येयत्वादित्यर्थः। ननु साध्यसन्देहस्याधिकरणे सत्त्वेपि साध्यसामानाधिकरण्याभावस्यानुपस्थितया न संशयः सम्भवति तदुपस्थापकसाधारणधर्मादिदर्शनसत्त्वे तदेव संशायकमस्त्वित्यत आह 'साध्याभावेनेति। साध्यसामानाधिकरण्याभावस्य साध्याभाववृत्तित्वेनाश्रयतया तत्सम्बन्धिसाध्याभावविषयकसाध्यसन्देहस्यैव तदुपस्थापकत्वादित्यर्थः। एवं च संशयज्ञानस्यानुपयोगित्वेपि तद्विषयवृत्तितायाः ज्ञानस्य संशयसामग्रीविधया साध्यसामानाधिकरण्यघटितव्याप्तिनिश्चयविरोधितया तस्यानुपसंहारित्वरूपहेत्वाभासताऽक्षतैवेति समुदायभावः॥

(दी०) तन्न, सर्वत्र साध्यसन्देहदशायां कचिदपि सा-

ध्यसामानाधिकरण्यस्यागृहीतत्वेन तदभावस्य गृहीतुमशक्यत्वात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयस्याभावधीहेतुताया असकृदावेदितत्वात् ।

अस्तु वा स यथाकथञ्चित् साध्ये हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं, न तथापि सामग्रीत्वेन प्रतिबन्धकतया हेत्वाभासत्वम् । अन्यथा व्यभिचरिताव्यभिचरितसमानासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवाह्निःसाधनादिसाधारणद्रव्यत्वादिमत्त्वम् हेतोः पक्षस्य चाभासान्तरं स्यात्, तदुपदर्शितस्येव तस्यापि ज्ञानस्येतरसाचिव्येन तत्तान्निश्चायकविरोधिसंशयसामग्रीत्वात् । एवमसिद्ध्यादिनिश्चायकप्रत्यक्षसामग्र्यपि । अपि च हेतोः साध्याभावसन्देहविषयमात्रवृत्तित्वं दूषणमिति मास्तं तच्च व्यतिरेकिणि हेतौ नियतविषयेणापि सन्देहेन सम्पद्यते, दूषकताबीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय, न वा अत्रैव निर्भरः कर्त्तव्यो हेत्वाभासत्वानुपपत्तेरुक्तत्वादित्यलं पल्लवितेन ॥

(गा०) अनुपसंहारितादशायां साध्यसामानाधिकरण्यसंशय एव दुर्घटः कथं तज्ज्ञानस्य तत्संशयसामग्रीत्वमित्याह सर्वत्रेति । क्वचिदपीति । कमपि धर्मिणमन्तर्भाव्य साध्यांशे निश्चयरूपसाध्यवद्वृत्तित्वप्रकारकज्ञानस्याजातत्वेनेत्यर्थः । तदभावस्य—साध्यसामानाधिकरण्यत्वावच्छिन्नाभावस्य, गृहीतुमशक्यत्वात्—संशयेन कोटितया गृहीतुमशक्यत्वात् । ग्रहणस्याशक्यत्वे हेतुमाह प्रतियोगितावच्छेदकेति । सर्वांशे निश्चयरूपस्य प्रतियोगितावच्छेदकप्रकारकज्ञानस्येत्यर्थः । अभावधीहेतुताया इति । प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकनिश्चयविधया हेतुताया इत्यर्थः । प्रतियोगिविशेषिताभावबुद्धेः प्रतियोगितावच्छेदकविशिष्टवैशिष्ट्यावगाहितानियमादिति भावः ।

यत्तु मिश्रमतसिद्धस्वतन्त्रप्रतियोगिज्ञानहेतुताभिप्रायकोऽयं ग्रन्थ

इति । तदसत्–अभावलौलिककप्रत्यक्षं प्रत्येव स्वतन्त्रतद्धेतुतायास्तैः स्वीकारात् संशय उपनीताभावकोटिभाने तादृशकारणविरहस्याकिञ्चित्करत्वात् ।

अथ सर्वत्र साध्यसन्देहदशायां तादृशप्रत्यक्षनिश्चयासंभवेपि कालान्तरीणनिश्चयजन्यसंस्कारतः स्मरणात्मकतादृशनिश्चयः संभवत्येवेति चेन्न । यस्य पुंसः प्रागपि कुत्रचित् साध्यनिश्चयो न जातस्तस्य सहचारसंशयसामग्र्या एवमपि दुरुपपादत्वात् ।

ननु साध्यांशे निर्द्धर्मितावच्छेदकं तदंशे निश्चयरूपं साध्यसामानाधिकरण्यज्ञानं सर्वत्र साध्यसंशयदशायामपि सुलभमेव धर्मितावच्छेदकावच्छिन्नधर्मिविषयताया एव संशयत्वघटकतया धर्मितावच्छेदकावच्छिन्नतद्विषयताया निश्चयत्वसंपादकत्वात् । न च धर्मितावच्छेदकप्रकारेण सकलधर्मिणामेव तदा भानसंभवात् धर्मिविषयताया धर्मितावच्छेदकानवच्छिन्नत्वं दुर्घटमिति वाच्यम् । एकज्ञाने धर्मितावच्छेदकावच्छिन्नतदनवच्छिन्नविषयतयोः सत्त्वे बाधकाभावादित्याशयेनाहास्तुवेति । सः–प्रतियोगितावच्छेदकीभूतसाध्यसामानाधिकरण्यान्वयप्रकारकोनिश्चयः,सर्वत्र साध्यसंशयदशायामपि पक्षे हेतुमत्तानिश्चयसत्त्वे हेतुत्वांशे निश्चयात्मकहेतुसामानाधिकरण्यज्ञानसत्त्वेन साध्ये हेतुसामानाधिकरण्याभावसंशयः सुलभ एवेत्याशयेनाह साध्ये इति । न तथापि हेत्वाभासत्वमित्यन्वयः । उक्तानुपसंहारिताया इति शेषः । अत्र हेतुः सामग्रीत्वेन प्रतिबन्धकतयेति । तज्ज्ञानस्येति शेषः । अन्यथा–प्रतिबन्धकसामग्र्यात्मकधीविषयस्यापि हेत्वाभासत्वे, व्यभिचरिताऽव्यभिचरितेत्यादिपंचकस्यैव साधारणान्वयः । तत्र च व्यभिचारिताऽव्यभिचारितादिचतुष्टयसाधारणद्रव्यत्वादिमत्त्वं हेतोः साधनवान्निःसाधनसाधारणतद्वत्त्वं पक्षस्य बोध्यम् । प्रथमद्वयं हेतौ व्याप्तिघटकदलयोः प्रत्येकाभावसंशायकम्, तृतीयं विशिष्टव्याप्त्यभावसंशायकम्, तुरीयं पक्षधर्मत्वसंशायकम्, पंचमं पक्षे साधनाभावसंशायकमिति भेदः । तस्यापि तादृशद्रव्यत्वादिमत्वस्यापि,इतरसाचिव्येन–विशेषादर्शनादिसहकारेण । तत्तन्निश्चयति । अव्यभिचारादिनिश्चयेत्यर्थः । प्रत्यक्षसामग्रीलौकिकप्रत्यक्षसामग्रीघटकविशेषणज्ञानादिविषयः, तादृशसामग्र्या अपि बलवद्विपरीतभानसामग्रीत्वेन पक्षादौ हेतुमत्ताज्ञानप्रतिबन्धक-

त्वादिति भावः। दूषणान्तरमाहापि चेति। साध्याभावसन्देहविषयमात्रवृत्तित्वमिति। तन्मात्रस्य व्यतिरेकव्याप्तिग्रहाविरोधित्वेपि विरोधवदन्वयव्याप्तिग्रहाविरोधित्वेन हेत्वाभासतया दुर्वारत्वादिति भावः। व्यतिरेकिणि-पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ, नियतविषयेन-पृथिव्यादिमात्रविषयेण, संपद्यते-निर्वहति, तथा च तत्राप्यनुपसंहारितापत्तिरिति भावः। इदमुपलक्षणम् असाधारण्येप्यतिप्रसङ्गो बोध्यः।

वस्तुतस्तु असाधारणेपि व्यतिरेकव्याप्तिग्रहेण व्यतिरेकिपदेनासाधारण्यस्य साक्षादेव लाभः। ननु साधारणादिव्यावर्त्तनायैव सन्देहविषयताव्याप्यव्यतिरेकसत्ताप्यनुपसंहारित्वे निवेश्येत्यत आह दूषकतेति। अन्वयव्याप्तिग्रहप्रतिबन्धलक्षणहेत्वाभासताप्रयोजकसत्त्वे साध्यसन्देहविषयमात्रत्वांशमात्रस्यासाधारण्यं न हेत्वाभासताविरोधीत्यर्थः। नन्वस्तु तदेवानुपसंहारित्वं व्यतिरेकिणस्तथात्वेपि व्यतिरेकव्याप्त्युपादानान्नानुमितिविरोध इत्यत आह नवेति॥

(दी०) व्याप्तिग्रहप्रतिबन्धलक्षणैकप्रयोजनकत्वेन साधारण्यादीनामेकहेत्वाभासत्वम्। साधारणेन व्यापकत्वस्याव्यभिचारित्वस्य वा असाधारणेन सामानाधिकरण्यस्यानुपसंहारिणा च व्यतिरेकव्याप्तेर्ग्रहस्य प्रतिरोधात्। लक्षणन्तु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहविरोधितावच्छेदकं रूपम्। व्याप्तीश्चान्वयतो व्यतिरेकतश्च नानारूपाः प्रातिस्विकरूपेण उपादाय तावदवगाही ग्रहो वाच्यः। साध्यसाधनयोरप्रसिद्धेरसिद्धिभेदस्य वारणायाविरोधिन इत्यन्तम्। साध्यसाधनभेदेन व्यभिचारभेदाद्यत्र विशिष्टं साध्यं साधनं वाऽप्रसिद्धं तत्र तद्ग्रहविरोधत्वं नोपादेयम्। एवमन्यत्रापि। शेषं हेत्वाभासलक्षणोक्तादिशावसेयम्। व्यर्थविशेषणत्वन्तु न व्याप्तिग्रहविरोधीति वक्ष्यते। साध्याव्यभिचरितसामानाधिकरण्यविरहस्य बहिर्भावनीयत्वे पुनरन्वयव्याप्तौ व्यापकत्वमव्यभिचरितत्वं वा सामानाधिकरण्यञ्च

विशकलितं युगपदुपादेयम् । तत्र साधारणत्वं वर्णितम् । असाधारणत्वन्तु सपक्षव्यावृत्तत्वं, सपक्षश्च साध्यवान्, तद्व्यावृत्तत्वन्तद्वृत्तित्वग्रहविरोधित्वम् । प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकमिति तु निष्कर्षः । संगृह्यते चेत्थं साध्यादेः साधनवदवृत्तित्वादिकम् ।

(गा०) व्यतिरेकव्याप्तिग्रहविरोधिनो हेत्वाभासान्तरताविरहात्स्य व्यभिचारमध्य एवान्तर्भावस्यौचित्यात्तस्यैवानुपसंहारित्वरूपतां स्वातंत्र्येण व्यवस्थापयितुं भूमिकामाह व्याप्तिग्रहेति । एकहेत्वाभासत्वं-व्यभिचाररूपैकहेत्वाभासान्तर्गतत्वम् व्यापकताज्ञानस्यानुमितिहेतुताया निराकृतत्वादाहाव्यभिचारत्वस्य वेति । सामानाधिकरण्यस्य-साध्यसामानाधिकरण्यस्य, साध्यासामानाधिकरण्यमेवासाधारण्यं न तु मणिकारसंमतं साध्यव्यापकीभूताभावप्रतियोगित्वं तस्यानुमितौ साक्षादेव विरोधित्वेन सत्प्रतिपक्षादिवद्व्यभिचारान्यहेत्वाभासताया एव युक्तत्वादित्याशयः ।

असाधारण्यस्य साध्यासामानाधिकरण्यरूपत्वेऽनुमितिविरोधित्वादिघटितमूलोक्तसामान्यलक्षणस्याव्याप्त्यतिव्याप्तिकरम्बितत्वात् स्वयं सामान्यलक्षणमाह लक्षणं त्विति । ज्ञानस्य विषयतया-विषयीभूय, विरोधितावच्छेदकं-प्रतिबन्धकतायामवच्छेदकं प्रतिबन्धकतावच्छेदकीभूतज्ञानवृत्तिविषयताकत्वमिति तु पर्य्यवसितम् । एवमग्रेपि सर्वत्र बोध्यम् । अनुपसंहारित्वसंग्रहायाह व्याप्तीश्चेति । केनापि रूपेण व्याप्तीनामननुगमे तज्ज्ञानसामान्यविरोधित्वं न साधारण्यादेरित्यत आह प्रातिस्विकेति । असिद्धिभेदस्येत्यनेनालक्ष्यत्वं दर्शितम् । असिद्धिभेदो व्याप्यत्वसिद्धिः । साध्यसाधनयोरवृत्तित्वं साध्यसाधनसामानाधिकरण्यग्रहविरोधितया असाधारण्यमेवेति तद्व्यावृत्तेरनपेक्षिततया साध्यादिमत्त्वपर्य्यन्ताननुधावनम् । ननु धूमवान् वह्नेरित्यादिस्थलीयसाधारण्याद्यसंग्रहप्रसङ्गः तत्र विशिष्टसाध्यादिग्रहविरोध्यप्रसिद्धेः । न च विशिष्टसाध्यादिग्रहविरोधिनी कामिनीजिज्ञासैव प्रसिद्धेति तदन्यज्ञाननिष्ठव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वमादाय लक्षणसमन्वयः संभवतीति वाच्यम् । एवमपि यत्र

कामिन्यादेरेव साध्यता हेतुता वा तत्र साध्यादिग्रहविरोध्यप्रसिद्धेर्दुर्वारत्वादित्यत आह साध्यसाधनभेदेनेति। साध्यतावच्छेदकादिभेदेनेत्यर्थः। नोपादेयमिति। तत्र साध्याप्रसिद्ध्यादिदोषाप्रसिद्ध्या तदनुपादानेऽप्यतिप्रसङ्गानवकाशादिति भावः। तथाच दर्शितस्थले विशिष्टसाध्यादिग्रहविरोध्यप्रसिद्ध्याऽव्याप्तेर्नावकाश इत्याशयः। यदि स्वाप्रतिबध्यविशिष्टसाध्यादिग्रहकत्वमविरोध्यन्तार्थस्तदाऽविरोधिन इत्यन्तस्योपादानेपि नाव्याप्तिरित्यपि बोध्यम्। अन्यत्रापि-वक्ष्यमाणासाधारणादिलक्षणेपि, शेषमवच्छेदकत्वनिर्वचनं विशिष्टान्तराघटितत्वानिवेशनादिकम्।

ननु नीलधूमादित्यादौ हेतुतावच्छेदकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वरूपव्यर्थविशेषणतायां व्याप्यत्वासिद्धिप्रभेदत्वेन व्याप्तिग्रहविरोधिन्यामतिव्याप्तिरित्यत आह व्यर्थविशेषणं त्विति। वक्ष्यत इति। असिद्धिग्रन्थ इति शेषः। व्याप्त्यभावेतिव्याप्तिमाशङ्क्याह साध्याव्यभिचरितेति। स्वमते व्यापकताज्ञानस्यानुमित्यहेतुत्वेन तद्विरोधिनोऽव्यापकतादेः साक्षाज्जनकज्ञानाविरोधित्वेन न हेत्वाभासत्वमिति स्वमताभिप्रायेणाहाव्यभिचरितत्वं वेति। साध्याभाववदवृत्तित्वं वेत्यर्थः। युगपदिति। एकज्ञानविशेषणतयेत्यर्थः। हेतौ साध्याव्यभिचारावगाहित्वे सति तत्र सामानाधिकरण्यावगाहि यज् ज्ञानं तद्विरोधित्वं निवेश्यम्, न तु अव्यभिचारविशिष्टसामानाधिकरण्यावगाहित्वमिति समुदायार्थः। तथाच विशिष्टाभावग्रहस्य विशिष्टवत्ताज्ञानमात्रविरोधितया तत्सत्त्वेपि साध्याव्यभिचारी साध्यसमानाधिकरणश्च हेतुरिति विशकलितदलद्वयावगाहिज्ञानोदयान्न विशिष्टाभावेऽतिव्याप्तिरिति भावः। साध्याप्रसिद्ध्यादिर्व्यभिचारानात्मकस्यापि व्याप्यत्वासिद्धेः सत्त्वाद्दर्शितविशिष्टाभावस्यासिद्धिव्यभिचारोभयरूपत्वेपि न क्षतिरित्यत्रानिर्भरसूचनाय बहिर्भावनीयत्वे पुनरित्युक्तम्।

अथानुमितौ सामानाधिकरण्यसम्बन्धेनाव्यभिचारविशिष्टं यत् सामानाधिकरण्यं तत्प्रकारकहेतुज्ञानत्वेन न हेतुता सामानाधिकरण्यविशिष्टाव्यभिचारज्ञानत्वेनापि विनिगमनाविरहेण हेतुताप्रसङ्गात् हेतोर्व्यभिचारज्ञानकालेपि हेतुविशेषणतापन्नसामानाधिकरण्यांशे विशेषणतयाऽव्यभिचारभाने बाधकाभावेनानुमित्यापत्तेश्च। न चो-

भयविधविशिष्टज्ञानस्यानुमितिहेतुत्वोपगमाद्धेतौ व्यभिचारग्रहदशायां तत्र सामानाधिकरण्यविशिष्टाव्यभिचारग्रहाभावान्नानुमित्यापत्तिरिति वाच्यम् । उभयविधव्याप्तिज्ञानसत्त्व एवानुमितिरित्युपगमस्यानुभवविरोधेनासंभवात्, तृणारणिमणिन्यायेनैवोपदर्शितोभयविधविशिष्टज्ञानहेतुतायाः स्वीकरणीयत्वाद्व्यभिचारग्रहकाले तदभावविशिष्टसामानाधिकरण्यग्रहाधीनानुमित्यापत्तेर्दुर्वारत्वात्, तथा चाव्यभिचारसामानाधिकरण्योभयावच्छिन्नहेतुविषयताशालिज्ञानत्वेनैवानुमितिहेतुता वाच्या तादृशज्ञाने प्रत्येकाभावज्ञानमेव विरोधि न त्वेकविशिष्टापराभावज्ञानं प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताबुद्धेरेकाभावधीप्रतिबध्यत्वादिति विशिष्टाभावस्य हेत्वाभासत्वमेव दुर्घटं कान्तर्भावबहिर्भावविचार इति चेन्न । सामानाधिकरण्यसम्बन्धेनैकविशिष्टापरस्याभावग्रहो यथा तादृशविशिष्टप्रकारकग्रहविरोधी तथा युगपद्विशेषणविशेष्योभयधर्मावच्छिन्नतया एकधर्मिग्रहेऽप्युभयाभावग्रहवद्विरोध्युभयाभावसमशीलतादृशाभावग्रहदशायां सामानाधिकरण्येनैकविशिष्टापरग्रहसमशीलधर्मद्वयवत्ताग्रहानुत्पादस्यानुभवसिद्धतया प्रत्याख्यातुमशक्यत्वात् । अत एवासिद्धिग्रन्थे व्याप्तिविशिष्टपक्षधर्मताविरहस्य विशिष्टपरामर्शविरोधितया दोषत्वं स्वयं व्यवस्थापयिष्यते न हि विशिष्टपरामर्शस्य एकविशिष्टापरावगाहित्वं कारणतावच्छेदकं लाघवेनानुभवबलेन च हेतौ व्याप्तिपक्षधर्मत्वोभयावगाहिज्ञानस्यैवानुमितिहेतुत्वोपगमात् । न चैवं विशकलिताव्यभिचारसामानाधिकरण्योभयावगाहिधीविरोधित्वोपादानेनापि न विशिष्टाभाववारणसंभव इति वाच्यम् । विशकलितोभयावगाहित्वं हि न मिथो विशेष्यविशेषणभावानापन्नोभयावगाहित्वम्, अपि तु धर्मिनिष्ठविभिन्नविषयतानिरूपितोभयविषयताप्रतियोगित्वम् । तच्च साध्याव्यभिचारी हेतुः साध्यसमानाधिकरणो हेतुरिति समूहालंबनबुद्धौ, तस्याश्च न विशिष्टाभावधीप्रतिबध्यता अपि तु उभयविषयतानिरूपितैकविषयताशालिबुद्धेरेवेति वर्णितं साधारणग्रन्थे ।

असाधारण्यस्य सत्प्रतिपक्षोत्थापकतया दूषकताया मणिकारसम्मततया तदनुयायिना पूर्वं साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यमिति व्याख्यातम् तच्च स्वाननुमतमित्यन्यथा तन्निर्वक्ति

असाधारणत्वं त्विति । पक्षव्यावृत्तत्वमिति । यद्यप्येतदप्यनुपदं विवरणीयमिति तदेवासाधारणत्वविवरणमिस्तु किमन्तरा तद्विवरणेन, तथापि सपक्षव्यावृत्तत्वमसाधारणत्वमिति प्राचीनप्रवादाविरुद्धत्वं स्वमतस्य दर्शयितुमेतद्विवरणम् । निश्चितसाध्यवद्व्यावृत्तत्वस्य व्याप्तिग्रहं प्रति साक्षादविरोधितायाः प्राग्व्यवस्थापितत्वात् निश्चयांशपरित्यागेन सपक्षपदं व्याचष्टे सपक्षश्चेति । तद्व्यावृत्तत्वं यदि तदवृत्तित्वं तदा साध्यादिनिष्ठहेत्वसामानाधिकरण्यसाध्यवदवृत्तित्वाविशिष्टसाधनादेरसङ्ग्रह इति तत्साधारण्याय व्याचष्टे तद्व्यावृत्तत्वमिति । साध्याप्रसिद्ध्यादेरपि विशिष्टसाध्यादिसामानाधिकरण्यग्रहविरोधितयाऽतिप्रसङ्गवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वमधिकं प्रवेशयन् विरोधिपदस्य प्रतिबन्धकपरताभ्रमनिराकरणाय तदर्थं विवृणोति प्रकृतेत्यादिना । प्रकृतत्वं साध्यतावच्छेदकादिवैशिष्ट्यम् । तदुभयेति । विशिष्टसाध्यसाधनोभयेत्यर्थः । इत्थं–सामानाधिकरण्यग्रहविरोधितात्मकानुगमकप्रकारेण ॥

(दी०) चाक्षुषस्पर्शवान् स्पार्शनशब्दवत्त्वादित्यादौ विशेष्ययोरसामानाधिकरण्यञ्च । बाधासिद्धिभेदस्य च साध्यसाधनयोरवृत्तित्वस्यैतत्साङ्कर्येऽपि न क्षतिः । इदमेव च मणिकृतां विरुद्धत्वम् । इत्थञ्च तदीयमसाधारणत्वमेव विरुद्धत्वमिति । यत्र च धर्मिणि यो धर्मो यादृशो हेत्वाभासः तद्व्याप्यमपि तद्विशेषोऽन्तरेण प्रकरणसमन्तद्व्याप्यञ्च,पृथगुपदेशादविरोधाच्च।अनुपसंहारित्वञ्च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वम् ।तादृशञ्च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकम्। वह्न्यभावाभावत्वेन वह्नेर्धूमाभाववद्वृत्तित्वज्ञानं वह्न्यभावस्य धूमाभावव्यापकताज्ञानं कदाचिद्विरुन्ध्यादपि न तु वह्नित्वेनेति नातिप्रसङ्गः । केवलान्वयिनि तत्सम्भवेऽपि अन्वयव्याप्त्युपादानेनानुमितिप्रतिरोध इति दिक् ॥

इति अनुपसंहारिदीधितिः ॥

ननु विशिष्टसाध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नानिरू-
पिता विरोधिता समूहालम्बनविशेषविरोधिताव्यावर्त्तनायावश्यं प्रवे-
श्यते तत्र चावच्छिन्नत्वं स्वरूपसम्बन्धात्मकमेव निवेश्यते न त्व-
न्यूनवृत्तित्वं गौरवात्तथाच विशिष्टसाध्यसाधनग्रहाविरोधित्वनिवे-
शनमनर्थकं साध्याप्रसिद्ध्यादिग्रहप्रतिबध्यताया विशिष्टसाध्यादिग्र-
हत्वेनैवावच्छिन्नत्वादित्यत आह चाक्षुषस्पर्शेति । विशेष्ययोः–स्पर्श-
शब्दयोः, परस्परासामानाधिकरण्यं संगृह्यते इत्यनेनान्वयः । तथाच
स्वरूपसम्बन्धरूपावच्छिन्नत्वनिवेशे तत्राव्याप्तिः तादृशाविरोधित्वा-
नप्रतिबध्यतावच्छेदककोटौ साध्यताद्यवच्छेदकचाक्षुषत्वादिविषय-
त्वाप्रवेशेन विशिष्टसाध्यादिसामानाधिकरण्यग्रहत्वावच्छिन्नाविरोधि-
तायास्तत्रासत्त्वादित्यन्यूनवृत्तित्वरूपमेव तन्निवेश्यम्, तथाच तत्स्थ-
लीयसाध्याप्रसिद्ध्यादिग्रहप्रतिबध्यताया अपि विशिष्टसाध्यादिसामा-
नाधिकरण्यग्रहत्वान्यूनवृत्तित्वात् तत्रातिप्रसङ्गवारणाय विशिष्टसा-
ध्यादिग्रहाविरोधित्वनिवेशनमावश्यकमिति भावः ।

ननु साध्यस्यावृत्तित्वे बाधरूपे साधनस्य वाऽवृत्तित्वे स्वरूपा-
सिद्ध्यात्मकेऽतिव्याप्तिः तद्ग्रहस्यापि साध्यवत्त्वादिग्रहविरोधितया त-
द्घटितोभयसामानाधिकरण्यग्रहविरोधित्वादित्याशङ्कां तयोर्लक्ष्यता-
स्वीकारेण निराकरोति बाधेति । एतत्सांकर्येऽपि–असाधारण्यरू-
पत्वेऽपि । न क्षतिरिति । अन्यादृशस्यापि बाधादेः प्रसिद्ध्या स्वातन्त्र्ये-
ण तत्परिगणनोपपत्तेरिति भावः ।

ननु साधनादेः साध्यासामानाधिकरण्यादिकं विरोध एव तस्य
कथमसाधारण्यतोपगम इत्यत आह इदमिति । मणिकृत एव इदं
विरुद्धत्वमनुमतं न तु ममेत्यर्थः । नन्वेवं भवतां को विरोध इत्या-
कांक्षायामाह इत्थं चेति । तदीयं–मणिकारीयं, साध्यव्यापकाभावप्र-
तियोगित्वरूपमसाधारणत्वम् ।

ननु साधनादेः साध्यासामानाधिकरण्यवत्तस्य तद्व्याप्यवत्त्वम-
प्युभयसामानाधिकरण्यग्रहविरोधीति तत्रोक्तलक्षणातिव्याप्तिरित्या-
शंकां लक्ष्यताप्रदर्शनेन निराकरोति यत्र चेति । प्रकरणसमं–पक्षनि-
ष्ठसाध्याभावादिव्याप्यम् । तद्व्याप्यं–पक्षनिष्ठसाध्याभावादिव्या-
प्यव्याप्यम् । तस्य बाधसत्प्रतिपक्षविशेषणत्वाभावादिति शेषः ।
तत्र हेतुमाह पृथगिति । पक्षनिष्ठसाध्याभावादिव्याप्यस्य सत्प्र-

तिपक्षतया स्वतन्त्रपरिगणानात्ताहशस्य साध्यवत्ताज्ञानविरोधि-धीविषयत्वेन हेत्वाभासताविरहाच्चेत्यर्थः । व्यतिरेकव्याप्तिग्रहेति । हेत्वभावत्वावच्छिन्नधर्मिकसाध्याभावव्यापकताग्रहेत्यर्थः । साध्यादे-रित्यादिना साधनस्य साधनाभावस्य च परिग्रहः । अत्यन्ताभा-वाप्रतियोगित्वेनादिपदग्राह्यसाधनस्याप्यन्वयः । अप्रतियोगित्वादि-ना साध्याभावाव्यापकत्वपरिग्रहः । तस्य च साधनाभावेन सम्बन्धः ।

अथाभावाप्रतियोगित्वधीरभावप्रतियोगित्वप्रकारकं ज्ञानं प्रत्येव विरोधिनी न तु तदप्रकारकं साध्याभावव्यापको हेत्वभाव इत्यादि-ज्ञानं प्रति ग्राह्याभावानवगाहित्वात् । न चैतादृशज्ञानेपि संसर्गत-याऽभावप्रतियोगित्वभानादभावाप्रतियोगित्वं ग्राह्याभाव एवेति वा-च्यम् । अभावांशे विशेषणीभवतः साध्यादेरनुयोगितया एव संस-र्गतया प्रतियोगितायास्तत्राभानात् । प्रतियोगितानिरूपकत्वाव-च्छिन्नैवानुयोगिता सम्बन्धो न तु केवला प्रतियोगित्वानुयोगित्वयोः समानवित्तिवेद्यतायाः सिद्धान्तसिद्धत्वादिति चेत् । एवमप्यभाव-प्रतियोगितात्वेन प्रतियोगिताया ग्राह्यताविरहात्तत्तद्रूपावच्छिन्नाभा-वस्य विरोधितानुपपत्तिः ।

यत्तु–अभावे अनुयोगितासम्बन्धावच्छिन्नसाध्याद्यभावस्यैव दो-षतया विवक्षणम्–तदपि न, वाच्यत्वादिसाध्यहेतुकेपि संयोगादि-सम्बन्धावच्छिन्नप्रतियोगिताकस्य द्वित्वाद्यवच्छिन्नप्रतियोगिताक-स्य चाभावस्यानुयोगितासम्बन्धेन साध्यादिसम्बन्धित्वादभाव-त्वावच्छेदेन तत्सम्बन्धावच्छिन्नसाध्याद्यभाववत्त्वाप्रसिद्धेः । अभावत्वसामानाधिकरण्यमात्रेण तद्वत्ताधियश्च अभावत्वसा-मानाधिकरण्यमात्रेण साध्यादिप्रकारकव्यतिरेकव्याप्तिग्रहाविरो-धितया तस्य दोषत्वायोगात् । स्वरूपादिसम्बन्धावच्छिन्न-वाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगितासम्बन्धस्य चा-प्रसिद्ध्या ताहशसम्बन्धावच्छिन्नाभावोप्यप्रसिद्ध इति न ताहशस्य दोषतोपगमसम्भवः । साध्यताद्यवच्छेदकस्य स्वावच्छि-न्नसम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नप्रतियोगि-ताकाभावोऽभावांशे ताहशसम्बन्धेन प्रतियोगिविशेषणतापन्नसाध्य-तावच्छेदकादिप्रकारकव्यतिरेकव्याप्तिग्रहविरोधितयाऽनुपसंहारित्व-मित्यपि न सार्वत्रिकं विशेषणान्तरानवच्छिन्नज्ञानत्वादेर्यत्र साध्यता-

द्यवच्छेदकता तत्र स्वरूपतस्तत्प्रकारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुतया तत्र तदभावप्रकारकज्ञानस्य नियमेन तदंशे प्रतियोगितावच्छेदकज्ञानत्वत्वादिप्रकारतया अविरोधित्वात् प्रतियोगितावच्छेदकप्रकारकप्रतियोगिमत्ताबुद्धेरेव समानप्रकारकतया अभावग्रहप्रतिबध्यत्वात् वृत्त्यनियामकसम्बन्धस्य संसर्गाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावाप्रसिद्धेश्च । एतेन तत्सम्बन्धेन तत्प्रकारकबुद्धौ समानधर्मिकतत्सम्बन्धावच्छिन्नतदभाववत्ताबुद्धिवत् तद्धर्मस्य तेन सम्बन्धेन असम्बद्धत्वग्रहस्यापि प्रतिबन्धकत्वमानुभविकम् । अत एव साध्यादेरवृत्तित्वस्य बाधादिप्रभेदतोक्तिरपि सङ्गच्छते । एवं च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमिति यथाश्रुतस्यैव सङ्गतिरित्यप्ययुक्तम्—केवलान्वयिन्यपि द्वित्वाद्यवच्छिन्नाभावप्रतियोगित्वेसत्त्वेन तन्निष्ठतदप्रतियोगित्वासिद्धेः । स्वरूपादिसम्बन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तदभावस्याप्रसिद्धेः । साध्यताद्यवच्छेदकसम्बन्धविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारित्वमित्यपि स्वरूपतो ज्ञानत्वादिसाध्यतावच्छेदकस्थले न सम्भवति निर्विशेषणकज्ञानत्वादिविषयकव्याप्तिग्रहे ज्ञानत्वत्वादिप्रकारेणासम्बद्धत्वग्रहस्यासमानप्रकारकतयाऽविरोधित्वात् । साध्यतावच्छेदकावच्छेदेन वर्त्तमानः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमिति प्रगल्भानुमतमननुमतमेव दीधितिकृता व्याप्तिवादे निराकृतत्वात् ।

अत्राहुः विशिष्टबुद्धौ विशेष्ये प्रकाराभावग्रहवद्विशिष्टसंसर्गकबुद्धौ संसर्गे संसर्गतावच्छेदकाभावग्रहोऽपि विरोधी संसर्गविशेषावच्छिन्नविषयताया एव ग्राह्याभावधीप्रतिबध्यतावच्छेदकत्वात् विशिष्टसंसर्गकबोधस्थले संसर्गतावच्छेदकीयवैशिष्ट्यस्यापि संसर्गतान्तःपातिसंसर्गतया संसर्गतावच्छेदकविषयताया अपि संसर्गावच्छिन्नत्वात् । एवं च वाच्यत्वत्वाद्यवच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वोभयविशेषितप्रतियोगितासंसर्गके वाच्यत्वाभावव्यापको हेत्वभाव इति ज्ञाने प्रतियोगितात्वावच्छेदेन तदुभयाभावग्रहस्य विरोधितया तद्विषयतादृशाभावोऽनुपसंहारित्वमिति विवक्षितम् । अधिकमन्यत्रानुसन्धेयम् ।

ननूक्तलक्षणस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारण्येऽति-

तिपक्षतया स्वतन्त्रपरिगणनात्ताद्दशस्य साध्यवत्त्वाज्ञानविरोधिधीविषयत्वेन हेत्वाभासताविरहाच्चेत्यर्थः । व्यतिरेकव्याप्तिग्रहेति। हेत्वभावत्वावच्छिन्नधर्मिकसाध्याभावव्यापकताग्रहेत्यर्थः । साध्यादेरित्यादिना साधनस्य साधनाभावस्य च परिग्रहः । अत्यन्ताभावाप्रतियोगित्वेनादिपदग्राह्यसाधनस्याप्यन्वयः। अप्रतियोगित्वादिना साध्याभावाव्यापकत्वपरिग्रहः। तस्य च साधनाभावेन सम्बन्धः ।

अथाभावाप्रतियोगित्वधीरभावप्रतियोगित्वप्रकारकं ज्ञानं प्रत्येव विरोधिनी न तु तदप्रकारकं साध्याभावव्यापको हेत्वभाव इत्यादिज्ञानं प्रति ग्राह्याभावानवगाहित्वात् । न चैताद्दशज्ञानेपि संसर्गतयाऽभावप्रतियोगित्वभानादभावाप्रतियोगित्वं ग्राह्याभाव एवेति वाच्यम्। अभावांशे विशेषणीभवतः साध्यादेरनुयोगिताया एव संसर्गतया प्रतियोगितायास्तत्राभानात् । प्रतियोगितानिरूपकत्वावच्छिन्नैवानुयोगिता सम्बन्धो न तु केवला प्रतियोगित्वानुयोगित्वयोः समानवित्तिवेद्यतायाः सिद्धान्तसिद्धत्वादिति चेत् । एवमप्यभावप्रतियोगितात्वेन प्रतियोगिताया ग्राह्यताविरहात्तत्तद्रूपावच्छिन्नाभावस्य विरोधितानुपपत्तिः ।

यत्तु-अभावे अनुयोगितासम्बन्धावच्छिन्नसाध्याद्यभावस्यैव दोषतया विवक्षणम्-तदपि न, वाच्यत्वादिसाध्यहेतुकेपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य चाभावस्यानुयोगितासम्बन्धेन साध्यादिसम्बन्धित्वादभावत्वावच्छेदेन तत्सम्बन्धावच्छिन्नसाध्याद्यभाववत्त्वाप्रसिद्धेः । अभावत्वसामानाधिकरण्यमात्रेण तद्वत्ताधियश्च अभावत्वसामानाधिकरण्यमात्रेण साध्यादिप्रकारकव्यतिरेकव्याप्तिग्रहाविरोधितया तस्य दोषत्वायोगात् । स्वरूपादिसम्बन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगितासम्बन्धस्य चाप्रसिद्ध्या ताद्दशसम्बन्धावच्छिन्नाभावोप्यप्रसिद्ध इति न ताद्दशस्य दोषतोपगमसम्भवः । साध्यताद्यवच्छेदकस्य स्वावच्छिन्नसम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽभावांशे ताद्दशसम्बन्धेन प्रतियोगिविशेषणतापन्नसाध्यतावच्छेदकादिप्रकारकव्यतिरेकव्याप्तिग्रहविरोधितयाऽनुपसंहारित्वमित्यपि न सार्वत्रिकं विशेषणान्तरानवच्छिन्नज्ञानत्वादेर्यत्र साध्यता

द्यवच्छेदकता तत्र स्वरूपतस्तत्प्रकारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुतया तत्र तदभावप्रकारकज्ञानस्य नियमेन तदंशे प्रतियोगितावच्छेदकज्ञानत्वत्वादिप्रकारताया अविरोधित्वात् प्रतियोगितावच्छेदकप्रकारकप्रतियोगिमत्ताबुद्धेरेव समानप्रकारकतया अभावग्रहप्रतिबध्यत्वात् वृत्त्यनियामकसम्बन्धस्य संसर्गाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावाप्रसिद्धेश्च । एतेन तत्सम्बन्धेन तत्प्रकारकबुद्धौ समानधर्मिकतत्सम्बन्धावच्छिन्नतदभाववत्ताबुद्धिवत् तद्धर्मस्य तेन सम्बन्धेन असम्बद्धत्वग्रहस्यापि प्रतिबन्धकत्वमानुभविकम् । अत एव साध्यादेरवृत्तित्वस्य बाधादिप्रभेदतोक्तिरपि सङ्गच्छते । एवं च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमिति यथाश्रुतस्यैव सङ्गतिरित्यप्ययुक्तम्–केवलान्वयिन्यपि द्वित्वाद्यवच्छिन्नाभावप्रतियोगित्वेसत्त्वेन तन्निष्ठतदप्रतियोगित्वासिद्धेः । स्वरूपादिसम्बन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तदभावस्याप्रसिद्धेः । साध्यताद्यवच्छेदकसम्बन्धविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारित्वमित्यपि स्वरूपतो ज्ञानत्वादिसाध्यतावच्छेदकस्थले न सम्भवति निर्विशेषणकज्ञानत्वादिविषयकव्याप्तिग्रहे ज्ञानत्वत्वादिप्रकारेणासम्बद्धत्वग्रहस्यासमानप्रकारकतयाऽविरोधित्वात् । साध्यतावच्छेदकावच्छेदेन वर्त्तमानः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमिति प्रगल्भानुमतमननुमतमेव दीधितिकृता व्याप्तिवादे निराकृतत्वात् ।

अत्राहुः विशिष्टबुद्धौ विशेष्ये प्रकाराभावग्रहवद्विशिष्टसंसर्गकबुद्धौ संसर्गे संसर्गतावच्छेदकाभावग्रहोपि विरोधी संसर्गविशेषावच्छिन्नविषयताया एव ग्राह्याभावधीप्रतिबध्यतावच्छेदकत्वात् विशिष्टसंसर्गकबोधस्थले संसर्गतावच्छेदकीयवैशिष्ट्यस्यापि संसर्गतान्तःपातिसंसर्गतया संसर्गतावच्छेदकविषयताया अपि संसर्गावच्छिन्नत्वात् । एवं च वाच्यत्वत्वाद्यवच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वोभयविशेषितप्रतियोगितासंसर्गके वाच्यत्वाभावव्यापको हेत्वभाव इति ज्ञाने प्रतियोगितात्वावच्छेदेन तदुभयाभावग्रहस्य विरोधितया तद्विषयतादृशाभावोऽनुपसंहारित्वमिति विवक्षितम् । अधिकमन्यत्रानुसन्धेयम् ।

ननूक्तलक्षणस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारण्येऽति-

व्याप्तिः तज्ज्ञानस्यापि हेत्वभावप्रतियोगिकाभावे हेतोः साध्याभावसामानाधिकरण्यावगाहितया हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वज्ञानाविरोधित्वात् साध्याभावसमानाधिकरणत्वेन भासमानेऽभावे हेत्वभावप्रतियोगिकत्वग्रहस्य तुल्यवित्तिवेद्यतया हेत्वभावे तादृशाभावप्रतियोगित्वावगाहनादित्यभिमानं निराकरोति वह्न्यभावभावात्वेनेति ।कदाचिद्विरुन्ध्यादिति । सम्भावनायां लिङ् । तुल्यवित्तिवेद्यतायां मानाभावात् भावे वा ।इहापि असमानप्रकारकतया उक्तज्ञानस्य व्यापकताज्ञानाविरोधिताया विचारासहत्वादनिर्भरः । न तु वन्हित्वेनेति । तेन रूपेण भाने हेत्वभावांशे प्रतियोगिताया असंस्पर्शादिति भावः । नातिप्रसङ्ग इति । हेतुतावच्छेदकावच्छिन्नस्य साध्याभाववद्वृत्तिताया एव साधारणत्वात् उक्तबुद्धेर्विरोधितायाः प्रामाणिकत्वे हेत्वभावाभावत्वावच्छिन्नस्य साध्याभाववद्वृत्तिताया लक्ष्यत्वादेवेति भावः । तत्सम्भवेपि–अभावाप्रतियोगित्वरूपानुपसंहारित्वसम्भवेपि, अन्वयव्याप्त्युपादानेन-अन्वयव्याप्तिधीसम्भवेन, नानुमितिप्रतिरोधः—विशेषदर्शिनोपि नानुमित्यनुत्पादः । न चैवमपि केवलान्वयिसाध्यकहेतोराभासतया तत्प्रयोक्तुर्निग्रहप्रसङ्ग इति वाच्यम् । अभिमतसाधकताविघटकाभासस्यैव निग्रहप्रयोजकतया अन्वयिमुद्रया गमकता यत्राभिमता तत्र निग्रहायोगात् व्यतिरेकिप्रयोगे निग्रहस्येष्टत्वात् इति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितायां अनुमानगादाधर्यामनुपसंहारिप्रकरणम् ।

अथानुमानगादाधर्यां

विरुद्धप्रकरणम् ।

(चि०) विरुद्धो न साध्याभावव्याप्यः, संयोगसाध्यके सद्धेतावतिव्याप्तेः । नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम्, इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगादिव्याप्येऽतिव्याप्तेः । किन्तु साध्यासमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा । साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणम्, तेनाभावे साध्येऽभावाभावस्य भावत्वेऽपि नाव्याप्तिः । अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावाभिन्न एव वा । न च भावत्वेनैवोपपत्तौ किमधिकेनेति वाच्यम् । बाधकं विनाऽभावप्रतीतेः प्रमात्वात्, अन्यथा अत्यन्ताभावाऽन्योन्याभावयोरप्रसिद्धिः ।

(दी०) साध्याविरोधित्वं साध्यप्रतियोगिकत्वम् । एकदेशिमतेनाह अभावेत्यादि । न च भावस्य स्वाभावविरहात्मकत्वरूपप्रतियोगित्वग्राहिधर्म्मिग्राहकमानबाधः, प्रतियोगित्वस्य सम्बन्धान्तरत्वात् । स्वस्याभावस्येत्यत्र षष्ठ्यर्थस्य तस्यावश्याभ्युपेयत्वात् । विरहत्वञ्च नाभावत्वं, बाधात् । नापि तद्ग्रहप्रतिबन्धकग्रहाविषयत्वम्, अविरोधात् प्रत्यक्षेण दुर्ग्रहत्वाच्च । न चानवस्था, अभावस्य स्वाभावाभावत्वे बाधकाभावात् । भावस्य तथात्वे बाधकमाह बाधकं विनेत्यादि । अभावप्रतीतेः-अभावत्वविशि-

ष्टप्रतीतेः। अभावत्वञ्च न भावभिन्नत्वं प्रथमं दुर्ग्रहत्वात्, किन्त्वयमभावो न भाव इति प्रतीतिसाक्षिकं पदार्थान्तरम्, तच्चानुपस्थितं निर्विकल्पकोपस्थितं वा प्रकारः, अभावत्वञ्चासमवेतत्वान्न जातिः । अन्यथेति। अनतिप्रसक्तैरधिकरणैस्तद्धर्म्मैर्वा अभावव्यवहारोपपत्तेरिति भावः । लाघवादबाधिताभावत्वविशिष्टप्रत्ययबलाच्चातिरिक्तैकाभावसिद्धिस्तुल्यैव। एतेनाभावत्वं सप्रतियोगिकत्वं तच्चाननुगतानामप्यावश्यकानां प्रतियोगिनां कल्प्यते इत्यपास्तम् । संयोगादिसाधारण्याच्च ॥

(गा०)साध्याभावत्वं साध्यविरोधित्वमात्रमित्यत्र मूले साध्यविरोधित्वं यदि साध्यासामानाधिकरण्यं तदा साध्यासमानाधिकरणपदोपादानवैयर्थ्यमिति तद्व्याचष्टे साध्येति। साध्यासमानाधिकरणत्वं साध्यानधिकरणवृत्तित्वं न तु साध्याधिकरणावृत्तित्वमतो न साध्याभावपदोपादानवैयर्थ्यम् । अधिकरणभेदेन संयोगाद्यभावभेदमते इदं लक्षणम्, अतो न संयोगी द्रव्यत्वादित्यादावतिव्याप्तिः। साध्यासमानाधिकरणपदं प्रतियोगिवैयधिकरण्यविशिष्टार्थकमित्यपि केचित् । तन्न, साध्याभावप्रतियोगित्वेन साध्योपादानस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् । मूलस्थमात्रपदेन भावव्यावर्त्तकाभावत्वनिवेशव्यवच्छेदः।

अभावाभावस्य अभावप्रतियोगिकस्य भावत्वेपि भावतयाऽभावत्वाविरहेपि अभावत्वानिवेशाभ्युपगमेनाभावाभाव इत्यादिकल्पान्तराभिधानस्य सिद्धान्तत्वभ्रमनिरासायाह दीधितौ एकदेशीति।ननु घटाभावो नास्तीत्यादिप्रतीत्या घटाभावाभावत्वविशिष्टधर्मो सिध्यति तस्यातिरिक्तत्वं च सैव विरुणद्धि तस्या एव घटादिरूपभावे स्वाभावाभावत्वरूपस्वाभावप्रतियोगित्वावगाहित्वादित्याशंकते न चेति।संबन्धान्तरत्वात्-अभावत्वान्यसम्बन्धत्वात ।स च सम्बन्धः स्वरूपादतिरिक्तोऽनतिरिक्तो वत्युभयथैव न क्षतिरिति भावः। बाधादित्यस्य भाव इत्यादि। अविरोधादिति। अभावाभावस्यातिरिक्तत्ववादिनापि प्रतियोगिमत्ताज्ञानस्याभावग्रहप्रतिबन्धकत्वापगमादिति भावः। प्रत्यक्षेणेति। तद्ग्रहप्रतिबन्धकग्रहविषयत्वस्य ज्ञानघटितत्वेन चक्षुरयोग्यत्वादिति

भावः । अनवस्था-अतिरिक्तानामभावानामप्यतिरिक्ताभावकल्पना-यामनन्ताभावकल्पनागौरवम् । बाधकाभावादिति । भावस्याभाव-त्वकल्पनयोगादिति भावः ।

मूले भावत्वेनैवेति । घटाभावो नास्तीति प्रतीतेर्घटादिरूपभाव-विषयकत्वेनैवेत्यर्थः । किमधिकेन-घटाद्यतिरिक्तविषयकत्वेन, यथा-तिरिक्तस्यापि तेजोऽभावादेरिदन्त्वादिविशिष्टस्य न प्रतियोगिग्रहसा-पेक्षग्रहत्वं किन्त्वभावत्वावच्छिन्नस्यैव तथा घटत्वादिविशिष्टस्य प्रतियोग्यनिरूप्यत्वेपि घटादेरभावत्वेन प्रतियोगिनिरूप्यत्वे बाधक-विरहादिति भावः । अभावाभावप्रतीतेः प्रमात्वाभिधानस्य भावेऽभा-वप्रतियोगिकत्वबोधकतादृशप्रतीत्यप्रमात्वप्रसंजनसूचकतां स्फुटी-करोति दीधितौ भावस्येति । भावस्याभावप्रतियोगिकत्वेपि घटाभा-वो नास्तीत्यादिप्रतीतेरभावादिवैशिष्ट्यांशे प्रमात्वसंभवाद्भावरूप-प्रतियोगिधर्मितावच्छेदकतापन्नाभावत्वांशे तत्र प्रमात्वानुपपत्तिला-भाय व्याचष्टेऽभावेति । अभावत्वं भाववैधर्म्यं तच्च भावे न संभवती-ति तद्विशिष्टवाचकनञुल्लेखिन्या घटाभावो नास्तीत्यादिप्रतीतेस्तेन रूपेण घटाद्यवगाहित्वे तदंशे प्रमात्वं व्याहन्येतेति मूलाभिप्रायः । अभा-वत्वं यदि भावभिन्नत्वं तदा भावे तदप्रसक्त्या भावेप्यभावत्वस्वीकार इत्यर्थकान्यथेतिमूलानुत्थितिरतोऽभावत्वस्य तदन्यत्वं व्यवस्था-पयति अभावत्वं चेति । प्रथमं-भावत्वादिप्रकारकज्ञानानुत्पत्ति-दशायाम् । अभावो न भाव इति । एतावता तस्य भावभिन्नत्वरूपता निरस्ता तथासत्यभावो न भाव इत्यनयोः समानार्थकतया विषय-भेदाधीनद्विधाभिलापानुपपत्तेः ।

ननु तथाप्यभावत्वस्य निर्विकल्पकाऽवेद्यतायाः सिद्धान्तसिद्ध-त्वाद्विशेषणज्ञानविरहेण प्रथमं तत्प्रकारकप्रत्यक्षानुपपत्तिरित्यत आह तच्चेति । अनुपस्थितमिति । विशिष्टबुद्धौ विशेषणज्ञानहेतुता-या विशेषणभेदेन भिन्नतया अभावत्वविशिष्टबुद्धौ उक्तज्ञानहेतुत्वा-कल्पनादित्यभिप्रायः । ननु केवलप्रमेयत्वादिना अभावत्वादिप्रकार-कोपनीतभानदशायां स्वरूपतोऽभावत्वप्रकारतानैयत्यवारणाय स्व-रूपतस्तत्प्रकारकबुद्धौ लौकिकान्यत्वं कार्यतावच्छेदककोटावनि-वेश्यैव स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुता कल्प्यते लाघवात्, तथाच घटो नास्तीत्यादिलौकिकप्रत्यक्षपूर्वकालेपि स्वरूपतस्तद्विषयकज्ञान-

मपेक्षितमित्याशयेनाह निर्विकल्पकोपस्थितमिति । तथा चाभावत्व-स्य निर्विकल्पकावेद्यत्वप्रवादो भावभिन्नत्वरूपाभावत्वमते एव, तस्य पदार्थान्तरत्ववादिनां तु निर्विकल्पकवेद्यत्वमिष्टमेवेति भावः । नन्वेवमभावत्वस्य नित्यत्वे सत्यनेकव्यक्तिवृत्तितया जातित्वापत्तिरित्यत आह अभावत्वञ्चेति ।

इदं तु बोध्यम् । अभावत्वमनुयोगिताख्यः प्रतियोगिनिरूपितः सम्बन्धविशेषः, स च प्रतियोग्यादिभेदभिन्न एवेत्यनुगमकधर्मान्तरप्रकारेणैव तस्य नास्तीति बुद्धौ प्रकारता ससम्बन्धिकतया च तस्य प्रतियोग्युपरागेणैव भानं निर्विकल्पकवेद्यता चानुगमकधर्मस्यैव । प्रपंचितं चेदमधिकमधस्तात् ।

अधिकरणस्याभावरूपत्वे अभावाधिकरणत्वानुपपत्तेरतस्तद्धर्मैवेति । अभावव्यवहारोपपत्तेरिति । भावेऽभावाभावत्वस्वीकारे भावाभावत्वस्यापि तत्र सम्भवादिति भावः । प्रतिबन्दिमात्रस्यानुत्तरतया युक्तिं दर्शयति लाघवादिति । अनन्तधर्मिष्वभावत्वकल्पनापेक्षया एकत्र तत्कल्पन इत्यादिः । घटत्वाद्यभावाभावस्यातिरिक्तत्वे ईदृशयुक्त्यसम्भवाद्भावो नाभाव इति प्रतीतेर्दुरपन्हवतया अभावत्वं भावव्यावृत्तमेवेति दर्शितयुक्तावेव निर्भरं दर्शयति अबाधितेति । प्रमात्मकेत्यर्थः । एतेन-क्लृप्तधर्मिणां बहुत्वस्य धर्मकल्पनायामबाधकत्वेऽभावमात्रासिद्धिप्रसङ्गेन । संयोगादिसाधारण्याच्चेत्यस्य सप्रतियोगिकत्वस्येत्यादिः । तथाच सप्रतियोगिकत्वस्य नास्तीति प्रतीतिविषयत्वे घटसंयोगादिमत्यपि घटो नास्तीति प्रतीतिः स्यादिति भावः ।

अत्र सिद्धान्तानुसारिणः । अभावत्वं भावाभावसाधारणमेव नास्तीति प्रत्ययनियामकम् । यदि भावो नाभाव इति प्रत्ययः प्रामाणिकः तदा भावव्यावृत्तमप्यभावत्वं तादृशप्रत्ययनियामकतया स्वीक्रियताम्, न तु तदेव नास्तीति प्रत्ययनियामकं तथासत्यनन्ताभावकल्पनया गौरवात् भावाभावसाधारणैकधर्मस्यैव लाघवेन नास्तीति प्रत्ययनियामकतया कल्पनौचित्यात् ।

यत्तु-अनन्तघटादीनां घटाद्यभावाभावत्वकल्पने गौरवाल्लाघवेनातिरिक्तैकैकाभावे तत्कल्पनमुचितमिति । तत्रेदं प्रतिभाति-घटाभावाभावत्वं घटाभावनिरूपितोऽनुयोगिताविशेषः, स च घटनिष्ठ-

घटाभावीयप्रतियोगितातो नातिरिच्यते । सा चानन्तघटेषु क्लृप्तैव । न चैवमत्र घटाभावप्रतियोगी अत्र घटाभावाभाव इति प्रतीत्योरविशेषापत्तिः, प्रतियोगितानुयोगितात्वरूपविभिन्नधर्मावगाहनेनैव तद्विशेषात् । "अभावविरहात्मकत्वं वस्तुनः प्रतियोगिते"ति प्रवादविरुद्धश्चायं पन्थाः । घटादेः संयोगादिसम्बन्धस्यैव संयोगादिसम्बन्धावच्छिन्नस्वाभावाभावत्वविशिष्टनिरूपितत्वं स्वीक्रियते न तु समवायादेरतो न कपालादौ संयोगादिसम्बन्धावच्छिन्नघटाभावो नास्तीत्यादिप्रत्ययप्रसङ्ग इत्यलं पल्लवेन ॥

(चि०) अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः, हेतुसत्त्वे साध्याभावसिद्धौ बाधः । न च प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनैवेति वाच्यम् । विशेषणवैयर्थ्यादिति चेन्न ।

हेतोः पक्षे साध्याभावबाधानुपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात् ।

ननु साध्यभावसम्बन्धो व्यभिचार एव दोषो न तु तन्नियतत्वमपि, गौरवात् असाधकत्वे व्यर्थत्वाच्च । न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमकत्वभ्रमरूपायामशक्तौ विशेषोऽस्ति, येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता । न चानैकान्तिकसामान्यलक्षणे विपक्षगामित्वं न विशेषणम् असाधारणाद्यव्याप्तेः, साधारणन्तु सपक्षवृत्तित्वसहितमिति वाच्यम् । विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात् । न च विरुद्धं व्यावर्त्त्यम्, विपक्षगामित्वेनात्रैव तदन्तर्भावात् ।

अथानैकान्तिके विपक्षसम्बन्धेनैव दूषकताबीजम्, आसाधारणाद्यव्याप्तेः, न च तत्रान्यदेव बीजम्,

हेत्वाभासाधिक्यापत्तेरिति चेत्। अस्तु तावदेवम्, तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव।

अन्ये तु विरुद्धलक्षणे न व्यर्थत्वं साधारणस्य व्यवच्छेद्यत्वात्, नाप्यसाधकतानुमितौ एतस्या-पि व्याप्यत्वात्, नीलधूमादौ च व्याप्तिरस्त्ये-वेति न स्वार्थानुमाने दोषः, परस्य तु व्यर्थत्वमधि-कम्, न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति।

तन्न। अर्थो हि लिङ्गम्, न च व्यभिचारावारकवि-शेषणावच्छेदेनापि व्याप्तिर्गौरवादिति वक्ष्यते। न चा-र्थानुगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाश-क्यत्वम्, आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वा-दिति हेतुद्वयोपन्यासे चाधिकं प्रथमेन द्वितीयस्य कृ-तकर्त्तव्यताया दुष्टिबीजत्वात्। न च नीलधूमादित्यादौ विशिष्टकर्त्तव्यमन्येन केनापि कृतम्। धूमवत्त्वादित्य-नेन कृतमिति चेन्न। तथानुपन्यासात्, अन्यथा नीला-नन्वयापत्तेः।

अपरे तु साध्यानवगतसहचारः साध्याभावस-हचारी विरुद्धः। अन्यथा पृथिव्यां मेयत्वेनेतरभेदानु-मानं न विरुद्धं स्यात् साध्याभावाव्याप्यत्वात्। न च तत्साधारणम्, सपक्षासत्त्वात्। न च साध्यसहचारा-ज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि वि-रुद्धत्वादिति प्राहुः।

तन्न। विपक्षगामित्वमात्रं दूषकमित्युक्तत्वात्। अत एव व्यभिचारितो व्यतिरेक्यनैकान्तिक एव। नापि साध्याभावसाधकत्वं तत्प्रमापकत्वं वा, साध्याभावस-

म्बन्धबुद्धिं विना तदज्ञानात् । नापि साध्यवदन्यत्व-व्याप्यत्वम्, व्याप्यत्वविवेचने व्यर्थविशेषणत्वात् । नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम्, साध्याभावस्य हेतुव्यापकत्वप्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वात् ॥

(दी०) गमकत्वभ्रमेति । व्यभिचारिण्यव्यभिचारमात्रे विरुद्धे च समानाधिकरण्यांशेऽपि भ्रम इति । अशक्तौ विशेष इति । दूषकतायां तुल्यत्वेऽपि निग्रहस्थानत्वेन विशेषाद्भेदेनोपन्यासः । अत एवानैकान्तिकसामान्यलक्षणे साधारणलक्षणे च विरोधवारकं विशेषणम् छलजात्योर्निग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्ववदेतस्यानैकान्तिकविशेषसाधारणविशेषत्वेऽप्यदोषो वेति पुनराकरानुसारी पन्थाः ।

नापीत्यादि । व्यापकत्वं व्याप्यव्यापकसामानाधिकरण्यघटितं न वा ? आद्ये साध्याभावस्येति । द्वितीये तु नाभासत्वमविरोधात् ॥

(गा०)साधारणविरुद्धयोर्गमकत्वभ्रमरूपाशक्तौ न कश्चिद्विशेष इति मूलोक्तं दूषयति व्यभिचारिणीत्यादिना । अव्यभिचारमात्र इति भ्रम इत्याग्रिमेणान्वयः । मात्रपदेन साध्यसामानाधिकरण्यभ्रमव्यवच्छेदः । सामानाधिकरण्यांशेपि इत्यपिना अव्यभिचारसमुच्चयः । नन्वेवमप्यनुमितिविरोधिरूपमुभयोरपि साध्याभावसामानाधिकरण्यमेकमेवेति साधारणविरुद्धयोः पृथक्परिगणनमसङ्गतमित्यत आह दूषकतायामिति । अनुमित्यनुपधानप्रयोजकरूपभेदाविरहेपीत्यर्थः । निग्रहस्थानत्वेन विशेषादिति । निग्रहविशेषप्रयोजकत्वेनानैकान्तिकबहिर्भावादित्यर्थः । भेदेनोपन्यासः–विरुद्धस्य स्वातन्त्र्येण परिगणनम् । अत एव–उक्तयुक्त्या विरुद्धस्यानैकान्तिकविशेषबहिर्भूतत्वादेव ।

विरुद्धस्यानैकान्तिकलक्षणाक्रान्तत्वेपि स्वातन्त्र्येण तद्विभजनं सङ्गमयति छलजात्योरिति । छलजात्योः पदार्थविभाजकनिग्रहस्थान-

त्वाक्रान्तत्वेपि यथा पदार्थेषु स्वतन्त्रविभजनमविरुद्धं तथा विरुद्ध-स्यानैकान्तिकविशेषविशेषतया अनैकान्तिकत्वरूपहेत्वाभासविभा-जकरूपाक्रान्तत्वेपि हेत्वाभासेषु स्वतन्त्रविभजनमविरुद्धमित्यर्थः।

मूले विरुद्धलक्षण इति। विरुद्धपक्षेतरभेदानुमान इत्यर्थः। न व्यर्थत्वं न नियमांशस्य व्यर्थत्वम्।

हेतुमन्निष्ठाभावाप्रतियोगित्वरूपायाः साध्याभावनिष्ठहेतुव्याप-कताया हेतुसाध्याभावसामानाधिकरण्याघटिततया तदघटितविरो-धज्ञाने साधारण्यभानस्यावश्यकत्वाभिधानं मूलकृतो न सङ्गच्छत इति तत्सङ्गमनाय वितर्कयति व्यापकत्वमिति। अविरोधित्वादि-ति। ग्राह्याभावाद्यनवगाहने तज्ज्ञानस्य व्याप्तिज्ञानाद्यप्रतिबन्धक-त्वादित्यर्थः।

इति विरुद्धपूर्वपक्षग्रन्थः॥

(चि०) उच्यते। साध्यव्यापकाभावप्रतियोगि-त्वं विरुद्धत्वम्। न च प्रतियोगिनोरनन्वये भासमान ए-व तदभावयोर्व्याप्तिग्रहः, भिन्नग्राहकसामग्रीकत्वात्, अन्यथा व्यतिरेकिविलयापत्तेः।

यद्वा वृत्तिमतः साध्यवदवृत्तित्वं साध्यवद्वृत्ति-त्वानाधिकरणत्वं साध्यासमानाधिकरणधर्म्मत्वं सा-ध्यवद्वृत्तित्वानधिकरणधर्म्मत्वं वा तत्त्वम्। न च व्य-तिरेक्यतिव्याप्तिः। तत्र साध्याप्रसिद्ध्या तथाज्ञानवि-रहात्। असाधारणे च सङ्कर एव, अनेनापि रूपेण तस्य दोषत्वात्। न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वज्ञानमावश्यकं तेन विना सा-ध्यवदवृत्तित्वाज्ञानादिति वाच्यम्। उपजीव्यत्वेन भि-न्नत्वात्, उपजीव्यत्वेऽपि साध्यवति न वर्त्तत इति ज्ञा-

नं स्वतोदूषकमिति चेन्न। असहचारज्ञानस्य विरोधित्वया व्याप्तिग्रहप्रतिबन्धकत्वात्, व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत् ।

(दी०) साध्येत्यादि । हेत्वभावस्य साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहं विरुणद्धीत्यभिप्रायेणेदम् ।

यदि च तदभावाभावत्वेनासामानाधिकरण्यग्रहेऽपि तत्त्वेन सामानाधिकरण्यग्रहो न विरुध्यत इति भाव्यते तदाह यद्वेत्यादि । वृत्तिमत इति धर्मेति च पक्षधर्म्मत्वाविरोधित्वप्रदर्शकं न तु विशेषकम्, दूषकतायामनुपयोगादव्याप्तिकरत्वाच्च । वृत्तिविशेषसूचनाय वा तत्, तेन समवायेन हेतुतायां धूमे नाव्याप्तिः। आद्ययोः साध्यवद्वृत्तित्वतदधिकरणत्वाभावौ चरमयोश्च साध्यवद्वृत्तितत्त्वाधिकरणभेदावर्थाविति भेदः। ज्ञानातिप्रसक्तिं निरस्यति न चेत्यादिना । तेनेत्यादि । साध्याभाववद्गामित्वज्ञानं विना वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्वज्ञानापर्य्यवसानादित्यर्थः । असहचारेति । सहचारः सामानाधिकरण्यम् । व्यभिचारेति। व्यभिचारो न ज्ञायते यस्मात्तद्व्यभिचाराज्ञानमव्यभिचारज्ञानम् । तदयमर्थः-अव्यभिचरितसामानाधिकरण्यरूपाया व्याप्तेरव्यभिचारांशग्रहाविरोधिग्रहविषयतया यथा व्यभिचारो हेत्वाभासस्तथा सामानाधिकरण्यांशग्रहविरोधिग्रहविषयतया विरोधोऽपीति ।

(गा०) ननु हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानस्य व्याप्तिज्ञानादौ ग्राह्याभावाद्यनवगाहितया प्रतिबन्धकत्वं न संभवतीति कथं हेतुनिष्ठताद्दशप्रतियोगित्वस्य विरोधरूपतया सिद्धान्तप्रणयनमित्यत आह हेत्वभावस्येति । तत्प्रतियोगिकेति । हेत्वभावप्रतियोगिकेत्यर्थः । हेत्वभावाभावत्वेन भासमान एव सामानाधिकरण्यग्रहस्तदभावे तुल्यवित्तिवेद्यतया साध्यसमानाधिकरणाभावप्र-

तियोगित्वमवगाहत इति तत्र तादृशप्रतियोगित्वाभावरूपव्यापकताग्रहप्रतिबध्यता न तु हेतुतावच्छेदकरूपेण भासमाने साध्यसामानाधिकरण्यग्रह इत्यरुचेरनुपदं वक्ष्यमाणतया अभिप्रायेणेति ।

यदि चेत्यनन्तरं हेत्वभावे साध्यव्यापकताग्रहदशायामिति पूरणीयम् । तदभावेति । हेत्वभावेत्यर्थः । असामानाधिकरण्यग्रहेपीति । सामानाधिकरण्यग्रहासंभवेऽपि साध्यव्यापकत्वं साध्यासमानाधिकरणस्वभावकत्वरूपं यदि विवक्ष्यते तदा पूरणं विनैव असामानाधिकरण्यग्रहेऽपि इत्यस्यासामानाधिकरण्यग्रहदशायामिति यथाश्रुतार्थकतयैव च संगतिर्बोध्या । तत्त्वेन-हेतुतावच्छेदकरूपेण, अवृत्तिहेतोर्विरुद्धत्वस्यावृत्तितायां विरोधरूपतायाश्चेष्टत्वाद्वृत्तिमत इति धर्मेति च व्यर्थमित्यत आह वृत्तीति । पक्षधर्मत्वाविरोधित्वप्रदर्शकमिति । एतद्दर्शनं च स्वरूपासिद्धिवैलक्षण्यस्य विरोधे लाभायेति ध्येयम् । विशेषकं-विरोधशरीरप्रविष्टार्थकं, दूषकतायां-प्रतिबन्धकतायाम् । अनुपयोगित्वात्-तदर्थविषयताया अनुपयोगित्वात्, अव्याप्तिकरत्वात्-अवृत्तिविरुद्धासंग्रहप्रयोजकत्वात् । वृत्तिविशेषेति । येन सम्बन्धेन विरुद्धत्वमभिमतं तत्संबन्धावच्छिन्नसाध्यवद्वृत्तित्वनिवेशलाभायेत्यर्थः । तन्निवेशनप्रयोजनमाह तेनेति । लक्षणचतुष्टयस्य भेदं स्फुटयति आद्ययोरिति । अभावाविति । अत्यन्ताभावावित्यर्थः । पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ व्यतिरेकिणि साध्यवद्वृत्तित्वसत्त्वाद्धेत्वतिव्याप्तिर्न संभवतीत्याशयेनाह ज्ञानातिप्रसक्तिमिति । हेतुमति साध्यवत्त्वाग्रहेण तत्र साध्यवद्वृत्तित्वग्रहसंभवादिति भावः । असाधारणे शब्दो नित्यः शब्दत्वादित्यादौ वस्त्वतिव्याप्तिशङ्कां लक्ष्यतां स्वीकृत्य निराकुरुते मूले असाधारणे चेति । संकर एवेति । विरोधस्य दोषान्तरसामानाधिकरण्यमिष्टमेवेत्यर्थः । अनेन-विरुद्धत्वेन, तस्य-असाधारणहेतोः दोषत्वात्-दुष्टत्वे क्षतिविरहात् । साध्याभाववद्वृत्तित्वज्ञानाभावस्य साध्यवद्वृत्तित्वाज्ञानप्रयोजकत्वं न संभवति कार्याभावस्य कारणव्यतिरेकाप्रयोजकत्वादिति तेन विनेत्यादिमूलासंगतिरिति तदन्यथा व्याख्यामुपादत्ते दीधितौ तेनेत्यादीति । वृत्तिमत्त्वेति । वृत्तिमत्त्वविशिष्टसाध्यवद्वृत्तित्वरूपहेतुज्ञानघटितसाध्याभाववद्गामित्वानुमितिसामग्र्याः फलोपहितत्वानिर्वाहादित्यर्थः । तथाच सामग्र्याः फ-

लोपधाननियमानुरोधात् तज्ज्ञानस्यावश्यकत्वमिति भावः ।

मूले उपजीव्यत्वेन भिन्नत्वादिति । व्यभिचारज्ञानोपजीव्यत्वेन विरोधस्यापि पृथग्दोषताया आवश्यकत्वादित्यर्थः । न स्वतो दूषकमितीति । उपाध्यादिव न हेत्वाभास इति शेषः । व्याप्तिग्रहप्रतिबन्धकत्वादित्यस्य स्वतोपीत्यादिः । व्यभिचाराज्ञानविरोधित्वेनेति मूलस्य व्यभिचारज्ञानाभावविरुद्धत्वेनेत्यर्थो न संभवति-तावता व्याप्तिज्ञानप्रतिबन्धकत्वालाभादित्यन्यथा तद्व्याचष्ट दीधितौ व्यभिचारेतीति । व्याप्तेरव्यभिचारसामानाधिकरण्यघटितत्वमभिप्रेत्य तत्तदशमानविरोधिनो ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकतां स्फुटीकुर्वन् तद्विषयस्य हेत्वाभासताया निष्प्रत्यूहत्वं दर्शयति तदयमर्थ इत्यादिना ।

(चिं०) ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वम् अयोग्यताज्ञानेन निश्चितान्वयादिति चेन्न । अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात् बाधेऽप्येवम् । स चायं विधिसाधने त्रिविधः—साक्षात्साध्याभावव्याप्यत्वात् साध्यव्यापकाभावव्याप्यत्वात् साध्यव्यापकविरुद्धोपलम्भात् । यथा धूमवानयं योग्यधूमवत्तया अनुपलभ्यमानत्वात् निरग्निकत्वात् जलाशयत्वात् । न च सर्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविविध्यम् । एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात् । न च धूमवानयं तदभाववत्त्वादिति त्रयाधिकम्, स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वम्, तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव ।

निषेधसाधनेऽपि त्रिविधः-प्रतियोग्युपलम्भात् साध्यव्यापकाभावोपलम्भात् साध्यव्यापकविरुद्धो-

पलम्भात । यथा निराग्निकोऽयमाग्नित्वात् धूमाभावशू-न्यत्वात् धूमवत्त्वात् ।

(दी०) स चायं विरुद्धो हेतुः । साध्याभावेति । तदभाव-त्वं तद्वत्ताग्रहाविरोध्यभावत्वम्, तेन साध्यवदन्यत्वव्याप्यत्वोपसं-ग्रहः । एवमुत्तरत्रापि । साध्यव्यापकेति । अत्र व्याप्यपदं स्वरूपप-रम् । साध्येत्यादि । साध्यव्यापकसामानाधिकरण्यग्रहविरोधिरू-पवत्त्वादित्यर्थः । तेन साध्यव्यापकवदवृत्तित्वाद्युपसंग्रहः । सर्वत्र चोपलम्भपदं स्वरूपसिद्धिमात्रफलकम् । साध्याभावेति । व्या-प्यपदव्यत्यासेन साध्याभावव्यापकाभावत्वेन चेत्यर्थः । स्वस-मानेति । तथाच साध्याभावसाध्यव्यापकाभावयोर्निरुक्तसाध्य-व्यापकाभावत्वेनानुगमान्नाधिक्यमित्यर्थः ।

प्रतियोग्युपलम्भात्—स्वरूपतः साध्यवत्त्वग्रहविरोधित्वात्, तेन निर्वह्निकान्यत्वादिसंग्रहः । साध्यव्यापकेति । अत्र व्यापकत्वं भेदाभेदसाधारणं तेन साध्याभावव्याप्यत्वसंग्रहः । धूमवत्त्वा-दिति । धूमाभावस्य वह्न्यभावव्यापकत्वग्रहदशायामस्य मध्यमे-ऽन्तर्भावो, वह्न्यभावव्यापकवह्निसामग्र्या भावाभावव्याप्यत्वग्रहे च चरमे ।

(गा०) विरोधस्यैव निरुक्तत्वात् स चायमित्यस्य तत्परामर्श-कताभ्रमं निराकरोति स चायमिति ।

साध्याभावव्याप्यत्वज्ञानवत् साध्यवद्भेदव्याप्यत्वज्ञानस्यापि विरोधितया तदनभिधाने न्यूनतां परिजिहीर्षुः साध्याभावपदं सा-ध्यतद्वदत्यन्तान्योन्याभावपरतया व्याचष्टे तदभावत्वमिति । साध्या-भावव्याप्यव्याप्यत्वादिवारणायाभावपदं विरोधिताविशेषसूचकम् । उत्तरत्रापि—साध्यव्यापकाभावेत्यत्रापि । अन्यथा साध्यव्यापकवद्भेद-त्वासंग्रहादिति भावः । व्यापकाभावव्याप्यत्वव्यापकविरुद्धत्वयोर्-भेदाद्द्वितीये व्याप्यपदपदार्थाविवक्षामाह व्याप्यपदमिति । विरुद्धप-दस्य तदभावव्याप्यतद्वदवृत्त्युभयपरतामाह साध्यव्यापकेति ।

सामानाधिकरण्यविरोधित्वं तद्ग्रहप्रतिबन्धकधीविषयत्वं न तु तद-धिकरणावृत्तित्वं तदभाववत्वादेरपि तत्सामानाधिकरणावृत्तित्वात् व्यापकवदवृत्तीत्यादिना व्यापकाभावव्याप्यत्वपरिग्रहः । इदं च तदभावव्याप्यत्वग्रहस्य तत्समानाधिकरण्यग्रहविरोधितामंगीकृत्य विरुद्धत्वादिग्रह एव विरोधी न तु तदुपलंभग्रह इत्याशयेनो पलम्भपदानामविवक्षितार्थकतामाह सर्वत्रेति । सर्वत्र-व्यापकविरुद्धोपलंभादित्यत्राग्रिमप्रतियोग्युपलंभादित्यादौ चेत्यर्थः ।

साध्याभावतद्व्यापकाभावव्याप्यत्वेनेत्यत्र मूले व्याप्यपदार्थाविवक्षायां साध्याभावव्याप्यत्वालाभः, तद्विवक्षायां च साध्यव्यापकाभावत्वालाभः अविवक्षिततद्व्याप्यत्वलाभश्चेत्यतो व्याचष्ट साध्याभावेतीति । ज्ञातस्य दोषत्वादिति मूलं ज्ञातस्य विरोधित्वादित्यर्थकं, तथाच सामानाधिकरण्यग्रहविरोधिरूपाणां परिगणनीयतया न तदुपादानविरोध इति भावः । स्वव्यापकतायाः स्वसाधारण्य एव कथं साध्याभावत्वस्य कथितान्तर्भाव इत्याकांक्षायामाह दीधितौ तथा चेति ।

प्रतियोग्युपलंभपदं साध्यभूताभावप्रतियोगितावच्छेदकतद्वद्भेदत्वतदत्यन्ताभावत्वादिसंग्राहकतया व्याचष्टे प्रतियोग्युपलम्भादिति । स्वरूपत इति । विरोधिताविशेषसूचकं साध्यव्यापकाभावत्ववारणाय । विरोधित्वात्-विरोधिज्ञानप्रकारतावच्छेदकधर्मवत्वात् । निर्वह्निकान्यत्वादीति । निरग्निकान्यत्वत्वादीत्यर्थः । साध्यव्यापकविरुद्धोपलम्भादित्यनेन साध्याभावव्याप्यत्वोपग्रहायाह साध्यव्यापकेत्यत्रेति । धूमवत्त्वादीति । तृतीयोदाहरणस्य साध्यव्यापकाभावतया मध्यमप्यन्तर्भावः सम्भवतीति दशाविशेषे व्यापकविरुद्धान्तर्भावं दर्शयति धूमाभावस्येत्यादिना । दशायामित्यनन्तरमेवकारः पूर्यः । मध्यमे-साध्यव्यापकाभावत्वज्ञानविषयतया दुष्टे, ग्रहे-ग्रहदशायां, चरमे-साध्यव्यापकविरुद्धत्वज्ञानविषयतया दुष्टे ।

(चि०) सर्वश्चायं विशेषणद्वारापि । यथा कृष्णागुरुप्रभववह्निमानयं कटुकासुरभिपाण्डुरधूमवत्त्वात् । अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसंकीर्णः क्वचित् ॥

इति विरुद्धचिन्तामणिः ॥

(दी०) इदं पुनरिहावधेयम् । कथितरूपाणि किं स्वरूपतो ज्ञातान्येव सामानाधिकरण्यग्रहविरोधीनि असामानाधिकरण्यव्याप्यत्वेन वा ? नाद्यः—व्यापकाभावव्याप्यत्वादेस्तदसम्भवात् । न द्वितीयः—साध्याभावव्याप्यत्वयोः स्वरूपेणैव ज्ञातयोस्तथात्वात् । तथात्वेऽपि तत्त्वमविरुद्धमिति चेत्, हन्तैवमसामानाधिकरण्यस्य समानाधिकरणावृत्तितद्धर्माणाञ्च तथात्वादाधिक्यम् । न च एतानि धर्म्मिविभाजकान्येव, सर्वेषामेव साध्याभावव्याप्यत्वेनैकविधत्वादिति ।

विरोधोन्नायकप्रकारत्रैविध्येन धर्म्मिणोऽपि त्रैविध्याभिधानमिति वदन्ति । अयञ्चेत्यादि । बाधस्वरूपासिद्ध्यन्यतरसङ्करस्तु आवश्यकोऽन्यसङ्करस्तु काचित्को ज्ञानासङ्कराच्च पार्थक्यम् ।

इति विरुद्धदीधितिः ॥

(गा०) स्वरूपतो ज्ञातान्येवेति एवकारो मध्ये योज्यः, तथाच ग्राह्याभावव्याप्यत्वादिना अज्ञातान्यपि विरोधीनीत्यर्थः । असामानाधिकरण्यव्याप्यत्वेनेति, सावधारणमतो न वक्ष्यमाणदूषणासङ्गतिः । व्यापकाभावव्याप्यत्वादेरित्यादिना व्यापकवदवृत्तित्वपरिग्रहः । स्वरूपेणैव ज्ञातयोरिति । तदभावव्याप्यत्वेनाज्ञातयोरपीत्यर्थः । साध्याभावः साध्यसमानाधिकरण इत्यनाहार्य्यज्ञानानुत्पत्त्या धर्मितावच्छेदकतासम्बन्धेन तत्सामानाधिकरण्यप्रकारकानाहार्य्यबुद्धौ तदभावत्वादिपर्य्याप्तविषयतासम्बन्धेन ज्ञानत्वेन प्रतिबन्धकत्वादिति भावः । यथाकथंचिद्विरोधिरूपाणामेवायं विभाग इत्याशङ्कते तथात्वेपीति । स्वरूपतो विरुद्धत्वेपीत्यर्थः । तत्त्वं—विरुद्धत्वम्, अविरुद्धं—अक्षतम् । असामानाधिकरण्यस्येति । अस्य स्वरूपत एव सामानाधिकरण्यधीविरोधित्वादिति भावः । समानाधिकरणेति । अयमश्वः

साध्यनावत्त्वादित्यादौ साध्यनात्त्वादीनामित्यर्थः । तेषामप्यव्यवत्वाद्य-सामानाधिकरण्यव्याप्यत्वेन विरोधित्वादिति भावः ।

स चायामत्यादिग्रन्थो न सामानाधिकरण्यव्याप्यत्वेन विरोधि-रूपपरिगणनपरः, किन्तु विरुद्धहेतुप्रभेदपरिगणनपर एव, एवं च साध्यासामानाधिकरण्यरूपवतां धर्मिणां साध्याभावव्याप्यत्वादिनै-वोपग्रहान्नाधिक्यमिति शङ्कां निरस्यति न चैतानीति । सर्वषां–साध्य-व्यापकाभावादीनाम् । साध्याभावव्याप्यत्वेनेति । तथा च तेषां पृथ-गुपादानानुपपत्तिरिति भावः । इदमुपलक्षणम् । एतदज्ञानेपीत्यादि-मूलविरोधोपि द्रष्टव्यः ।

विभागं सङ्गमयतां कषांचिन्मतमाह विरोधोन्नायकेति । एवं च साध्याभावव्याप्यत्वादिना ज्ञानस्य यत् दूषकत्वमभिहितं तदपि विरोधिज्ञानद्वारा न तु साक्षादिति न विरोध इति ध्येयम् । विरो-धानुमापकहेतूनामानन्त्यात्त्रैविध्यानुपपत्तेस्तदवस्थैवेत्यस्वरससूच-नाय वदन्तीति ।

मूले सर्वश्चायं विशेषणद्वारापीति । उक्तनिखिलप्रकारो विरुद्धः विशेषणनिबन्धनोपीत्यर्थः । अत्र विशेषणनिबन्धनत्वस्य विरोधरूप-विशेषणे संक्रमो बोध्यः । कृष्णगुर्वित्ति । अत्र विशेष्यधूमत्वावच्छि-न्नस्य साध्यसमानाधिकरणत्वात् कटुत्वादिविशिष्टस्यैव विरुद्धत्वा-दिति भावः । अत्र प्रत्येकविशेषणावच्छिन्नस्यैव विरुद्धता बोध्या । बाधस्वरूपासिद्ध्यन्यतरसङ्करस्यावश्यकतया काचित्कताभिधानं न सङ्गच्छत इत्याशङ्क्य तत्तदुभयानुगमकेतररूपावच्छिन्नसङ्करस्य का-दाचित्कत्वं विवक्षितमित्याह दीधितौ बाधेत्यादिना । ननु विरोध-स्थले दोषान्तरस्यावश्यकत्वे किमस्य दोषताभ्युपगमेनेत्यत आह ज्ञानासङ्करादिति । दोषान्तराज्ञानदशायां विरोधज्ञानेनाप्यनुमिति-प्रतिबन्धादस्य दोषान्तरत्वमावश्यकमिति भावः ॥

इति गदाधरभट्टाचार्यचक्रवर्तिविरचितायां
गादाधर्यां विरुद्धप्रकरणम् ।

श्रीगणेशायनमः ।

अथानुमानगादाधर्यां

सत्प्रतिपक्षप्रकरणम् ।

(चि०) सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वम्, परस्परप्रतिबन्धेनोभयोरबोधकत्वात् । बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात् । नापि समानव्याप्तिपक्षधर्मतावत्त्वम्, विरोधेनैकत्र तद्द्वङ्गनियमात् । नापि व्याप्तिपक्षधर्मतया ज्ञातत्वम्, विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्तश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्याऽऽरोपयितुमशक्यत्वात् । न च साध्यव्याप्यस्य पक्षधर्मता पक्षधर्मस्य वा साध्यव्याप्यतारोप्येति वाच्यम् । एकत्र तदुभयाभावात् विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात् । नाप्यनिर्द्धारितविशेषेण बोधितसाध्यविपर्ययकत्वम्, उभयोरबोधकत्वात् । विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्द्वङ्गनियमात् ।

(दी०) एकत्र तदुभय इति । व्याप्ये पक्षधर्मतायाः पक्षधर्मे च व्याप्यत्वस्यारोपः प्रत्येकमव्यापकोऽतो विशिष्टस्यारोपो वाच्यः, स चैकधर्मिणि विरोधिव्याप्यद्वयविरहाद्विशिष्टस्याप्रसिद्ध्या न सम्भवतीत्यर्थः । विरुद्धादौ साधने स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेश्चेत्यपि द्रष्टव्यम् । एकत्र भङ्गेति । तथा चान्यतरत्वेन तदवधारणमस्तीति भावः ।

(गा०) समानबलेत्यादिमूलस्य प्रकृतसाध्यानुमापकबलशालित्वे सति प्रकृतसाध्याभावानुमापकबलशालिहेत्वन्तरकत्वमित्यर्थः। अत्रानुमापकत्वमनुमितिफलोपहितत्वमनुमितिस्वरूपयोग्यत्वं वा ? आद्ये दूषणमाह परस्परेति । उभयोः-व्याप्तिसहितपक्षधर्मयोः । अबोधकत्वादित्यस्य सत्प्रतिपक्षतादशायामित्यादिः । द्वितीयपक्षे एतद्दोषानवकाशात् बलपदार्थं वितर्क्य दूषयति-बलं चेति । बलपदार्थश्चेत्यर्थः । सपक्षसत्त्वादीति । आदिना पक्षसत्त्वविपक्षासत्त्वयोः परिग्रहः। व्यतिरेकिणीति । अभावात्-सपक्षाप्रसिद्ध्या तत्सत्त्वासम्भवात् । एतदुपलक्षणम् । सर्वत्रैव सत्प्रतिपक्ष एकहेतौ पक्षसत्त्वविपक्षासत्त्वयोरेकतराभावोऽपि द्रष्टव्यः । समानेति सम्पातायातम् । बलपदार्थस्य समानत्वाघटितत्वात् । विरोधेनेति । विरुद्धसाध्यतदभावव्याप्ययोरेकत्रासत्त्वनियमेनेत्यर्थः । तद्भङ्गेति । व्याप्तिपक्षधर्मतयोरेकतराभाव इत्यर्थः । व्याप्तिपक्षधर्मतया-व्याप्तिसहितपक्षधर्मतया, ज्ञातत्वं-ज्ञायमानत्वं, व्याप्तिविशिष्टस्ववैशिष्ट्यज्ञानविषयकत्वमित्यर्थः । तेन 'नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्धे'त्याद्यग्रिममूलसङ्गतिः। नित्यत्वव्याप्येति । शब्दो नित्यः कृतकत्वादित्यादौ श्रावणत्वादिरूपप्रतिहेतौ भ्रमात्मकव्याप्यवत्ताज्ञानस्यारोप्याप्रसिद्ध्यासम्भवेन समानबलत्वासम्भवादित्यर्थः ।

यत्राव्याप्यः प्रतिहेतुः तत्र पक्षधर्मे श्रावणत्वे अन्यत्र प्रसिद्धायाः व्याप्तेरारोप एव बलम् , यत्रापक्षधर्मः प्रतिहेतुः तत्र साध्यव्याप्ये पक्षधर्मत्वारोप एव बलमिति शङ्कायां विशिष्टाप्रसिद्ध्या व्याप्तिविशिष्टपक्षधर्मत्वारोपासम्भवाभिधानमसङ्गतमित्यत आशयं पूरयति दीधितौ व्याप्य इत्यादिना । व्याप्ये-व्याप्तिविशिष्टे, पक्षधर्मे-पक्षधर्मताविशिष्टे, प्रत्येकं व्याप्तिविशिष्टस्वविषयकपक्षधर्मताज्ञानत्वादिना, अव्यापकः-सकलसत्प्रतिपक्षासंग्राहकः,अव्याप्यादिप्रतिपक्षस्य व्याप्त्यादिविशिष्टत्वाप्रसिद्धेरिति भावः । विशिष्टारोपः-व्याप्तिविशिष्टपक्षधर्मतायाः स्वस्मिन्ग्रहः, वाच्यः-बलपदेन विवक्षणीयः। एकधर्मिणीत्यादिकमेकत्रेत्यादिमूलशब्दविवरणम् । विशिष्टस्येति । यादृशसाध्यं पक्षे बाधितं तादृशव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वस्याप्रसिद्ध्या न सम्भवतीति, तथाच नित्यत्वादिव्याप्तिविशिष्टश्रावणत्वाद्यप्रसिद्ध्या यथा व्याप्तिविशिष्टतद्धेतुधर्मिकपक्षधर्मताग्रहोऽप्रसिद्धस्तथा नित्यत्वादिव्या-

त्तिविशिष्टशब्दवृत्तित्वाद्यप्रसिद्ध्या श्रावणत्वादौ तद्ग्रहोऽप्यप्रसिद्ध इति श्रावणत्वादेः समानबलत्वासम्भवेन कृतकत्वादेस्सत्प्रतिपक्षतानुपपत्तिरिति भावः ।

व्याप्तिपक्षधर्मतोभयज्ञानविषयताया बलत्वे नैष दोष इत्यतो दोषान्तरं स्वयमाह विरुद्धादाविति । आदिना साधारणपरिग्रहः । साध्याभाववदवृत्तित्वरूपाया व्याप्तेरन्यत्राप्रसिद्धाया विरुद्धादावप्यारोपसम्भवात् । स्वव्यापकेत्यादि । अप्रसिद्धश्चेति । तज्ज्ञानघटितसमानबलत्वासम्भवे इति शेषः । व्याप्तिप्रकारेण पक्षे स्वप्रकारकज्ञानविवक्षणे सामान्यादौ पक्षे समवायादिरूपहेतुतावच्छेकसम्बन्धेन वृत्तेरप्रसिद्धिर्न क्षतिमावहतीति साऽप्रसिद्धिर्नोक्ता व्याप्तिघटकानां तादृशपदार्थानां खण्डशः प्रसिद्धानां परस्परोपश्लेषावगाहिज्ञानस्य बलतया विवक्षणेन तद्दोषोद्धारसम्भवेपि अन्वयव्यतिरेकव्याप्तिज्ञानयोरननुगमेनेकोपादानेऽन्यत्राव्याप्तिर्दुर्धरैवेति भावः । साध्यवत्ताज्ञानविरोध्यनुमितिसमर्थत्वेनानुगमे तु सिद्धान्त एव पर्यवसानम् ॥

व्याप्तिभङ्गाभङ्ग इति मूलं व्याप्तिपक्षधर्मताप्रमितिविषयत्वतद्भ्रमविषयत्वान्यतररूप इत्यर्थकम् ,एकतरविषयकव्याप्तिपक्षधर्मताज्ञानस्य भ्रमत्वनियमेपि तदनवधारणेनानिर्धारितविशेषत्वसम्भवादेकत्र तद्भङ्गनियमादिति दूषणमसङ्गतमित्यत आह तथा चेति । तादृशभङ्गनियमे चेत्यर्थः । तदवधारणं-भङ्गावधारणम् । अनयोरेकतरं बाध्यं विरुद्धार्थप्रतिपादकत्वादित्यनुमानात्सत्प्रतिपक्षतादशायामप्यस्तीत्यर्थः । यद्यपि अनयोरेकतरमित्यादेः एकत्र पक्षे साध्यतदभावव्याप्यतया हेतुद्वयज्ञानान्यतरद्भ्रमः एकत्र मिथो विरुद्धद्वयसाधकद्वयान्यतरत्वादित्यर्थो न साधु-सद्धेतुपरामर्शेऽप्यन्यतरत्वहेतुसत्त्वेन भ्रमत्वस्याभावेन व्यभिचारात् । न चैकपक्षकहेतुप्रतिहेतुपरामर्शान्यतरत्वं पक्षीकृत्य विरोधिसाधकद्वयवृत्तित्वेन भ्रमवृत्तित्वमेवानुमेयं तादृशान्यतरत्वाश्रये एकत्र भ्रमत्वसत्त्वेनैव तत्र भ्रमवृत्तित्वसत्त्वेन न व्यभिचारप्रसक्तिरिति वाच्यम् । तथासत्यपि घटादिविषयकसमूहालम्बनरूपो यत्र परामर्शस्तत्र घटाद्यंशे भ्रमत्वमादायार्थान्तरवारणाय तत्तद्धेतौ तत्तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमस्य निवेशनीयतया तत्तद्धेतुद्वयान्तर्गतसद्धेतौ तत्तत्साध्यादिव्याप्तिभ्रमाप्रसिद्ध्या साध्याप्रसिद्धेः । तत्तद्धेतुद्वयान्यतरांशे तत्तत्साध्यव्याप्तिपक्षधर्मता

न्यतरभ्रमवृत्तित्वसाधने च विरुद्धार्थसाधकान्यहेतुकपरामर्शद्वया-न्यतरत्वे व्यभिचारः साध्यप्रसिद्धिमात्रेणैव कृतकृत्यता च । तथापि तत्तत्साध्यतदभावव्याप्यवच्छिन्नपक्षधर्मतानिरूपितहेतुविषयताद्वया-न्यतरत्वं पक्षीकृत्य भ्रमत्वानियतविषयतावृत्तित्वमेकधर्मिकविरुद्धा-नुमितिजनकतावच्छेदकविषयताद्वयवृत्तित्वेन साधनीयम् । भ्रमत्वं चानुगतं कथंचिन्निर्वचनीयम् ॥

इति सत्प्रतिपक्षपूर्वपक्षग्रन्थः ॥

(चि०) उच्यते । साध्यविरोध्युपस्थापनसमर्थ-समानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम् । ब-लञ्च व्याप्तिपक्षधर्म्मते । विरोधिबोधकान्यगमकतौप-यिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम् ।

(दी०) सत्प्रतिपक्षितव्यवहारो हि सत्यसति वा साध-ने नापरामृश्यमाणे नाप्यविद्यमानविरोधिपरामर्शे, अत एव सन् प्रतिपक्षो विरोधिव्याप्त्यादिमत्तया परामृष्यमाणो हेतुः विरो-धिपरामर्शो वा यस्य परामृश्यमाणस्य हेतोरसौ सत्प्रतिपक्ष इति विग्रहमपि वर्णयन्ति, अतस्तदनुसारेणैव व्यवहारौपयिकं लक्षण-माह साध्येति । बाधाश्रयासिद्धिनिर्णयवारणाय समर्थान्तम् । न चासौ न व्याप्तिपक्षधर्म्मतात्मकबलोपस्थितिरिति वाच्यम् । व्या-प्तिपक्षधर्म्मताविरहस्य साध्यत्वे पक्षतावच्छेदकत्वे वा तत्सम्भ-वात् । पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभावव्याप्य-वदिति पक्षस्य, व्यापकभेदेन अन्वयव्यतिरेकभेदेन च व्या-प्तेश्च भिन्नत्वादेकोपादानेऽन्यसंग्रहेण बलस्याविवक्षितत्वाच्च । साध्यधीविरोध्यनुमितिजनकज्ञानाविषयत्वेन तदुपादाय तदुप-स्थित्यभिधानञ्च शिरोवेष्टनेन नासिकास्पर्शमनुधावति । साध्यस्य साध्यसिद्धेर्विरोधिन्याः पक्षो न साध्यवानित्याद्युपस्थितेः, सा-

ध्यत्विरोधी साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयो बाधः साध्याभावादिस्तदुपस्थितेर्वा जननयोग्यया समानया बलोपस्थित्या तथाविधव्याप्त्यादिबुद्ध्या प्रतिरुद्धं कार्य्यं यस्य तादृशलिङ्गत्वमित्यर्थः । विरोधिव्याप्त्यादिविषयत्वलक्षणयोग्यताशालिन्या अप्युपस्थितेरप्रामाण्यग्रहे सत्प्रतिपक्षत्वासम्पादकत्वात् कार्य्यप्रतिरोधानुधावनम् । समानत्वञ्चागृहीताप्रामाण्यकसाध्यासिद्ध्यौपयिकपरामर्शकालीनत्वम् । असति गृहीताप्रामाण्यके वा परामर्शे सत्प्रतिपक्षितत्वव्यवहारविरहात् ।

(गा०) उच्यते इत्यादि ग्रन्थस्य दोषनिर्वचनपरत्वं न सम्भवति साध्यविरोध्युपस्थानेत्यादेर्ज्ञानस्य ग्राह्याभावाद्यनवगाहितयाऽनुमित्यप्रतिबन्धकतया तस्य हेत्वाभासत्वासंभवादिति सत्प्रतिपक्षनिर्वचनपरतया व्याख्यातुकामो व्यवहारविषयमवधारयति सत्प्रतिपक्षितेति । सत्यसति वेति । समीचीने ऽसमीचीने वेत्यर्थः । तथाच सद्धेतावुक्तलक्षणस्यातिप्रसंगो दशाविशेषे न दूषणावह इति भावः । अपरामृश्यमाण इति । प्रकृतसाध्यासिद्ध्यौपयिकस्वविषयकपरामर्शदशानवच्छिन्न इत्यर्थः । एतेन साध्यसिद्ध्यौपयिकपरामर्शकालीनत्वरूपसमानत्वनिवेशसार्थक्यं दर्शितम् । असति गृहीताप्रामाण्यके च परामर्शे सत्प्रतिपक्षव्यवहारविरहादित्यग्रिमग्रन्थश्चासतीत्यस्य दृष्टान्तविधया प्रदर्शनेन गृहीताप्रामण्यकत्वांशमात्रव्यावृत्तिप्रदर्शनपर इति न पौनरुक्त्यम् । अविद्यमाने विरोधिपरामर्शे इति । विरोध्यनुमितियोग्यपरामर्शदशानवच्छिन्न इत्यर्थः । एतेन बलोपस्थितिप्रतिरुद्धकार्यकत्वांशनिवेशप्रयोजनं दर्शितम् । अतएवेति । प्रकृतपरामर्शस्य विरोधिपरामर्शस्य चासत्त्वदशायां सत्प्रतिपक्षव्यवहारविरहादेवेत्यर्थः । अतीतानागतप्रतिहेतुपरामर्शदशायामपि सत्प्रतिपक्षत्वात्प्रतिपक्षपदस्य हेतुपरतापक्षं परित्यज्य परामर्शपरतामाह विरोधिपरामर्शेति । परामृश्यमाणस्येति । यद्यप्यन्यपदार्थे परामृश्यमाणत्वं न शब्दतो लभ्यते तथापि प्रतिपक्षपदस्यैव फलोन्मुखस्वकार्यप्रतिरोधकपरतया परामृश्यमाणस्वकार्यानुमितिविरोधिपरामर्शपरत्वात् फलितार्थविवरणमिदम् । तदनुसारेण—तादृशव्यवहारानु-

सारेण । बाधाश्रयासिद्धिवारणायेति । तद्दशायामतिव्याप्तिवारणाये-त्यर्थः । तयोरपि साक्षादनुमितिप्रतिबन्धकत्वादिति भावः । न चा-श्रयासिद्ध्यादिनिर्णयस्यानुमितिप्रतिबन्धकत्वेपि तस्य परामर्शेनापि समं विरोधात्परामर्शकाले तत्समवधानं दुर्घटमिति वाच्यम् । लौ-किकसन्निकर्षादेव तत्सम्भवात् । आश्रयसिद्धिपदं साध्याप्रसिद्धे-रप्युपलक्षणम् । बलपदेनैव तद्वारणात् समर्थान्तवैयर्थ्यमित्याशंकां निराकरोति न चासावित्यादिना । असौ—बाधादिनिर्णयः । व्या-प्तीति । धूमो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभाववान् पर्वताद्य-वृत्तित्वात् तादृशाभाववान्धूमो गुणवान् द्रव्यत्वादित्यादौ धू-मादेर्वह्न्यादिव्याप्तिविशिष्टपक्षधर्मतानिश्चयरूपबाधाश्रयासिद्धिनिर्ण-यस्य व्याप्तिपक्षधर्मतात्मकबलोपस्थितित्वसम्भवादिति भावः । ननु बलपदं प्रकृतसाध्याभावव्याप्तिविशिष्टप्रकृतपक्षधर्मतापरमिति नायं दोषः प्रकृते वन्हिव्याप्तिविशिष्टपर्वतवृत्तित्वव्याप्तिविशिष्टधूम-वृत्तितायाः एव बलत्वादित्यत आह पक्ष इति । इतीत्यस्य प्रतिरोध-कज्ञानविषयस्येति शेषः । पक्षस्य व्याप्तेश्च भिन्नत्वादित्यर्थः । प्रथ-मे प्रकृतपक्षस्य द्वितीये प्रकृतसाध्यस्य पक्षतया पक्षभेदः । व्याप्तेर्भे-दकद्वयमाह व्यापकेत्यादि । व्यापकभेदेनेति । व्यापकयोः साध्याभा-वपक्षवृत्तित्वाभावयोर्भेदेनेत्यर्थः । अन्वयव्यतिरेकभेदेनेति । एक-साध्यगमकव्याप्तेरप्यन्वयव्यतिरेकरूपनिरूपकभेदेनेत्यर्थः । अविव-क्षितत्वात्–विवक्षितुमशक्यत्वात् । नन्वनुगतरूपेण सकलव्याप्तिप-क्षधर्मतानिवेशे नायं दोष इत्यत आह साध्येति । शिरोवेष्टनेनेति । तादृशानुमितिजनकज्ञानत्वेन प्रतिरोधकज्ञानस्यैव निवेशात्तद्विषय-कत्वेन पुनस्तन्निवेशोऽनुचित इत्यर्थः । तथाच विरोध्युपस्थापनस-मर्थत्वेनैवोपस्थितिनिवेशो युक्त इति भावः । उपस्थितेर्विरोधित्वं प्र-तिबन्धकत्वं तच्च न साध्यनिरूपितमिति साध्यपदन्तदनुमितिपरतया व्याचष्टे साध्येत्यादि । इत्याद्युपस्थितेरित्यादिना साध्यं पक्षावृत्तीत्या-दि उपस्थितिपरिग्रहः । उपस्थापनेत्यत्र धात्वर्थोपस्थितौ विरोध्य-न्तस्य स्तोकं नम्रेत्यादौ नमने स्तोकस्येवाभेदान्वयः प्रयत्नेनोपपा-द्यः, एतदस्वरसेन साध्यपदस्य मुख्यार्थपरत्वानुरोधेन च कल्पान्त-रमाह साध्यविरोधीति । तद्वत्ताज्ञानप्रतिबन्धकज्ञानविषयत्वस्यैव विषयविरोधिरूपत्वात्साध्यवत्ताज्ञानविषय इति विवरणसङ्गतिः ।

साध्याभाववत्पक्षादिरित्यादिना पक्षावृत्तित्वादिविशिष्टसाध्यादिप-
रिग्रहः। एतच्च फलितकथनम्। तदुपस्थितेरिति। तादृशपक्षादेः
कर्मतया उपस्थितिक्रियायामन्वयो युक्त एवेति भावः।

अथैवं पक्षे साध्यवति साध्याभाववत्पक्षादेरप्रसिद्धया सत्प्रति-
पक्षितसद्धेतावव्याप्तिरिति चेन्न। यद्रूपावच्छिन्ने धर्मिणि यद्रूपा-
वच्छिन्नवत्ताज्ञानं पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छि-
न्नवत्ताज्ञानप्रतिबन्धकं तद्रूपावच्छिन्ने पक्षे तद्रूपावच्छिन्नसाध्यका-
नुमितिजननयोग्योपस्थितिप्रतिरुद्धकार्यकत्वाविवक्षणात्। यत्र बाधो
दोषस्तत्रैव सत्प्रतिपक्षो दोषः प्रतिहेतुपरामर्शसंवलनदशायां तत्रैव
हेतौ सत्प्रतिपक्षव्यवहारो यथार्थ इत्याशयेनैवैतत्कल्पानुसरणम्।
तथाच साध्यवत्पक्षकहेतोरलक्ष्यतया न तत्राव्याप्तिरित्याहुः।

वस्तुतस्साध्यवत्ताज्ञानप्रतिबन्धकज्ञानत्वेनोपस्थितिर्लक्षणे निवे-
शनीया तादृशज्ञानविषयविषयत्वेन तन्निवेशनस्य शिरोवेष्टनेनेत्या-
दिन्यायेन हेयत्वात्। साध्यादिपक्षकसाध्यतावच्छेदकाद्यभावव्या-
प्यवत्तापरामर्शवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वेनाप्युपस्थि-
तिर्विशेष्या। जननयोग्ययेति। जननं ण्यर्थः योग्यत्वं च समर्थपदा-
र्थः बले समानत्वं न विवक्षणीयं तस्याविवक्षितत्वादपि तु उपस्थि-
तावेवेति स्फुटीकर्तुं समानयत्यसमासालिखनम्। तथाविधव्याप्ति-
बुध्या—साध्याभावादिव्याप्तिबुद्ध्या। एतदपि वस्तुकथनम्। तया प्र-
तिरुद्धत्वं च तत्प्रयुक्तानुत्पादप्रतियोगित्वम्। वह्निव्याप्याभावादिसा-
ध्यकस्थले वह्न्यादिमत्पक्षविषयकानुमितिजननयोग्यथा वह्न्यादि-
व्याप्यवत्पक्षोपस्थित्या बाधनिश्चयरूपया कार्यप्रतिरोधदशायामति-
व्याप्तिवारणाय साध्यवत्ताज्ञानप्रतिबन्धकत्वं प्रथमोपस्थितिविशेष-
णम्, वह्न्यादिव्याप्यवत्पक्षोपस्थितेरपि साध्यवत्ताज्ञानप्रतिबन्धिकां व-
ह्निव्याप्यादिमत्पक्षविषयकसमूहालम्बनरूपवन्ह्यादिमत्पक्षविषयकानु-
मितिं प्रति स्वरूपयोग्यतया यथाश्रुते उक्तातिव्याप्तेर्दुर्वारतया सा-
ध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठका-
र्यतानिरूपितकारणताश्रयत्वपर्यन्तं समर्थान्तेन विवक्षणीयम्। न च
साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूता साध्याभावादिप्रकारता
तद्विधेयतैव प्रतिहेतुपरामर्शजन्यतावच्छेदिकेति तज्जन्यताया न प्र-
तिबन्धकतावच्छेदकविषयतावच्छिन्नत्वमित्युक्तविवक्षायामसम्भव

इति वाच्यम् । प्रकारताविशेषस्यैव विधेयतात्वात्, अन्यथा तु यदव-च्छिन्नविशेष्यकयदवच्छिन्नप्रकारकत्वं प्रतिबन्धकतावच्छेदकं तदव-च्छिन्नपक्षकतदवच्छिन्नविधेयकत्वावच्छिन्नकार्यतानिरूपितकारण-त्वमेव निवेश्यम् ।

ननु तादृशोपस्थितिकालीनज्ञानविषयत्वमेव सम्यक् किं तत्प्र-तिरुद्धकार्यकत्वनिवेशेनेत्यत आह विरोधीत्यादि । अप्रामाण्यग्रहवि-शिष्टाया व्याप्त्याद्युपस्थितेर्न विरोध्यनुमितिजननयोग्यत्वं तदग्रह-विशिष्टत्वेनैव परामर्शस्यानुमितियोग्यत्वादिति न तादृशोपस्थिति-मादायातिव्याप्तिप्रसक्तिरित्याशङ्कां निराकरोति विरोधिव्याप्त्यादि-विषयत्वलक्षणयोग्यताशालिन्या इति । जनकतावच्छेदकतापर्या-प्त्यधिकरणत्वरूपयोग्यता नात्र विवक्षिता, किन्तु जनकतावच्छेदक-कोटिप्रविष्टविषयतारूपैवेति भावः । अथवा अप्रामाण्यग्रहाभावो नानु-मितिजनकतावच्छेदकोऽपि तु स्वातन्त्र्येण जनक एवेत्यभिप्रायेणै-तत् । कार्यप्रतिरोधानुधावनमिति । तथा चाप्रामाण्यग्रहाभावविशि-ष्टविरोधिपरामर्शस्यैवानुमितिप्रतिबन्धकतयागृहीताप्रामाण्यकविरो-धिपरामर्शस्य कार्याप्रतिरोधकत्वान्नोक्तस्थलेऽतिप्रसङ्गः । यद्यपि अ-प्रामाण्यज्ञानास्कन्दितपरामर्शस्यागृहीताप्रामाण्यबाधादिरूपत्वे तद्वि-रुद्धकार्यकत्वमपि दुर्वारमिति यथाश्रुतेऽतिव्याप्तिरस्त्येव, तथापि विरोध्यनुमितिजनकतावच्छेदकरूपस्य कार्यप्रतिरोधप्रयोजकताव-च्छेदकताविवक्षणेनातिव्याप्तिवारणीया । न च यत्र विरोधिपराम-र्शानन्तरक्षणे तद्विषयकाप्रामाण्यग्रहो जायते तत्र पूर्वक्षणेऽप्रामा-ण्यग्रहाभावविशिष्टतज्ज्ञानरूपप्रतिबन्धकसत्त्वेन तत्क्षणे कार्यानु-त्पादात्तत्क्षणे सत्प्रतिपक्षत्वं दुर्वारमिति वाच्यम् । यत्कालीनोपस्थि-त्याग्रिमक्षणे यस्य कार्यानुत्पादस्स तदा सत्प्रतिपक्ष इति विवक्षया अतिप्रसङ्गवारणात् ।

उपाध्यायरीत्या समानपदं सार्थकयितुं तदर्थमाह समानत्वं चेति । अगृहीताप्रामाण्यकेति । स्वविषयकाप्रामाण्यग्रहाभाववि-शिष्टेत्यर्थः ।

अथागृहीताप्रामाण्यकत्वशरीरे अन्वयव्याप्त्यंशे व्यतिरेकव्या-प्त्यंशे च यदप्रामाण्यं तद्ग्रहाभावविशिष्टत्वं निवेश्यं तद्व्याप्त्यंशे ऽ-प्रामाण्यग्रहसत्त्वे तद्व्याप्त्यवगाहिपरामर्शस्य सत्पतिपक्षत्वाप्रयोजक-

त्वात्, तथा चान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायाम- न्वयव्याप्त्यंशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षता न स्यात्। न च स्व- योग्यानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्य तदभावविशि- ष्टत्वं निवेशनीयम्। विरोधित्वं च समानविशेष्यकत्वानवच्छिन्नं ग्रा- ह्यम्। तेन विरोधिपरामर्शव्यावृत्तिरिति वाच्यम्। एवं सति ताद- शव्याप्तिद्वयविषयकसमूहालम्बनपरामर्शे एकतरांशेऽप्रामाण्यग्रहस- त्त्वे सत्प्रतिपक्षत्वानुपपत्तेरिति चेन्न।

स्वीययत्किञ्चिद्विषयताप्रयोज्यानुमितिप्रतिबन्धकज्ञानसामान्याभा- वस्य निवेशनीयत्वात्। विरोधित्वं च विरोधिपरामर्शव्यावृत्तं ग्राह्यम् समूहालम्बनपरामर्शस्थले यादृशव्याप्त्यंशे प्रामाण्यज्ञानं नास्ति तादृशव्याप्तिविषयताप्रयोज्यानुमितिविरोधिज्ञानसामान्याभावस्य स- त्त्वान्न सत्प्रतिपक्षतानुपपत्तिः। साध्यसिद्ध्यौपयिकत्वं प्रकृतसा- ध्यानुमितिजननयोग्यत्वम्, योग्यत्वं चाप्रामाण्यग्रहास्कन्दितस्यापि परामर्शस्याप्रामाण्यग्रहाभावस्य तत्सहकारित्वादिति नागृहीताप्रा- माण्यकत्ववैयर्थ्यम् असति अविद्यमाने परामर्शे स्वविषयकपरामर्श- स्वस्य सत्प्रतिपक्षताविरहात्। न चासति गृहीतकाप्रामाण्यके वा प्र- कृतसाध्यानुमापकपरामर्शेऽप्रामाण्यज्ञानभावसहकृतपरामर्शरूपका- रणाविरहादनुमितिविरहो न विरोधिपरामर्शप्रयुक्त इति समानत्वा- निवेशेपि नातिप्रसङ्गावकाश इति वाच्यम्। तत्र उभयोरेव कारणा- भावतया विनिगमनाविरहेण कार्याभावप्रयोजकताया दुर्वारत्वात्। विरोधिपरामर्शमात्रप्रयुक्तत्वस्य प्रयोजनविरहेणानिवेशात् यत्र प्रति- रोधको विरोधिपरामर्शो बाधनिश्चयश्च वर्तते तत्रापि सत्प्रतिपक्षत्व- स्येष्टत्वात्।

(दी०) यत्तु–प्रामाण्यनिर्णयेनाधिकबलतया बाधकस्य विरोधिपरामर्शस्य वारणाय समानेति–तदसत् व्यभिचारेण प्रामा- ण्यग्रहस्याबलत्वात्, अन्यत्राप्रामाण्यग्रहानुकूलत्वेनैव क्वचित्तदुपयो- गात्। बलपदोपसन्दानाच्चोक्तरूपलाभान्न तद्वैयर्थ्यम्। लिङ्गप- दोपादानाच्च स्वीयलिङ्गतौपयिकपरामर्शलाभादात्मादेर्व्युदासः। विरोधिपरामर्शप्रतिरुद्धकार्यकविशिष्टपरामर्शाविषयत्वन्तु फलि-

तार्थः । अगृहीताप्रामाण्यकत्वसंवलितयोग्यतोपादाने तु बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यासिद्धिसमर्थपरामर्शविषयत्वं वाच्यं तत्त्वम् ।

यदि चायं वह्निव्याप्यवान् वह्न्यभावव्याप्यवांश्चेति परामर्शादयं वह्निमान् वह्न्यभावव्याप्यवांश्चेत्यनुमितिः प्रामाणिकी न तु सत्प्रतिपक्षत्वम्, तदा कार्यप्रतिरोधोऽवश्यमुपादेयोऽजनितविरोधिबोधकत्वेन च विरोधिपरामर्शो विशेषणीयः। अत एवाग्रिमलक्षणे विरोधिबोधिकान्येति फलतो ज्ञानविशेषणम् । एकस्याप्रामाण्यग्रहेऽपरेणानुमितिजननात् तद्वारणाय वा तत् । प्रतिरुद्धकार्यत्वञ्च प्रतिरुद्धकार्यपरामर्शविषयत्वम् ।

(गा०) मिश्रोक्तसमानपदव्यावृत्तिं दर्शयितुमुपन्यस्यति यत्त्विति । प्रामाण्यनिर्णयेन—स्वविषयकप्रामाण्यनिश्चयेन । एतच्च बाधकताप्रयोजकाधिकबलतायां हेतुः । बाधकस्य—विरोध्यनुमापकस्य, निश्चितप्रामाण्यकपरामर्शजन्यानुमितावनिश्चितप्रामाण्यकाविरोधिपरामर्शो न प्रतिबन्धकः तद्व्याप्यवत्ताज्ञानधर्मिकप्रामाण्यनिश्चयस्य विरोधिव्याप्यवत्ताज्ञानप्रतिबन्धकतायामुत्तेजकत्वात् । तादृशप्रामाण्यनिश्चये विरोधिव्याप्यवत्ताज्ञानधर्मिकप्रामाण्यनिश्चयाभावस्य विशेषणत्वेनोभयपरामर्शे प्रामाण्यनिश्चयदशायां उभयानुमितिप्रतिरोधनिर्वाह इत्यभिमानः । समानेतीति । समानत्वं च विरोधिबोधानुपधायकत्वं विरोधिबोधाव्यवहितप्राक्क्षणाविशिष्टत्वाभाव इति यावत् । प्रतिरुद्धकार्यकत्वं च तदभावातिरिक्तसकलप्रकृतसाध्यकानुमितिकारणसमवधानकालावच्छिन्नतत्प्रयुक्तकार्यानुपधायकत्वम् । सकलकारणनिवेशादुभयपरामर्शसत्त्वे बाधेन हीनबलस्य हेतोर्न सत्प्रतिपक्षत्वम् । कार्यप्रतिरोधनिवेशश्च परामर्शप्रामाण्यनिश्चयेनाधिकबलहेतावतिव्याप्तिवारणायेति बोध्यम् । प्रतिहेतोः स्वसाध्यबाधेन हीनबलतादशायां प्रकृतहेतोः सत्प्रतिपक्षतावारणाय विरोधिपरामर्शेपि प्रकृतहेतुपरामर्शाभावातिरिक्तसकलकारणसमवहितत्वं निवेश्यम् । वस्तुतो मिश्रमतेऽनुमितौ न विरोधिपरामर्शमात्रस्य विरोधित्वं किन्तु विरोध्यनुमितिसामग्र्या एव, तथाचेतरकारणासम-

वहितस्य परामर्शस्य कार्यप्रतिरोधकतया प्रतिरोधकविरोधिपरामर्शेतरकारणसमवहितत्वं विशेषणं देयम्।

उभयपरामर्शे अप्रामाण्यग्रहासत्त्व एकत्र प्रामाण्यनिश्चयेपि तस्यानुमितिजनकत्वासिद्ध्या विरोधिपरामर्शस्य सामग्रीविधया स्वातन्त्र्येण वा विरोधितायां न प्रतिबध्यानुमितिजनकपरामर्शीयप्रामाण्यग्रहस्योजकत्वमित्याशयेनाह व्यभिचारेणेति। उक्तस्थले विरोध्यनुमित्युत्पत्तौ तत्र प्रकृतसाध्यानुमापकपरामर्शाभावरूपकारणस्य व्यभिचारप्रसङ्गेनेत्यर्थः। अबलत्वात्—प्रकृतपरामर्शेऽप्रामाण्यग्रहमन्तरेण उक्तस्थलेऽनुमित्यनुपधायकत्वात्, तथाच तत्र सत्प्रतिपक्षत्वमिष्टमेवेति भावः।

अथवा व्यभिचारेण तज्जनकज्ञाने प्रामाण्यनिश्चयं विनाप्यनुमित्युत्पत्त्या जनकज्ञाने प्रामाण्यग्रहस्याबलत्वात् अनुमितिसामग्र्यघटकत्वात्, तथाच यत्र प्रकृतपरामर्शे न प्रामाण्यग्रहः किन्तु विरोधिपरामर्श एव तत्रापि प्रकृतपरामर्शे अप्रामाण्यग्रहासत्त्वे कोटिद्वयानुमितिसामग्र्या अक्षतत्वात् परस्परविरोधेन नैकस्यानुमितिरिति सत्प्रतिपक्षत्वमिष्टमेवेति भावः।

नन्वेकत्र प्रामाण्यग्रहसत्त्वे एककोट्यनुमितेः प्रामाणिकत्वेन तस्य बलवत्त्वमावश्यकमित्यत आह अन्यत्रेति। परामर्शान्तर इत्यर्थः। तदुपयोगात्—प्रामाण्यग्रहस्यानुमित्युत्पादकत्वात्। बलपदस्याविवक्षितार्थत्वेपि समानपदस्य निरुक्तार्थतात्पर्यग्राहकतया बलपदोपादानं सार्थकयति बलपदे इति। लिङ्गपदोपादानवैयर्थ्यशंकां निरस्यति लिङ्गपद इति। स्वीयलिङ्गत्वौपयिक इति। स्वनिष्ठप्रकृतसाध्यानुमापकतावच्छेदकविषयताविशेषरूपगमकतानिर्वाहकेत्यर्थः।

आत्मादेरिति। अन्यथा तस्यापि धूमलिङ्गकवन्ह्यनुमित्यौपयिकपरामर्शकालीनवन्ह्यभावाद्यनुमापकपरामर्शप्रतिरुद्धवह्न्यनुमित्यात्मककार्यकत्वसत्त्वेन धूमादेरिव सत्प्रतिपक्षितत्वापत्तिरिति भावः। न च प्रतिरुद्धकार्यकत्वं प्रतिरुद्धकार्यकपरामर्शविषयत्वं तच्च नात्मादाविति नातिप्रसङ्ग इति वाच्यम्। आत्मादेरपि प्रतिरुद्धकार्यकसमूहालम्बनादिरूपधूमादिपरामर्शविषयत्वसम्भवात्। प्रतिरुद्धकार्यकत्वमित्यनेन प्रतिरुद्धकार्यकपरामर्शविषयत्वमवश्यमेव विवक्षणीयमनुमितेर्हेतुकार्यत्वाभावेन हेतोस्तत्कार्यकत्वाभावात्, तथाच तादृश

विषयतायां प्रकृतानुमितिजनकतावच्छेदकत्वानिवेशेनैवोपपत्तेःविरोधिपरामर्शे स्वनिष्ठप्रकृतानुमितिजनकतावच्छेदकविषयताकपरामर्शकालीनत्वनिवेशनमनुचितमित्याशयेन तथैव निष्कृष्टार्थमाह विरोधिपरामर्शेति । प्रकृतानुमितिविरोध्यनुमितियोग्यपरामर्शप्रयुक्ताग्रिमक्षणावच्छिन्नानुत्पादप्रतियोग्यनुमितिजनकतावच्छेदकीभूतपरामर्शीयविषयताविशेषविशिष्टत्वमित्यर्थः ।

अगृहीताप्रामाण्यकपरामर्शत्वेनानुमितिजनकतामते जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यता न गृहीताप्रामाण्यकपरामर्शस्येति कार्यप्रतिरोधनिवेशमन्तरेणैवोपपत्त्या तं परित्यजति अगृहीताप्रामाण्यकेति । बाधोपस्थितिसमर्थेति । साध्यवत्ताज्ञानप्रतिबन्धकत्वे सति तत्प्रतिबध्या यानुमितिस्तद्योग्येत्यर्थः । साध्यवत्ताधीप्रतिबध्यत्वानिवेशात् साध्याभावव्याप्यानुमितिसमर्थपरामर्शकाले नातिप्रसङ्गः । तत्कालीनत्वं च एककालावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तद्विशिष्टत्वम् , तेन व्यधिकरणपरामर्शमादाय नातिप्रसङ्गः ।

यदि चायमिति । अनुमितिः प्रामाणिकीत्यत्र नच सत्प्रतिपक्षत्वमित्यत्र च यदि चेत्यस्य सम्बन्धः । तदभावव्याप्यवत्तानिश्चयानन्तरमिव तादृशनिश्चयक्षणेऽपि नानुमितिर्जायते तादृशनिश्चयस्य बाधनिश्चयवत् स्वोत्पत्तिक्षणेऽपि कार्योत्पत्तिविरोधित्वात् , तत्रानुमितेः प्रामाणिकत्वे तादृशानुमित्युत्पत्तिक्षणेऽपि सत्प्रतिपक्षतायामपि नानुपपत्तिः तदग्रिमक्षणे विरोधिपरामर्शादनुमितिप्रतिरोधादित्युभयत्र विवादप्रदर्शनार्थं तदुपादानम् । कार्यप्रतिरोधोऽवश्यमुपादेय इति । स्वातन्त्र्येण प्रकृतसाध्यसिद्ध्यौपयिकपरामर्शे स्वजन्यकार्याभावविशिष्टत्वरूपप्रतिहतकार्यकत्वमगृहीताप्रामाण्यकत्वेनानुमितिहेतुतामतेऽपि निवेश्यमित्यर्थः । अजनितविरोधिबोधकत्वेनेति । स्वजन्यविरोध्यनुमित्यभावविशिष्टत्वेनेत्यर्थः । विशेषणीय इति । तेन तत्र विरोधिवन्हिसाध्यकपरामर्शेन वन्ह्यभावसाधकहेतोर्न सत्प्रतिपक्षितत्वमिति शेषः । अत एव–उक्तस्थले वन्ह्यभावसाधकहेतोः सत्प्रतिपक्षत्ववारणानुरोधादेव । विरोधिबोधकान्येति । निरुक्तार्थकमिति भावः । यथाश्रुतशब्दतो गमकतौपयिकरूपे विरोधिबोधकान्यत्वं लभ्यते न तु ज्ञायमानपदोपस्थाप्यज्ञाने, तथा विवक्षणे च यादृशव्याप्त्यादिमत्तया ज्ञानेन प्रकृतसाध्यकपरामर्शशून्यस्य पुरुषान्तरस्य विरोध्यनुमितिर्जनिता

प्रकृतसाध्यपरामर्शसहिततादृशव्याप्तिविषयकज्ञानान्तरस्यापि सत्प्रतिपक्षत्वप्रयोजकतानुपपत्तिरतः फलतो ज्ञानविशेषणमिति । उक्तानुमितेरप्रामाणिकत्वेपि तदानीं सत्प्रतिपक्षत्वोपगमेपि वाग्निमलक्षणे विरोधिपरामर्शे विरोधिबोधकान्यत्वस्य निरुक्तव्यावृतेरसंगतिः अतस्तन्मते व्यावृत्त्यन्तरमाह एकस्येति । तद्वारणाय-अनुमित्युपधायकपरामर्शस्य सत्प्रतिपक्षितत्वप्रयोजकतावारणाय । तत् विरोधिबोधकान्यत्वम्-स्वजन्यविरोधिबोधाव्यवहितप्राक्क्षणाविशिष्टं यत्तदन्यत्वात्मकं, स्वनिष्ठतादृशक्षणवैशिष्ट्यशून्यत्वात्मकं वा । नन्वेवमपि यत्र प्रतिहेतुपरामर्श एव विद्यते न तु प्रकृतहेतुपरामर्शः अन्यत एव कुतश्चित्प्रतिबन्धकात् न तदाग्निमक्षणे विरोध्यनुमितिः तत्राग्निमक्षणेऽतिप्रसंग एवेत्यत आह प्रतिरुद्धेति । तथाच तत्र प्रकृतहेतौ विशेषणीभूतपरामर्शविषयत्वाभावान्नातिप्रसंग इति भावः । न चैवमपि यत्र प्रकृतहेतुपरामर्शो गृहीताप्रामाण्यकः प्रतिहेतुपरामर्शश्चागृहीताप्रामाण्यको विद्यते प्रतिबन्धकान्तरवशाच्चाग्निमक्षणे विरोध्यनुमित्यनुत्पादः तत्रातिप्रसंगो दुर्वार एव प्रकृतहेतुपरामर्शेऽगृहीताप्रामाण्यकत्वस्य तन्नियतसाध्यसिद्धियोग्यताया वा निवेशे प्रतिहेतुपरामर्शे विरोधिबोधकान्यत्वस्य वैयर्थ्यमिति वाच्यम् । एतन्निवेशलाभायैव विरोधिबोधकान्यत्वस्योपादानात् ।

वस्तुतस्तु विरोधिबोधकान्यत्वं प्रकृतहेतुपरामर्शप्रतिरुद्धकार्यकत्वरूपं प्रतिहेतुपरामर्शविशेषणं गृहीताप्रामाण्यकप्रकृतहेतुपरामर्शाच्च न प्रतिहेतुकार्यप्रतिरोध इति तादृशपरामर्शदशायां नातिप्रसङ्गः ॥

(चि०) स्थापनाया व्याप्तिपक्षधर्म्मत्वमुभयवादिसिद्धम्, वादिना तदभावानुपन्यासात्, द्वितीयस्य तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके । तन्न । एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्म्मतया ज्ञातयोः प्रतिपक्षत्वात् । युगपदुपस्थितेः कारणवशेन स्वपरसाधारणत्वात् ।

(दी०) एकदेत्यादि । न च द्वितीयस्य परामर्शस्योत्पादनसमये पूर्वेणानुमितिजननात् कथं नैरन्तर्यमिति वाच्यम् । साधकमानादिवशेन क्षणमनुमित्यनुत्पादसम्भवात् । स्वपरेति । अयं भावः । न खलु सम्भवन्तः सर्वे एव हेत्वाभासाः समुद्भाव्याः आधिक्यप्रसङ्गात्, परन्तु यथाकालमेकः, तथाच प्रतिपक्षोद्भावनेऽपि नाप्रतिषेधमात्रेण व्याप्त्याद्यभ्युपगम इति ।

(गा०) मूले एकदेत्यस्य उत्पन्नयोरिति शेषः । अविरलक्रमेणोत्पन्नयोरित्यर्थकम् निरन्तरयोर्वेति मूलमाक्षिपति न चेत्यादि । साधकमानं-साध्यनिश्चयः । विरोधिपरामर्शानन्तरमपि यदि साधकमानादिवशेनानुमितिर्न जायेत तदा तदनुरोधेन सत्प्रतिपक्षस्य दोषता नायातीत्यतः क्षणमिति । क्षणैकमित्यर्थः ।

मूले ज्ञातयोर्ज्ञानयोः, प्रतिपक्षत्वात्-परस्परकार्यप्रतिरोधकत्वात् । युगपदिति । यौगपद्यमेककालवृत्तित्वं न तूत्पत्तिघटितं द्वितीयपक्षासंग्रहत्वात्, परामर्शद्वयसंवलनस्य स्वपरसाधारणत्वेऽपि परार्थस्थले व्याप्तिपक्षधर्मताभंगमुपेक्ष्य सत्प्रतिपक्षोद्भावनेनाप्रतिषिद्धत्वेन प्रकृतहेतौ व्याप्तिपक्षधर्मतयोः प्रतिवाद्यनुमतत्वग्रहान्न तयोस्तुल्यबलत्वमिति आक्षेपानुद्धाराद्भावं पूरयति दीधितावयं भाव इति । आधिक्यप्रसंगादिति । हेतुद्वयप्रयोग इव दोषद्वयोद्भावनेऽपि आधिक्यादिति भावः । यथाकाममित्यनेन तदुद्भावने विनिगमकशंका निराकृता । व्याप्त्याद्युपगमः-व्याप्त्यादेः प्रतिवाद्यनुमतत्वसिद्धिः । अप्रतिषिद्धस्याभावानुद्भावनरूपस्यान्यथासिद्धतया अनुमित्यनापेक्षकत्वादिति भावः ।

(चि०) अथ वस्तुनोऽद्व्यात्मकत्वेन व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः । न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम् । अविरोधेऽप्यनुमित्यविरोधात्, विरोधे तु व्याप्तिभङ्गनियमादिति चेन्न ।

प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्यु-

पजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात् ।

ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः किन्तु संशयः, निश्चये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेन्न ।

उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनास्य भिन्नत्वात् । दूषकताबीजन्तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं, न तु व्याप्तिपक्षधर्म्मताविरह एव-सद्धेतावपि सत्प्रतिपक्षत्वात् । एकत्र व्याप्तिभङ्गज्ञानद्वारा वास्य दूषकत्वम् । चक्षुरादेश्च नानुमानेन प्रतिरोधः, तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् ।

(दी०) प्रतिरुद्धत्वेति । प्रतिरोधप्रयोजकविरोधिव्याप्त्यादीत्यर्थः । उभयोरिति । परस्पराभावव्याप्यत्वं हि हेत्वोर्विरोधः, तद्ग्रहे च तयोरेकत्र निर्णयो न विरुध्यते इति भावः । दूषकतेति । विरोधिपरामर्शसत्त्वे नियमेन परामर्शान्तरादनुमित्यनुत्पादः तस्यानुमितिविरोधित्वं कल्पयति न तु तेन ज्ञाप्यमानस्य व्याप्त्यादिविरहस्य-सद्धेतावपि तस्यानुमितिविरोधित्वादित्यर्थः । व्याप्त्यादिविरहज्ञानद्वारा अस्य दूषकत्वमाह एकत्रेति । वाकारोऽनास्थायाम् । प्राथमिकावश्यकानुमितिप्रतिरोधेनैव तथात्वात् परमुखनिरीक्षकत्वेन तद्विषयस्याभासत्वायोगाच्चेति । ननु विरोधिपरामर्शो यदि विपरीतनिर्णयविरोधी कथं तर्हि सति विशेषदर्शने नयनादिजन्मा पीतत्वादिभ्रम इत्यत आह चक्षुरादेश्चेति । चस्त्वर्थः ।

(गा०) मूलेऽव्याप्त्यात्मकतयेति । साध्यतदभावयोरेकतरवत्त्वेऽपरानाधिकरणत्वनियमेनेत्यर्थः । व्याप्तीति । एकत्र हेत्वोरन्यतरत्र स्व-

स्वसाध्यनिरूपितव्याप्तिपक्षधर्मताज्ञानयोः अन्यतरभंग आवश्यक इति स एवान्यतरत्वेनोभयत्रावधारितो विशेष्य सन्दिग्धो दोष आस्तां किं प्रकरणसमस्य दोषतयेत्यर्थः । साध्यतदभावयोर्यौ व्याप्तौ तयोरेकधर्मिणि सत्त्वमनुपपन्नम् धर्मिवृत्तौ एकतरव्याप्त्यभावं तदा कल्पयति यदि व्याप्त्यभावं विना तन्नोपपद्येत इत्यवधारितुं शक्यते तदेव नोभयत्र व्याप्तिसत्त्वेपि साध्यतदभावौ यद्यविरुद्धौ स्यातां तदोभयत्र पक्षधर्मता निर्वहतीति प्रतिसन्धानेन तद्विघटनादिति सामान्येपि न व्याप्त्यादिभंगावधारणमिति कथमज्ञायमानस्य दोषतेत्याशंकते तयोरिति । साध्यतदभावयोरविरोधग्रहदशायामनुमित्यप्रतिरोधान्न सत्प्रतिपक्षता अपि तु विरोधावधारणदशायामेव, तथा चोक्तान्यथासिद्धिसंभावनाविरहादनुपपत्त्यवधारणं न दुर्घटमित्याह विरोध इति ।

प्रतिरुद्धत्वस्य कार्यानुत्पादस्यादोषतया प्रतिरुद्धत्वेत्यादि यथाश्रुतमूलासंगतिरतो व्याचष्टे प्रतिरुद्धत्वेतीति ।

एकधर्मिणि विरुद्धयोर्मिथस्साध्यतदाभावव्याप्ययोर्व्याप्यत्वेन ज्ञानं यदि निश्चयरूपं स्यात्तदा परस्परप्रतिबन्धेन नोत्पद्यत एवातो व्याप्त्यंशे पक्षधर्मतांशे संशयरूपमेव तत्, तथा च कारणीभूतनिश्चयाभावादेवानुमित्यनुत्पादो न तु सत्प्रतिपक्षभावात् इत्याक्षेपे उभयोरेकत्र निश्चयानन्तरमित्यादिना विरोधिद्वयव्याप्यवत्तानिश्चयस्य व्याप्तिसंशयोपजीव्यत्वाभिधानं न सङ्गच्छते तादृशनिश्चयस्यैवानुपपादितत्वादतो भावमाह परस्परेति । साध्यतदभावव्याप्यत्वं हि हेत्वोस्साध्यतदभावयोरेव विरोधः न तु परस्परं तयोः परस्परं विरुद्धत्वेन ज्ञातयोरेव नैकदा निश्चय इति तदग्रहणे परस्परव्यापकविरुद्धत्वेन ग्रहेपि हेत्वोरेकत्र निश्चयः सम्भवत्येवेत्यर्थः ।

दूषकताबीजमित्यादिग्रन्थस्य दूषकत्वं निग्रहप्रयोजकत्वं दुष्टत्वमिति यावत् इत्येतादृशार्थपर्यालोचनया विरोधिपरामर्शेनानुमित्यजनकत्वं सत्प्रतिपक्षस्थले हेतोर्दुष्टत्वप्रयोजकं न तु निर्णयाजनकत्वमात्रं विरोधिपरामर्शशून्यतादशायामपि कारणविरहेणानुमित्यजनकतया सद्धेतोर्दुष्टतापत्तेः, नापि विरोधिपरामर्शज्ञाप्यमानो व्याप्तिपक्षधर्मताविरहः सद्धेतौ तदसत्त्वे विरोधिपरामर्शसंवलनदशायामपि तस्य दुष्टतानुपपत्तेः, विरोधिपरामर्शप्रयु-

क्तव्याप्तिभङ्गज्ञानं भ्रमप्रमासाधारणं वा सद्धेतुसाधारणदुष्टताप्रयोजकमित्यर्थो नित्यदोषतानभ्युपगन्तृमते न सम्भवतीति तमन्यथा व्याचष्टे विरोधीत्यादिना। समानबलसामग्र्या प्रतिबन्धेन निर्णयाजनकत्वमिति मूले सामग्रीपदं विरोधिपरामर्शपरं प्रतिबन्धपदं नियमपरम् विशेषणे तृतीया निर्णयाजनकत्वमनुमित्यनुत्पादः, तथा च विरोधिपरामर्शनियतोऽनुमित्यनुत्पाद इति समुदितार्थः। नियमश्च व्यापकत्वमित्याशयेना विरोधिपरामर्शसत्त्वे नियमेनानुमित्यनुत्पाद इति व्याख्यातम्। तस्य-विरोधिपरामर्शस्य। विरोधित्वं कल्पयतीति। एवं च दूषकतापदं विरोधिपरामर्शनिष्ठप्रतिबन्धकतापरं बीजपदं कल्पकार्थकं बोध्यम्।

मूले न तु व्याप्तिपक्षधर्मताविरह इति। अत्र दूषकताबीजमित्यस्यानुषङ्गेण व्याप्तिपक्षधर्मताविरहो न दूषकताबीजमिति लभ्यते, स चासङ्गतः व्याप्तिपक्षधर्मताविरहस्य विरोधिपरामर्शनिष्ठप्रतिबन्धकताकल्पकत्वरूपदूषकताबीजत्वाप्रसक्तेः, अतो व्याप्तिपक्षधर्मताविरह इत्यनन्तरं विरोधिपरामर्शकालीनानुमित्यनुत्पादकल्प्यप्रतिबन्धकताक इति पूरणीयमित्याशयेन व्याचष्टे न त्विति। व्याप्त्यादिविरहस्य स्वरूपसतो दोषताप्रसक्तेः, अन्यज्ञाप्यमानस्य तथात्वे च विरोधिपरामर्शानुपयोगितया तदसंवलनदशायामपि सत्प्रतिपक्षतापत्तिरतो न त्वित्यनन्तरं तेन ज्ञाप्यमानस्य इति पूरणीयमित्याशयेन व्याचष्टे तेनेति। सद्धेतावपि-व्याप्तिपक्षधर्मताविरहशून्येपि, एतादृशमूलप्रतीकानन्तरं पूरयति तस्येति। विरोधिपरामर्शस्येत्यर्थः।

सत्प्रतिपक्षत्वादितिमूलस्य व्याख्या अनुमितिविरोधित्वादिति। दूषकत्वं-विरोधिपरामर्शस्यानुमितिविरोधित्वम्। एतन्मतस्य दूष्यत्वाद्धाकारमनिर्भरसूचकतया व्याचष्टे वाकार इति। अनुमितिविरोधेन-अनुमित्यनुत्पादानुरोधेन। तथात्वात्-साक्षादनुमितिविरोधित्वात्, अन्यथा व्याप्तिभङ्गज्ञानस्योदीच्यतया साक्षादनुमित्यविरोधितया च विरोधिसंवलितपरामर्शात्प्रथममनुमितिर्जन्येतैवेति भावः। परंपरया व्याप्तिज्ञानविरोधित्वं न हेत्वाभासतायामप्युपयुज्यत इत्याह परेति। प्रथमपक्षे विरोध्यनुमितिसामग्र्या अनुमितिविरोधित्वे प्रत्यक्षप्रतिबन्धकत्वमपि तस्याः स्यात् विरोधिसामग्रीत्वाविशेषादित्याशंक्य चक्षुरादेश्चेत्यादिग्रन्थमवतार्य फलानु-

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़् पुस्तकमालायाः ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।		रु. आ. पा.
१ नलपाकः नलविरचितः । संपूर्णः	(पाकशास्त्रम् १)	१—८—०
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृताऽन्वयार्थबोधिनीटीकासहितम् ।	(वेदान्तं १)	१०—०—०
३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् ।	(वैशेषिकं १)	३—८—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्	(वैदिकं १)	०—६—०
५ लघुशब्देन्दुशेखरः चन्द्रकलाटीकासहितः तत्पुरुषादिसमासिपर्यन्तः ।	(व्याकरणं १)	१०—०—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपण" दिनकरीय महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रीव्याख्यासहिता ।	(न्यायं १)	६—०—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया–तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् ।	(वेदान्तं २)	०—८—०
८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वरपाण्डेयनिर्मितः ।	(काव्यं १)	०—८—०
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः ।	(कामशास्त्रं १)	०—१२—०
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः ।	[ज्यो० १]	२—०—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध–शौच–स्नान–भोजन–कल्पसहितम् ।	[कर्म० १]	०—८—०
१२ पुरुषसूक्तम् । सायणभाष्य–महीधरभाष्य–मंगलभाष्य–निम्बार्कमतभाष्यचतुष्टयसहितम् ।	(वैदिकं २)	१—४—०

तत्र मुद्रितग्रन्थनामानि		रु. आ. पा.
१३ श्रीमत्सनत्सुजातीयम्-श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् ।	[वे०३]	१—४—०
१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् ।	(काव्यं २)	२—०—०
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः	[छंदः १]	०—६—०
१६ कारिकावली मुक्तावली-न्यायचन्द्रिका-टीकाद्वयसहिता सटिप्पणा ।	(न्याय २)	१—०—०
१७ पारस्करगृह्यसूत्रं हरिहरभाष्य-गदाधरभाष्यद्वयसहितम् । (कर्मकाण्डं २)	सादीजिल्द	३—०—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीका भाग १—२	(वेदान्तं ४)	१०—०—०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः ।		०—८—०
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः)		१—०—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम्	(स्तोत्रवि०)	१—०—०
२२ बौद्धाऽऽचार्य श्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः भाषाटीकासहितः	(बौद्धन्याय वि० १)	१—८—०
२३ सपरिष्कृत दर्पणसहित वैयाकरणभूषणसारः	(व्याकरणं वि० ३)	४—०—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । प्रथमाध्याय-प्रथमभागः ।	(न्यायविभाग ३)	४—०—०
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामीशास्त्रीकृतया सारविवेचिन्या व्याख्ययासहितः	(मीमांसावि० १)	३—०—०
२६ पौरोहित्यकर्मसारः	(कर्मकाण्ड वि०)	०—४—०

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर लेन,
बनारस सिटी ।